ISSN: 2320-740X

# शारदा

वार्षिकपत्रिका



प्रधानसम्पादकः

आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकाः

डा. सि. हेच्. कृष्णानन्तपद्मनाभम्

डा. श्रीकरः जि. एन्.

डा. विश्वनाथहेगडे

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा “A” श्रेण्याङ्कितः

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७१३९




संस्कृतोत्सवे गुरुभवने परिसरीयसंस्कृतोत्सवकार्यक्रमं समुद्घाटयन्तः
परमपूज्यजगद्गुरुश्रीश्रीभारतीतीर्थमहास्वामिनः



संस्कृतोत्सवसन्दर्भे जगद्गुरुश्रीचरणानां करकमलाभ्यां
परिसरीयपत्रिकायाः वाक्यार्थभारत्याः उद्घाटनम्

# शारदा

## वार्षिकपत्रिका

प्रधानसम्पादकः
आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकाः
डा. सि. हेच्. कृष्णानन्तपद्मनाभम्
डा. श्रीकरः जि. एन्.
डा. विश्वनाथहेगडे

राष्ट्रियसंस्कृतसंस्थानम्
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितः
राजीवगान्धीपरिसरः
शृङ्गेरी – ५७७१३९

# शारदा

ISSN :2320-740X

प्रधानसम्पादकः - आचार्यः ए. पि. सच्चिदानन्दः
सम्पादनसमितिः

डा. सि. हेच्. कृष्णानन्तपद्मनाभम्
डा. विश्वनाथहेगडे
श्री रवीशः एन्.
डा. कविता एस्.
श्रीमती बबिता बहुगुणा
श्रीमती पावना एम्. एन्.
आयुष्मान् प्रदीपभट्टः के.
आयुष्मान् मनोजभट्टः
आयुष्मान् गणेश रामु भट्टः
आयुष्मती अपर्णा होळ्ळा
आयुष्मती गीताञ्जली माळवे

प्रकाशनवर्षम् : २०२०
© राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः
कर्णाटकराज्यम्

प्रतिः 550

प्रकाशकः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी - ५७७१३९
कर्णाटकराज्यम्

पृष्ठविन्यासः - रवीशः एन्., सङ्गणकप्राध्यापकः

मुद्रणम्
श्री सिरि एन्टर्प्रैसस्, शृङ्गेरी

© All rights are reserved for Publisher,
Provided that contributors are responsible for their respective writing.

# श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्, दक्षिणाम्नायश्रीशारदापीठम्, शृङ्गेरी



जगद्गुरवः श्रीश्रीभारतीतीर्थमहास्वामिनः
श्रीदक्षिणाम्नायशृङ्गेरीशारदापीठम्, शृङ्गेरी

पवित्रक्षेत्रे शृङ्गगिरौ विद्यमानं श्रीराजीवगान्धीसंस्कृतविद्यापीठं संस्कृतप्रचारं विदधद् वरीवर्ति । विद्यापीठेऽस्मिन् परुदिव ऐषमोऽपि शारदानाम्नी पत्रिका प्रकाश्यत इति विदित्वा दक्षिणाम्नायशृङ्गगिरिशारदापीठाधीश्वराः जगद्गुरुश्रीभारतीतीर्थमहास्वामिचरणाः नितरां प्रमुदितस्वान्ता अभवन् ।

इयं च पत्रिका अत्रत्यानां छात्राणां प्रज्ञायाः प्रतिभायाश्च दर्पणायते । श्रीशारदाशशिकलावतंसयोरकम्पानुकम्पया पत्रिकेयं हृद्यैः लेखनैर्विभूषिता सहृदयानां चेतांसि रञ्जयतु , विद्यापीठमिदमुत्तरोत्तरमभिवर्धताम् । अत्रत्याः छात्राः सम्यग्विद्यामधीत्य श्रेयोभाजनानि भूयासुरिति श्रीचरणा आशासते ।

इति निवेदयिता
डा. वे. रा. गौरीशङ्करः

प्रो. पि. एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

Prof. P. N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



## शुभम् आकाङ्क्षामः

अखिलेऽस्मिन् भूमण्डले जीवनतत्त्वविचारसाराणां परमं निदानं विश्वगुरुस्थानत्वेन जेगीयमानं भारतमेवेतीह लब्धजनीनां भारतीयानां समेषां महद् भागधेयम् । सतीष्वपि भारतीयासु बहुषु भाषासु तत्सारप्रतिपादकता गैर्वाण्या एवेति हि तस्या अनादित्वान्निरणायि । नूनं सैधमाना वर्वर्तीत्यत्र विश्वतः संस्कृतम् अधीयतां तदनुरागिणां संख्यैव प्रमाणम् । लौकिकप्रयोजने महति सत्यपि तदननुसन्धानेन केवलज्ञानैकपिपासया हि तेजस्विनो युवानो युवतयश्च संस्कृतम् अध्येतारो दृश्यन्त इति मोमुदीति नःस्वान्तम् । अनेन संस्कृतस्वाध्याययज्ञेनावश्यं तदध्येतारोऽनेन ज्ञानावाप्तिरूपेण फलेन सह ऐहिकमपि फलं समाप्नुवन्तीति दृढं नो विस्रम्भः । शाखोपशाखाभिरुपबृंहितस्य तस्य संस्कृतस्य प्रचारकर्मणि दीक्षाबद्धं वर्तते राष्ट्रियसंस्कृतसंस्थानम् । पुण्यभूमौ शृङ्गगिरौ स्थितेन राजीवगान्धीपरिसरेण शास्त्रप्रसारो भृशं प्रवर्त्यमान इति सुविदितमेतत् । तदैषमः परिसरेणानेन शारदा नाम्नी वार्षिकी छात्राध्यापकलेखविभूषिता तद्यशोवैदुष्यविद्योतिका पत्रिका प्राकाश्यं नीयत इति तान् साधुवादैरभिनन्दामः । नूनमियं शारदा तत्पठितॄन् तोषयतीति विश्वसिमः । पत्रिकायाः सम्पादने कारणीभूतेभ्यः परिसरप्राचार्येभ्यः आचार्येभ्यः ए. पि. सच्चिदानन्दवर्येभ्यः, तत्सहकारिभ्य इतरेभ्यश्च सादुवादान् वितनुमः । सर्वेभ्यश्च तत्र शुभमाकाङ्क्षामः । परिसरविकासे कारणानां जगद्गुरूणां श्रीश्री भारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारतीमहास्वामिनां च चरणेषु सश्रद्धं नमोवाकाः समर्प्यन्ते ।

विकारि-फाल्गुण-शुक्लैकादशी
०६-०३-२०२०, शुक्रवासरः

आचार्यः प. ना. शास्त्री,
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi -110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. S. Subrahmanya Sharma
The Registrar
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



## शुभसन्देशः

भारतदेशस्य उत्कर्षाधायककारणेषु प्रधानतमं कारणं भवति संस्कृतम् । संस्कृतस्य संरक्षणं नाम तन्निहितोपादेयानां संस्कृतीनां रक्षणमेवेति निश्चप्रचम् । संस्कृते रक्षणेनैव भारतस्य प्रतिष्ठा प्रतिष्ठिता भवति । संस्कृतसंरक्षणप्रचारकर्मणि अनवरतं कार्यं कुर्वदिवास्ति राष्ट्रियसंस्कृतसंस्थानम् इति च सर्वैः सुविदितमेव । संथानस्य शृङ्गेरिस्थो राजीवगान्धीपरिसरः संस्कृतवाङ्मयस्य वेदान्तादिशास्त्रोपेतस्य प्रतिजिज्ञासु प्रापणे अनवरतं बहुभिःप्रकारैः प्रयतमानो राराष्टीति जानन्ति लोकाः । प्रतिवर्षमिवामुष्मिन्नपि वर्षे छात्राणाम् अध्यापकानां विद्वत्पूर्णलेखैः तत्परिसरच्छात्राध्यापककार्यालयीययशोवैभवप्रकाशकविवरणाभिः सुष्ठु समलङ्कृता शारदा नाम वर्षिकपत्रिका प्रकाश्यत इति महतो हर्षस्य विषयः । पत्रिका चेयं जिज्ञासूनां कृतेऽवश्यं सन्तोषं जनयतीति मे विश्वासः । पत्रिकायाः संपादने प्रधानभूमिकामवहद्भ्यः परिसरप्राचार्येभ्यः तदीयकार्यकर्तृभ्यश्च भूयोऽभिनन्दनानि वितनोमि । अस्य परिसरस्य यशोविकासेऽनवग्रहाशीःप्रदातॄणां जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्री श्री विधुशेखरभारती महास्वामिनां च चरणेषु प्रणतिततीः समर्पयामि । इत्थमेव बहुविधैः संस्कृतसंवर्धककार्यक्रमैः परिसरोऽयं समभिवर्धतामिति आशासे ।

विकारि-फाल्गुण-शुक्लदशमी
०५-०३-२०२०, गुरुवासरः

यौष्माकः
प्रो. एस्. सुब्रह्मण्यशर्मा

56-57, Institutional Area, Janakapuri, New Delhi-110058
Ph.: (O) 011-28520979; (Fax) 011-28520976
EPABX : 28524993, 28521994, 28524995
E-Mail: sanskrit.registrar@gmail.com / ps2reg.sansthan@gmail.com

**आचार्यः ए. पि. सच्चिदानन्दः**
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

**Prof. A. P. Sachidananda**
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139




## प्राग्भणितिः

### वाचं नो वितनोत्वसौ प्रणमतां श्रीशारदा सर्वदा

विदितमेवैतत्समैः सहृदयै राजीवगन्धीपरिसरो राष्ट्रियसंस्कृतसंस्थानाधीनोऽनवरतं स्वाध्यायोऽध्येतव्य इत्याम्नायादेशं सश्रद्धमनुपालयन् राष्ट्र एव स्वं नाम ख्यापयतीति । आत्यन्तिकदुःखनिवृत्तयेऽतिशयानन्दावाप्तये च विधिनिषेधात्मकस्य धर्मस्य ज्ञानमतितरामावश्यकम् । तस्यैतस्य धर्मस्य मूलं परब्रह्मणो निश्वासभूता वेदा एवेति न तिरोहितं मतिमताम्।अपौरुषेयस्यास्य सर्वज्ञानमयस्य वेदस्यार्थपरिज्ञानं मानुषशेमुष्यशक्यमिति परमकारुणिकैर्महर्षिभिः शास्त्राणि प्राणीयन्त । वेदार्थं व्याचक्षाणानाममीषां शास्त्राणामध्ययनेनैव विवेकप्राप्तिः सम्भवित्रीति निश्चप्रचम् । उक्तञ्चाभियुक्तैः **'सच्छास्त्रजन्मा हि विवेकलाभ'** इति । इयं हि शास्त्रविद्या पुरुषमात्रस्यान्तःसत्त्वं वर्धयति येनासौ विहितकर्मण्येवात्मानं व्यापारयति हापयति च निषिद्धकर्मभ्यः। प्रत्येकं मानवस्येयं सिद्धिर्यदि स्यात्तर्हि नूनं सर्वो लोकोऽभ्युदयेन योक्ष्यते । इत्थमस्याः शास्त्रविद्याया उपासनमात्मकल्याणाय लोकोद्धाराय चेत्यायातम् । इदमुद्देश्यमात्मन्याकलय्य राष्ट्रियसंस्कृतसंस्थानमितोऽष्टाविंशतेर्वर्षेभ्यः प्राक् शाङ्कर्यामस्यां भूमौ शृङ्गगिरिक्षेत्रे स्वीयामेकां शाखां प्रतिष्ठाप्यैनां प्राच्यविद्यासंरक्षणदीक्षितां व्यधात् । ततःप्रभृति स्वाध्यायप्रवचनाभ्यामप्रमत्तेनानेन परिसरेणातिवेलं परिश्रम्य बहवः शास्त्रविद्यापारगा व्यधायिषत ।

श्रीदक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां जगद्गुरूणामाशीर्भिराप्लावितोऽयं परिसरोऽष्टाविंशतिं वत्सरान् सार्थकमतिवाह्य एकान्नत्रिंशे हायने पदं निदधानोऽद्यापि प्रवचनपटुभिः पण्डितैर्मण्डितः ग्रहणधारणपटुभिर्विनम्रैश्छात्रैश्चोपेतः राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदशसु परिसरेष्वग्रस्थानमलङ्कुर्वाणः समाचरत्यद्य स्वीयं वार्षिकं महः ।

परिसरस्य समुत्कर्षहेतवो बहवः कलापा निरन्तरमत्र परिसरे प्रवर्त्यन्ते येषु परिसरस्य प्राध्यापकानां वैदुष्यपूर्णैः, छात्राणां प्रतिभाप्रसूनैश्च लेखनैर्विद्वन्मनांसि रमयन्ती **'शारदा'** पत्रिका शारदाम्बायाः कृपया वार्षिकोत्सवमहे प्राकाश्यं नीयमाना जगद्गुरुकरसरसीरुहाभ्यामाविष्क्रियत इति भाग्यस्थानमस्माकम् ।

पत्रिकामिमां कृत्स्नां कटाक्षयित्वा अनुरूपामाशंसां प्रहितवद्भ्यः गैर्वाण्या गिरः प्रचारे प्रसारे चानवरतमनवरुद्धान्तःकरणेभ्यः परिसरस्यास्य विकासे सन्ततं यत्नशीलेभ्यः **कुलपतिभ्यः आचार्यपरमेश्वरनारायणशास्त्रिवर्येभ्यः** सनुति कार्तज्ञ्यं विनिवेदयामि । संस्कृतशास्त्रविद्यासंरक्षणदीक्षितेभ्यः **कुलसचिवेभ्यः आचार्यसुब्रह्मण्यशर्मभ्यो** धन्यतामाविष्करोमि ।

सत्रारम्भादेव पत्रिकासम्पादनकर्मणि निरतेभ्यः वाग्वर्धिनीपरिषदध्वदर्शिभ्यः **डा. कृष्णानन्तपद्मनाभ – डा. श्रीकर जि. एन्.-डा विश्वनाथहेगडे**महाशयेभ्यः मङ्गलाशंसां वितरामि । राज्य-राष्ट्रस्तरीयासु समास्वपि स्पर्धासु यशःसम्पादने छात्रान् सज्जीकर्तुं सततमुद्यमशीलेभ्यः स्पर्धिष्णुपरिष्दध्वदर्शिभ्यः **आचार्य नवीनहोळ्ळ - श्री अरुणभट्ट - डा. रमानन्दभट्टेभ्यः** शुभाशंसनमाविष्करोमि । पत्रिकासम्पादनेऽतिवेलं परिश्रान्तवद्भ्यः पत्रिकासम्पादनसमितिसदस्येभ्यः मङ्गलमातनोमि ।

अस्माकं राजीवगान्धीपरिसरस्य सर्वाङ्गीणविकासे निदानं भगवत्याः **शारदाम्बाया** आशीराशिः, **ज्ञानतपोमूर्तीनामनन्तश्रीविभूषितानां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां जगद्गुरूणां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्च** दिव्यानुग्रहश्चेति श्रीशारदाम्बां जगद्गुरुचरणांश्च सभक्तिश्रद्धं वन्दे ।

**इत्थं विद्वज्जनविधेयः**

ए·पी·सच्चिदानन्दः

**( ए. पि. सच्चिदानन्दः )**

# सम्पादकीयम्

विदन्त्यनयेति विद्या । सा च द्विविधा परा अपरा चेति । सर्वाश्च विद्या अत्रैवान्तर्भवन्ति । परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपा । तदवाप्तावितरासां विद्यानामुपकारिता । प्ररोचकप्रचोदकवचनानि विनैव प्रेक्षावतां प्रवृत्तिस्तत्र भवत्येवेति सर्वत्र शास्त्रेषु सूत्रकारादिभिः तथाविधानि वचांसि नोपनिबद्धानि । अध्यात्मविद्याया इव विद्याभ्योपि विमुखं गतानां लोकानां विद्यासु प्रवृत्तिमाधातुं परमकारुणिकैः महर्षिभिः प्रयोजनकथनपूर्वकं शास्त्रोपदेश आरब्धः। दृश्यते चेयं रीतिः पातञ्जले महाभाष्ये ।

तदेवं साम्प्रतिके काले वेदशास्त्रत्राणवितानकर्मणि अनवरतं श्रद्दधानेन राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरेण अध्येतृणाम् अध्ययनकर्मणि प्रोत्साहनार्थम् आबहोः कालात् शारदा नाम्नी वार्षिकी पत्रिका प्रतिवर्षं प्राकाश्यं नीयते । तदैषमोपि शारदा पत्रिका विदुषाम् अध्यापकानां विविदिषूणां छात्राणां संस्कृत-कन्नड-हिन्दी-आङ्ग्लभाषासुगुम्फितैः शास्त्रीय-लौकिकविज्ञानविषयपूर्णैः लेखैः सम्भूषिता वर्तते । अस्याः शारदापत्रिकायाः प्रकाशनार्थम् अनुमतवद्भ्यः प्रकाशनकर्मणि प्रतिपदं सुनिपुणं मार्गदर्शनं कृतवद्भ्यः परिसरप्राचार्येभ्यः **आचार्य ए. पि. सच्चिदानन्दवर्येभ्यः** सनमोवाकं कार्तज्ञ्यं वितन्महे । अस्याः प्रकाशने वित्तव्यवस्थां समायोज्य शुभसन्देशं प्रदातृभ्यः राष्ट्रियसंस्कृतसंस्थानस्य **कुलपतिभ्यः आचार्य परमेश्वरनारायणशास्त्रिभ्यः, कुलसचिवेभ्यः आचार्य सुब्रह्मण्यवर्येभ्यः** प्रणामान् समर्पयामः । लेखान् दत्त्वा पत्रिकायाः स्वरूपसम्पादन उपकृतवद्भ्योऽध्यापकेभ्यः छात्रेभ्यश्च धन्यवादान् वितरामः । पत्रिकायाः संपादने कृतमहोद्यमेभ्यः सङ्गणकप्राध्यापकेभ्यः श्री रवीशवर्येभ्यः कृतज्ञताः व्याहरामः। एतत्परिसरसर्वतोमुखसंवर्धने कारणभूतानां निरवग्रहानुग्रहप्रदातॄणां प्रातस्स्मरणीयानां **जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां जगद्गुरूणां श्री श्री विधुशेखरभारतीमहास्वामिनां** च चरणसरोजेषु सभक्तिश्रद्धं साष्टाङ्गप्रणतिततीः समर्पयामः।

विकारिफाल्गुणपूर्णिमा
09.03.2020

**विद्वज्जनविधेयाः**
डा. सि. हेच्. कृष्णानन्तपद्मनाभम्
डा. श्रीकर्. जी. एन्.
डा. विश्वनाथ हेगडे

## नव्यव्याकरणविभागः


प्रो. हरिनारायणतिवारि
विभागाध्यक्षः


डा. चन्द्रशेखरभट्टः
सहायकाचार्यः


डा. सि. हेच्. के. पद्मनाभम्
सहायकाचार्यः


डा. प्रमोदभट्टः
सहायकाचार्यः


विद्वान् अरुणभट्टः
प्राध्यापकः

## मीमांसाविभागः


प्रो. सुब्राय वि. भट्टः
विभागाध्यक्षः


प्रो. सूर्यनारायणभट्टः
आचार्यः


डा. वेङ्कटेशताताचार्यः
सहायकाचार्यः

## नव्यन्यायविभागः


प्रो. का. इ. मधुसूदनः
विभागाध्यक्षः


डा. श्यामसुन्दरः ए.
प्राध्यापकः


डा. आर्. नवीनः
प्राध्यापकः

## अद्वैतवेदान्तविभागः


डा. गणेश ईश्वर भट्टः
विभागाध्यक्षः


डा. विश्वनाथहेगडे
सहायकाचार्यः


विद्वान् निरञ्जनभट्टः
प्राध्यापकः

# साहित्यविभागः



डा. राघवेन्द्रभट्टः
विभागाध्यक्षः



डा. चन्द्रकला आर्. कोण्डी
सहायकाचार्या



डा. कोम्पेल्लि विनयकुमारः
सहायकाचार्यः



डा. एम्. श्रीनिवासमूर्तिः
प्राध्यापकः



विद्वान् श्रीकरः वि.
प्राध्यापकः

# फलितज्यौतिषविभागः



डा. रतन् कुमार पाण्डेयः
विभागाध्यक्षः



डा. मुरलीकृष्णः टि.
प्राध्यापकः



डा. प्रसादभट्टः
प्राध्यापकः



डा. प्रदीपशर्मा
प्राध्यापकः

# आधुनिकविषयविभागः



डा. ओमप्रकाश साहनी
सहायकाचार्यः (हिन्दी)



डा. प्रभाकरः एम्. ए.
प्राध्यापकः (इतिहासः)



डा. कविता एस्.
प्राध्यापिका (कन्नडभाषा)



श्रीमती बबिता बहुगुणा
प्राध्यापिका (हिन्दी)



श्रीमती पावना एम्. एन्.
प्राध्यापिका (आङ्ग्लभाषा)



श्री रामचन्द्र हेच्. डि.
प्राध्यापकः (क्रीडा)



श्री शशिधरः के. वि.
प्राध्यापकः (सङ्गणकम्)



श्री रवीशः एन्.
प्राध्यापकः (सङ्गणकम्)

# शिक्षाविभागः


डा. चन्द्रकान्तः
विभागाध्यक्षः


प्रो. गौराङ्ग बाघः
आचार्यः


डा. रामचन्द्रुल बालाजि
सहाचार्यः


डा. गणेश ति. पण्डितः
सहायकाचार्यः


डा. नारायणवैद्यः
सहायकाचार्यः


डा. अरविन्दकुमार सोमदत्तः
सहायकाचार्यः


डा. दयानिधिशर्मा
सहायकाचार्यः

# पदविकापाठ्यप्रणाली
## (Diploma Course)


डा. रमानन्दभट्टः एन्.
ज्यौतिषप्राध्यापकः


डा. सुधांशुकुमारनन्दः
वास्तुप्राध्यापकः

# मुक्तस्वाध्यायपीठम्
## (Institute of Distance Education)


श्री कु. वेङ्कटेशमूर्तिः
समन्वयकः


श्री सन्दीपकुमारः एस्. आर्.
एम्. टि. एस्. (औ. सो)

# ग्रन्थालयः


श्री आकाश बाबु जैन्
सहायक ग्रन्थपालकः


श्री दिनेशः एस्.
एम्. टि. एस्.


श्रीमती सिद्दम्मा
एम्. टि. एस्.


श्री मोहम्मद् रफीक्
एम्. टि. एस्.


श्रीमती शारदा एस्. आर्.
डी. ई. ओ. (औ. सो)


श्रीमती शुभा
एम्. टि. एस्. (औ. सो)

# वाग्वर्धिनीपरिषत् २०१९-२०



डा. सि. हेच्. के. पद्मनाभम्
सहायकाचार्यः



डा. श्रीकरः जि. एन्.
सहायकाचार्यः



डा. विश्वनाथहेगडे
सहायकाचार्यः

## परिषत्सदस्याः



शरण्यः पि.
कार्यदर्शी



सुजना वाल्ताजे
कार्यदर्शिनी



श्रीगणेश वि. भट्टः
स्पर्धिष्णुपरिषत्कार्यदर्शी



महेशः पि. देवते
स्पर्धिष्णुपरिषत्कार्यदर्शी



त्रिदला ई. जि.
स्पर्धिष्णुपरिषत्कार्यदर्शिनी



सुदर्शनः एम्. एस्.
स्पर्धिष्णुपरिषत्कार्यदर्शी



प्रदीपभट्टः के.
पत्रिकाकार्यदर्शी



मनोजः एम्. भट्टः
पत्रिकाकार्यदर्शी



गणेशः आर्. भट्टः
पत्रिकाकार्यदर्शी



अपर्णा होळ्ळा के. ए.
पत्रिकाकार्यदर्शिनी



गीताञ्जली माळवे
पत्रिकाकार्यदर्शिनी



ऐश्वर्या एन्. के.
सांस्कृतिककार्यदर्शिनी



मृत्युञ्जय सदानन्द शास्त्री
सांस्कृतिककार्यदर्शी



कवितादेवी
क्रीडाकार्यदर्शिनी



सञ्जयकुमारसाहू
क्रीडाकार्यदर्शी



तिलकरामः
क्रीडाकार्यदर्शी



विनय दत्तात्रेय हेगडे
शारदाप्रसादवितरणम्



श्रीपतिः एस्. पि.
शारदाप्रसादवितरणम्


श्रीधरः एन्. एन्.
शारदाप्रसादवितरणम्


नागारजमय्यः
भूमिकानिर्वहणम्


सुमना एन्. भट्टः
भूमिकानिर्वहणम्


हरिप्रिया आर्. कुलकर्णी
भूमिकानिर्वहणम्


मञ्जुनाथः जि. हेगडे
भूमिकानिर्वहणम्


गणेशकुमारः पि.
भूमिकानिर्वहणम्

## कक्ष्याप्रतिनिधयः


एम्. महेशकुमारः
आचार्यद्वितीयवर्षम्


सौजन्या के. के.
आचार्यद्वितीयवर्षम्


चण्डीप्रसादः
आचार्यप्रथमवर्षम्


भिण्डे देवांशि शैलेश
आचार्यप्रथमवर्षम्


उमाकान्तजोशी
शिक्षाशास्त्रिद्वितीयवर्षम्


मधुस्मिता राउत
शिक्षाशास्त्रिद्वितीयवर्षम्


गिरीशभट्टः
शिक्षाशास्त्रिप्रथमवर्षम्


छाया गडदे
शिक्षाशास्त्रिप्रथमवर्षम्


शशाङ्क शिवराम भट्टः
शास्त्रितृतीयवर्षम्


यशस्विनी एस्. हेगडे
शास्त्रितृतीयवर्षम्


श्रीवासः जि. भट्टः
शास्त्रिद्वितीयवर्षम्


सुजाता साहू
शास्त्रि द्वितीयवर्षम्


गणेश्वरः साहू
शास्त्रिप्रथमवर्षम्


भावना एस्. वै.
शास्त्रिप्रथमवर्षम्


हेच्. वी. सत्यप्रमोदः
प्राक्-शास्त्रिद्वितीयवर्षम्


श्रीनिधिः एम्. भट्टः
प्राक्-शास्त्रिद्वितीयवर्षम्


सुधन्वा आर्.
प्राक्-शास्त्रिप्रथमवर्षम्


आर्. श्रीविद्या स्वर्णमाल्या
प्राक्-शास्त्रिप्रथमवर्षम्

# विविधपरिषदां संयोजकाः

## वाक्यार्थपरिषत्



प्रो. हरिप्रसादः के.
आचार्यः, शिक्षाविभागः



प्रो. गौराङ्ग बाघः
आचार्यः, शिक्षाविभागः



श्री श्रीकरः वि.
प्राध्यापकः, साहित्यविभागः

## श्रीशारदाविशिष्टव्याख्यानमाला



डा. गणेश ईश्वर भट्टः
अद्वैतवेदान्तविभागाध्यक्षः



डा. नारायणवैद्यः
सहायकाचार्यः, शिक्षाविभागः

## स्पर्धिष्णुपरिषत्



प्रो. नवीनहोळ्ळः
आचार्यः, न्यायविभागः



डा. रमानन्दभट्टः एन्.
प्राध्यापकः, ज्यौतिषडिप्लोमा



श्री अरुणभट्टः
प्राध्यापकः, व्याकरणविभागः

## क्रीडासमितिः



डा. चन्द्रकान्तः
शिक्षाविभागाध्यक्षः



श्री रामचन्द्रः हेच्. डि.
क्रीडाप्राध्यापकः

## सांस्कृतिकसमितिः



डा. राघवेन्द्रभट्टः
साहित्यविभागाध्यक्षः



डा. कु. वेङ्कटेशमूर्तिः
समन्वयकः, मुक्तस्वाध्यायपीठम्



डा. कोम्पेल्ली विनयकुमारः
सहायकाचार्यः, साहित्यविभागः



डा. प्रसादभट्टः
प्राध्यापकः, ज्यौतिषविभागः

## विद्यावारिधि-उपाधिप्राप्तिः



श्रीमती सुनिता भट्

शास्त्रम्
नव्यन्यायः

मार्गदर्शकः
आचार्यः नवीनहोळ्ळः



श्री नागेशभट्टः

शास्त्रम्
साहित्यम्

मार्गदर्शकः
डा. रामचन्द्रजोयीसः



श्री मधुकेश्वरशास्त्री

शास्त्रम्
साहित्यम्

मार्गदर्शकः
डा. चन्द्रकान्तः



श्री प्रसन्नहेगडे

शास्त्रम्
मीमांसा

मार्गदर्शकः
आचार्यः सुब्राय वि. भट्टः



श्री सुब्रह्मण्यभट्टः

शास्त्रम्
ज्यौतिषम्

मार्गदर्शकः
आचार्यः ईश्वरभट्टः



श्री कुलदीपः

शास्त्रम्
ज्यौतिषम्

मार्गदर्शकः
आचार्यः ए. पि. सच्चिदानन्दः



श्री विद्याशेखरः

शास्त्रम्
मीमांसा

मार्गदर्शकः
आचार्यः सुब्राय वि. भट्टः



श्री महेशभट्टः आर्.

शास्त्रम्
साहित्यम्

मार्गदर्शकः
डा. राघवेन्द्रभट्टः



श्री रामकृष्णः

शास्त्रम्
ज्यौतिषम्

मार्गदर्शकः
आचार्यः ए. पि. सच्चिदानन्दः



श्री रामचन्द्रभट्टः

शास्त्रम्
वेदः

मार्गदर्शकः
आचार्यः महाबलेश्वर पि. भट्टः



श्री आनन्दपाण्ड्य

शास्त्रम्
नव्यव्याकरणम्

मार्गदर्शकः
आचार्यः सि. एस्. एस्. एन्. मूर्तिः



श्री नारायण बि. राय्करः

शास्त्रम्
नव्यन्यायः

मार्गदर्शकः
आचार्यः नवीनहोळ्ळः



श्री प्रशान्तगाँव्करः

शास्त्रम्
मीमांसा

मार्गदर्शकः
आचार्यः सूर्यनारायणभट्टः



कु. प्रियाङ्काचन्द्रः

शास्त्रम्
शिक्षाशास्त्रम्

मार्गदर्शकः
डा. आर्. बालाजी



श्री सौरभदुबे

शास्त्रम्
साहित्यम्

मार्गदर्शकः
डा. राघवेन्द्रभट्टः



श्री राजेन्द्रभट्टः

शास्त्रम्
नव्यव्याकरणम्

मार्गदर्शकः
डा. चन्द्रशेखरभट्टः



श्री नवीनभट्टः

शास्त्रम्
साहित्यम्

मार्गदर्शकः
आचार्यः हरिप्रसादः के.



श्री विनयः हेच्. वि.

शास्त्रम्
साहित्यम्

मार्गदर्शिका
डा. चन्द्रकला आर्. कोण्डी

## परिसरीयविविधशैक्षिकपुरस्कारराशिः



**आयुष्मती पार्वती वी. जे.**
(वेदान्तशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीगुरुकृपापुरस्कारः
वेदान्तकेसरी ब्रह्मश्री के. एन्. नारायणभट्ट पुरस्कारः
श्रीमती कावेरम्मा पुरस्कारः



**आयुष्मान् अश्विन् जि. भट्टः**
(नव्यव्याकरणशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः )

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मा पुरस्कारः



**आयुष्मान् महेन्द्र महाबलेश्वर भट्टः**
( नव्यन्यायशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मा पुरस्कारः



**आयुष्मान् प्रदीपभट्टः के.**
( मीमांसाशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मा पुरस्कारः

---



**आयुष्मान् राजेशः आर्. एस्.**
(फलितज्यौतिषशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः )

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः



**आयुष्मान् हरिप्रसादः एस्.**
(साहित्यशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः )

श्रीश्रीभारतीतीर्थस्वर्णपदकम्

---



**आयुष्मती क्षमा कामत् के.**
(नव्यन्यायशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः
श्री बि. जि. शेषगोपालपुरस्कारः



**आयुष्मान् वेदप्रकाश पाठक्**
(फलितज्यौतिषशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः
श्रीमती ललितम्मास्मारकपुरस्कारः

---



**आयुष्मती जोशी सुमा सुब्रायः**
(साहित्यशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः



**आयुष्मती कीर्तिः एन्. हेगडे**
( नव्यव्याकरणशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः

---



**आयुष्मान् गिरीशभट्टः**
(नव्यव्याकरणशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः



**आयुष्मान् नवीनः डि. हेगडे**
(वेदान्तशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरीपुरस्कारः

---



**आयुष्मान् विजेन्द्र पारिक्**
(मीमांसाशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मा पुरस्कारः



**आयुष्मान् नीरज् पन्त**
(शिक्षाशास्त्रे अत्यधिकाङ्काः)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्



**आयुष्मती ज्योत्स्नापूर्णयामिनी**
(प्राक्-शास्त्रिस्तरे अत्यधिकाङ्का:)

श्रीश्रीभारतीतीर्थस्वर्णपदकम्
श्रीमहाबलभिडेस्मारकपुरस्कारः



**आयुष्मती प्रियतमा सेती**
(शिक्षाशास्त्रिस्तरे अत्यधिकाङ्का:)

शिक्षाशास्त्रिस्तरे श्री वेङ्कटेश्वरपुरस्कारः

## शृङ्गेरीकुलपतिशङ्करनारायणजोयीसपुरस्कारः



श्री सुब्रह्मण्यभट्टः



श्री कुलदीपः



श्री रामकृष्णः

## प्रातिभवैभवम्



### श्रीगणेश विश्वेश्वर भट्टः
आचार्यद्वितीयवर्षम्

राष्ट्रस्तरे वेदभाष्यभाषणे प्रथमः, समस्यापूर्तौ तृतीयः ।
तिरुपतौ प्रातिभसमारोहे समस्यापूर्तौ प्रथमः, नाटके द्वितीयः,
वेदभाष्यभाषणे तृतीयः ।
एकादशे युवमहोत्सवे सुभाषितकण्ठपाठे प्रथमः, आशुभाषणे द्वितीयः ।
राज्यस्तरे वेदभाष्यभाषणे प्रथमः ।



### मृत्युञ्जय सदानन्द शास्त्री
आचार्यप्रथमवर्षम्

तिरुपतौ प्रातिभसमारोहे एकपात्राभिनये प्रथमः, नाटके द्वितीयः ।
सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमः ।
एकादशे युवमहोत्सवे एकपात्राभिनये प्रथमः, रङ्गवल्ल्यां तृतीयः ।



### नवीन के. आर्.
आचार्यद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे साङ्ख्ययोगभाषणे प्रथमः, स्फूर्तिस्पर्धायां
तृतीयः, न्यायभाषणे सान्त्वनपुरस्कारः ।
राष्ट्रस्तरे साङ्ख्ययोगभाषणे तृतीयः ।
राज्यस्तरे साङ्ख्ययोगभाषणे प्रथमः, स्फूर्तिस्पर्धायां द्वितीयः ।



### शरण्यः पि.
आचार्यद्वितीयवर्षम्

एकादशे युवमहोत्सवे गद्यरचनायां प्रथमः ।
तिरुपतौ प्रातिभसमारोहे साहित्यभाषणे द्वितीयः, नाटके द्वितीयः,
स्फूर्तिस्पर्धायां तृतीयः, समस्यापूर्तौ सान्त्वनपुरस्कारः ।
राज्यस्तरे साहित्यशलाकायां द्वितीयः, स्फूर्तिस्पर्धायां द्वितीयः ।



### गीता वी. भट्टः
शास्त्रितृतीयवर्षम्

राष्ट्रस्तरे पुराणेतिहासशलाकायां प्रथमा ।
एकादशे युवमहोत्सवे एककसंस्कृतगीते द्वितीया, समूहगाने द्वितीया ।
राज्यस्तरे पुराणेतिहासशलाकायां प्रथमा ।



### विवेक त्रिपाठी
शास्त्रितृतीयवर्षम्

राष्ट्रस्तरे ज्यौतिषशलाकायां प्रथमः ।
तिरुपतौ प्रातिभसमारोहे जौतिषभाषणे द्वितीयः ।
राज्यस्तरे ज्यौतिषशलाकायां प्रथमः ।



### शशाङ्क शिवराम भट्टः
शास्त्रितृतीयवर्षम्

राष्ट्रस्तरे जैनबौद्धभाषणे द्वितीयः ।
राज्यस्तरे जैनबौद्धभाषणे प्रथमः ।
स्वर्णवल्ल्यां न्यायभाषणे प्रथमः, साङ्ख्ययोगभाषणे प्रथमः,
समस्यापूर्तौ तृतीयः ।



### गोविन्द गोपालकृष्ण हेगडे
विद्यावारिधिः

राष्ट्रस्तरे शास्त्रार्थविचारे विशिष्टश्रेणी ।
राज्यस्तरे शास्त्रार्थविचारे द्वितीयः ।



## आदर्श विनायक भट्टः
आचार्यद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे मीमांसाभाषणे प्रथमः, नाटके द्वितीयः,
पुराणेतिहासभाषणे सान्त्वनपुरस्कारः ।
राज्यस्तरे मीमांसाभाषणे द्वितीयः ।



## ऐश्वर्या
आचार्यद्वितीयवर्षम्

राष्ट्रस्तरे व्याकरणशलाकायां द्वितीया ।
राज्यस्तरे व्याकरणशलाकायां प्रथमा ।



## सुदर्शनः एम्. एस्.
शास्त्रितृतीयवर्षम्

एकादशे युवमहोत्सवे सहगणकीयसंस्कृते प्रथमः, अनुवादस्पर्धायां तृतीयः ।
राज्यस्तरे धर्मशास्त्रभाषणे तृतीयः ।



## दत्तात्रेय हेगडे
आचार्यप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमः ।
तिरुपतौ प्रातिभसमारोहे नाटके द्वितीयः ।



## अम्बिका भट्टः ए.
शास्त्रिप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमा ।
तिरुपतौ प्रातिभसमारोहे नाटके द्वितीया ।



## ऐश्वर्या एन्. के.
आचार्यद्वितीयवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमा ।
तिरुपतौ प्रातिभसमारोहे नाटके द्वितीया ।



## महेश प्रकाश देवते
आचार्यद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे नाटके द्वितीयः ।
राज्यस्तरे धर्मशास्त्रभाषणे द्वितीयः ।



## एम्. महेशकुमारः
आचार्यद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे व्याकरणभाषणे तृतीयः ।
राज्यस्तरे व्याकरणभाषणे द्वितीयः ।



## श्रीप्रद महाबलेश्वर जोशी
आचार्यप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमः ।
एकादशे युवमहोत्सवे 400 Mtr धावने द्वितीयः ।



## गणेश ति. भट्टः
शिक्षाशास्त्रिप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमः ।
एकादशे युवमहोत्सवे Volleyball द्वितीयः ।



## ग्रीष्मा रै बि.
आचार्यप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमा ।
एकादशे युवमहोत्सवे समूहगाने द्वितीया ।



## काव्या बि. एम्.
शिक्षाशास्त्रिप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमा ।
एकादशे युवमहोत्सवे समूहगाने द्वितीया ।



## रजत भट्टः
शिक्षाशास्त्रिप्रथमवर्षम्

सप्तदशे कौमुदीमहोत्सवे सैरन्ध्रीनाटके प्रथमः ।



## महेश चिदम्बर भट्टः
शास्त्रितृतीयवर्षम्

राज्यस्तरे मीमांसाशलाकायां द्वितीयः ।
स्वर्णवल्ल्यां मीमांसाभाषणे प्रथमः ।

# सप्तदशे कौमुदीमहोत्सवे 'सैरन्ध्री' नाटके प्रथमपुरस्कारभाजः छात्राः



रविशङ्करभट्टः के. एस्.
विद्यावारिधिः



सुजना वाल्ताजे
आचार्यद्वितीयवर्षम्



मोहम्मद् जसील्
आचार्यद्वितीयवर्षम्



मयूरेश मराठे
आचार्यप्रथमवर्षम्



कार्तिकेशः के.
शिक्षाशास्त्रिप्रथमवर्षम्



गोपिका एस्. के.
शिक्षाशास्त्रिप्रथमवर्षम्



विवेक उडुपः के.
शिक्षाशास्त्रिप्रथमवर्षम्



प्रसन्नः पि. हेगडे
शिक्षाशास्त्रिप्रथमवर्षम्



प्रशान्तः आर्. गाँव्कर
शिक्षाशास्त्रिप्रथमवर्षम्



प्रदीपभट्टः के.
शिक्षाशास्त्रिप्रथमवर्षम्



नरसिंह सरस्वती शास्त्री
शिक्षाशास्त्रिप्रथमवर्षम्



प्रसीदरञ्जनः
शास्त्रितृतीयवर्षम्



गणेश रामु भट्टः
शास्त्रितृतीयवर्षम्



विष्णुः ए. एस्.
शास्त्रितृतीयवर्षम्



आनन्दकृष्णः एम्. एस्.
शास्त्रितृतीयवर्षम्



मञ्जुनाथः जि. हेगडे
शास्त्रिद्वितीयवर्षम्



प्रज्वलः ए. जोशी
शास्त्रिद्वितीयवर्षम्



अपर्णा होळ्ळा के. ए.
शास्त्रिद्वितीयवर्षम्



सहना एस्. देसाई
शास्त्रिद्वितीयवर्षम्



प्रवीण हेगडे
शास्त्रिप्रथमवर्षम्



नागराज मय्यः
आचार्यद्वितीयवर्षम्
तिरुपतौ प्रातिभसमारोहे नाटके
द्वितीयः



नागरत्ना भट्टः
शास्त्रिप्रथमवर्षम्
तिरुपतौ प्रातिभसमारोहे नाटके
द्वितीया

## एकादशे महोत्सवे पुरस्कारभाजः छात्राः

### Volley Ball क्रीडायां द्वितीयस्थानभाजः छात्राः



सतीश भट्टः
आचार्यप्रथमवर्षम्



श्रीपतिः एस्. पि.
शास्त्रितृतीयवर्षम्



महालिङ्गय्य मठपतिः
शास्त्रिद्वितीयवर्षम्



निरञ्जनः हेच्. भट्टः
शास्त्रिद्वितीयवर्षम्



शशिकान्त छलवादी
शास्त्रिद्वितीयवर्षम्



रावुत् वग्गर्
प्राक्-शास्त्रिद्वितीयवर्षम्



षण्मुखः पि.
शास्त्रितृतीयवर्षम्
Long Jump द्वितीयः



महेश भाग्वार्
शास्त्रितृतीयवर्षम्
योगासने द्वितीयः



निरञ्जन भट्टः
शास्त्रिप्रथमवर्षम्
समूहगाने द्वितीयः



वेदप्रभा
प्राक्-शास्त्रिप्रथमवर्षम्
400Mtr धावने द्वितीया



त्रिदला ई. जि.
आचार्यप्रथमवर्षम्
सुभाषितकण्ठपाठे तृतीया



मुकुल् राय्
शिक्षाशास्त्रिप्रथमवर्षम्
Shot-Put तृतीयः

## परिसरे प्रवृत्तानां विविधकार्यक्रमाणां चित्राणि



राष्ट्रपतिपुरस्कार पुरस्कृताः महामहोपाध्यायाः श्री सो. ति. नागराजवर्याः तत्प्रशस्तिप्रापणेन पुरस्क्रियन्ते ।



विविधपरिषदाम् उद्घाटनं कुर्वाणाः आचार्याः रवीन्द्रमूळेवर्याः



संस्कृतोत्सवसन्दर्भे अनुग्रहभाषणे श्री श्री विधुशेखरभारती श्रीचरणाः




शिक्षकदिवसे सम्मान्यमानाः आचार्य के. हरिदास-उपाध्यायाः




शिक्षकदिवसे सम्मान्यमानाः श्री टि. कृष्णमूर्तिमहोदयाः




हिन्दीदिवसोत्सवे अतिथिभाषणे श्रीमती ज्योतीकाकत्कर् वर्या




एकतादिवसकार्यक्रमे अभ्यागतभाषणे श्री गुरुमूर्तिमहोदयाः




कन्नडराज्योत्सवकार्यक्रमे सारस्वतभाषणे श्री रमेश बेगार् वर्याः




राष्ट्रियशिक्षादिवसे भाषमाणाः श्री कृष्णमूर्तिहेगडेवर्याः




न्यायाङ्गात् प्रजाभ्यः लभ्यमानसाहाय्यम् उद्बोधयन्त्यः
न्यायाधीशाः अनितावर्याः




मुक्तस्वाध्यायपीठस्य कार्यशालायां तत्त्वरूपं विवृण्वन्तः
मुक्तस्वाध्यायपीठस्य निदेशकाः आचार्याः सुकान्तकुमारसेनापतिमहोदयाः



द्विदिवसीयमीमांसाराष्ट्रियसङ्गोष्ठीम् उद्घाटयन्तः डा. मणिद्राविडशास्त्रिणः

# अनुक्रमणिका

## संस्कृतविभागः


| | | |
|---|---|---|
| यागहोमविवेकः | आचार्यः सुब्राय वि. भट्टः | 01 |
| कार्यसामान्यस्य बीजप्रयोजनाभ्याम् अविनाभावः | आचार्यः नवीनहोळ्ळः | 04 |
| आयोगेषु संस्कृतशिक्षकाणां स्थितिः सर्वकारस्य समर्थनञ्च | आचार्यः गौराङ्ग बाघः | 07 |
| आख्यातवाच्यत्वविवेकः | आचार्यः सूर्यनारायणभट्टः | 12 |
| समावेशितशिक्षायाः स्वरूपविमर्शः | डा. चन्द्रकान्तः | 18 |
| सिद्धान्तलेशसङ्ग्रहे समुद्धृताः अप्रसिद्धाः ग्रन्थकाराः | डा. गणेश ईश्वर भट्टः | 22 |
| न कर्मधारयान्मत्वर्थीयः | डा. चन्द्रशेखरभट्टः | 27 |
| भक्तिमार्गे यक्षगानस्य स्थानम् | डा. राघवेन्द्रभट्टः | 30 |
| समालङ्कारः | डा. चन्द्रकला आर्. कोण्डी | 41 |
| रसशास्त्रपरिचयः | विद्वान् कू. वेङ्कटेशमूर्तिः | 47 |
| संस्कृतप्रचारदृष्ट्या संस्कृतशोधकार्याणां क्रियान्वयनोपायाः | डा. गणेश ति. पण्डितः | 52 |
| विरोधाधिकरणम् | डा. एस्. वेङ्कटेशताताचार्यः | 55 |
| शान्तेः स्रोतांसि | डा. नारायण वैद्य | 59 |
| शैक्षिकरूपेण दुर्बलबालकाः | डा. अरविन्दकुमारसोमदत्तः | 63 |
| विप्राणां भक्ष्याभक्ष्यविचारः | डा. दयानिधि शर्मा | 65 |
| काव्यविशेषोपादानविवेचनम् | डा. कोम्पेल्लि विनयकुमारः | 67 |
| श्राद्धतिथिनिर्णयः | डा. प्रमोद भट्टः | 74 |
| अज्ञानलक्षणम् | डा. विश्वनाथ हेगडे | 79 |
| बाधास्थानानि | डा. मुरलिकृष्णः टि. | 83 |
| ख्यातिवादः | डा. श्यामसुन्दरः ए. | 87 |



ISSN: 2320-740X

| | | |
|---|---|---|
| न्यायभाष्यवार्तिकानुसारेण संशयलक्षणविचारः | डा. नवीनः आर्. | 90 |
| मलमासः | डा. प्रसाद भट्टः | 93 |
| समासस्तु चतुर्धेति प्रायोवादः | विद्वान् अरुणभट्टः | 96 |
| भूकम्पविज्ञानम् | डा. प्रदीपशर्मा | 100 |
| रघुवंशमहाकाव्ये संस्काराणाम् उल्लेखः | डा. श्रीकरः वि. | 107 |
| श्री गणेशोत्तरतापिन्युपनिषदुक्तं गणेशतत्त्वम् | विद्वान् निरञ्जनभट्टः | 110 |
| भूभ्रमणम् | डा. रमानन्द भट्टः एन्. | 114 |
| प्रश्नशास्त्रोक्तश्वासविचारप्रक्रिया | डा. सुधांशुकुमारनन्दा | 118 |
| भीष्म श्रीकृष्णयोः व्यक्तित्व समालोचनम् | डा. एम्. श्रीनिवासमूर्ति | 122 |
| तस्य द्वादशशतं दक्षिणा इति वाक्यविचारः | श्री जगदीशः एस्. एम्. | 125 |
| वाचोयुक्तीनां शब्दार्थविषयिणी जिज्ञासा | श्रीउमामहेश्वरः एन्. | 126 |
| गृहदेवालयादिनिर्माणे चत्वारः शिल्पिनः | श्री गणेशकृष्णभट्टः | 129 |
| रसमूलतावादस्य विविधानां पक्षाणां पर्यवेक्षणम् | श्री ब्रजेशकश्यपः | 133 |
| त्रिस्कन्धात्मकं ज्योतिश्शास्त्रम् | श्री गणेशभट्टः | 141 |
| कालिदासमहाकाव्ययोः कविसमयपोषितः उत्प्रेक्षालङ्कारः | श्री सूर्यहेब्बारः ए. | 145 |
| अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरत् | श्री गणेशप्रसादः के.एस्. | 149 |
| अद्वैतसिद्धिग्रन्थे प्रथममिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां न्यायशास्त्रदृष्ट्या परिशीलनम् | वाणी मञ्जुनाथ हेगडे | 150 |
| काव्यादर्शे उपमाविवेचनम् | श्री नारायन सामाइ | 155 |
| विद्यामाधवः तस्य व्याख्यानपद्धतिश्च | कु. सौन्दर्यलक्ष्मीः | 158 |
| अद्वैतवेदान्ते जाग्रदाद्यवस्थानां निरुपणम् | श्री सुदर्शन भट्टः | 160 |
| न्यायशास्त्रानुसारं परिमाणविचारः | श्री जनार्दन सुवेदी | 163 |
| शब्दशक्तिमूलध्वनौ द्वितीयार्थोऽभिधाविषयः भवति उत न? | श्री पङ्कजभट्टः | 165 |

| | | |
|---|---|---|
| व्यापारमुख्यविशेष्यकशाब्दबोधविचार: | कु. योगिता छत्रे | 169 |
| अपभ्रंशेषु शक्तिविचारः | श्री प्रमोदः जि. के. | 174 |
| निरुक्तशास्त्रे व्याकरणस्य भूमिका | कु. श्रीगणेश विश्वेश्वर भट्टः | 180 |
| अभिज्ञानशाकुन्तले काव्यप्रयोजनानि | कु. शरण्यः पि. | 183 |
| संस्काराद् द्विज उच्यते | कु. महेश प्रकाश देवते | 185 |
| विभक्त्यर्थस्य विभक्त्यर्थान्तरान्वयविचारः | कु. देवीकृष्णा | 189 |
| काव्यप्रकाशकारेणोक्तं रससस्वरूपम् | कु. सावित्रीदास् | 191 |
| नहि सत्यात्परो धर्मः | कु. चण्डीप्रसादः | 192 |
| वेदाः, तेषु साहित्यगणिते | कु. गिरीशभट्टः | 193 |
| विवर्तवादः | कु. दवे गौतमकुमारः | 196 |
| भारतीयसंस्कृतेः महत्त्वम्। | कु. श्वेता विष्णु भट्टः | 199 |
| वेदान्तपरिभाषादिशा ज्ञानगतप्रत्यक्षत्वप्रयोजकविचारः | कु. लोकनाथपण्डा | 201 |
| व्यायामः | कु. महेशबाघ्वारः | 209 |
| व्यधिकरणग्रन्थोक्तदिशा प्रथमस्वलक्षणे यावत्पदसार्थक्यविचारः | कु. शशाङ्कभट्टः | 210 |
| न्यायभाष्ये दुःखजन्मप्रवृत्तीत्यादिसूत्रविचारः | कु. सी. हेच्. दुर्गा | 212 |
| णिच्यच आदेशो न स्यात् द्वित्वे कार्ये | कु. सुदर्शन एम्. एस्. | 216 |
| ताजिकशात्रोक्तः वर्षप्रवेशनिर्णयः | कु. रञ्जन कंस्रालि | 219 |
| शुनकस्य विश्वासः | कु. साई श्रेया एस्. जी. | 222 |
| रामायणम् | कु. सञ्जीब कुमार साहू | 222 |


## हिन्दीविभागः


| | | |
|---|---|---|
| सिनेमा और साहित्य का सामाजिक सरोकार | डा. ओमप्रकाश साहनी | 225 |
| भाषा | श्रीमती बबीता बहुगुणा | 230 |

| | | |
|---|---|---|
| एक नयी शुरुआत | कु. चन्द्रशेखर चिनरा | 233 |
| हे भारत के राम ! जगो.. | कु. दीप्तेशः | 234 |
| मोबाइल फोन | चित्तरञ्जन पधान | 236 |
| शिक्षा,नीति,पुराणादि के अनुसार स्नान निर्णय | कु. विनय कुमार शुक्ल | 238 |
| क्या मैं शिक्षित हूँ ? | कु. मिन्सु बगर्ति | 241 |
| माता-पिता | कु. चैत्रा हेगडे | 242 |
| छुट्टियों का सदुपयोग | कु. स्नेहलता बेहेरा | 243 |


## English Section


| | | |
|---|---|---|
| The Nyaya-Vaisheshika View of Super Normal Perceptions | Dr. R. Balaji | 245 |
| Computers to assist in Teaching and Learning | Sri K.V. Shashidhar | 250 |
| Cryptography | Sri Raveesha N. | 254 |
| Yoga and Yogasana | Sri Ramachandra H. D. | 259 |
| Akinwale Oluwole Wole Soyinka | Smt. Pavana M. N. | 269 |
| Benefits of Sitting on the Floor | Naveen K. R. | 273 |
| LET'S MAKE A NEW INDIA | Udayanath Padhan | 277 |
| A Tribute to the Bravery of Our Army | Manaswini K. G. | 279 |


## ಕನ್ನಡ ವಿಭಾಗ


| | | |
|---|---|---|
| ಸಾಹಿತ್ಯದ ಸಿಂಗಾರ: ಶೃಂಗಾರಾರ್ಣವಚಂದ್ರಿಕಾ | ಡಾ.ರಾಘವೇಂದ್ರ ಭಟ್ | 281 |
| ಕಾಲಪ್ರವಾಹ | ಡಾ. ಕವಿತಾ ಎಸ್. | 284 |
| ಪ್ರಕೃತಿಯ ಮೇಲಿನ ಮಾನವನ ದಬ್ಬಾಳಿಕೆ | ಡಾ. ಎಮ್. ಎ. ಪ್ರಭಾಕರ | 291 |
| ಇರುವುದೊಂದೇ ಭೂಮಿ ರಕ್ಷಿಸೋಣ ಬನ್ನಿ | ಪ್ರವೀಣ ಸಂದಿಮನಿ | 295 |
| ಬಾಳಪಥ | ಸ್ವಾತಿ ಭಟ್ | 298 |


**********

# संस्कृतविभागः

# यागहोमविवेकः

**आचार्यः सुब्राय वि. भट्टः**
मीमांसाविभागाध्यक्षः

लोके सर्वेषां मनुष्याणां जीवनोद्देश्यमस्ति सुखम् । पुरुषैः अर्थ्यमानः सुखविशेषः चतुर्धा विभक्तः धर्मार्थकाममोक्षभेदेन । तत्रापि आद्यास्त्रयः साधनभूताः चतुर्थस्तु मोक्षः साध्य इति स एव परमपुरुषार्थ इति सर्वेषामास्तिकदर्शनानां सर्वसम्मतः सिद्धान्तः । तस्य च मोक्षस्य अभ्यर्हिततमं साधनं भवति धर्मः । धर्मे प्रमाणन्तु वेद एव । तदुक्तं मनुना "वेदोऽखिलो धर्ममूलम्" इति । तस्य अपौरुषेयस्य वेदस्य अर्थतात्पर्यनिर्णये साधनं भवति भगवज्जैमिनिप्रणीतं मीमांसाशास्त्रम् । तदुक्तं कुमारिलभट्टपादैः श्लोकवार्तिके –

**यथा धर्मावबोधस्य प्रमाणं वैदिकं वचः ।**
**तदर्थनिर्णये हेतुर्जैमिनीयं तथैव नः ॥**[1] इति ।

भगवान् जैमिनिः पूर्वमीमांसाशास्त्रारम्भे "**अथातो धर्मजिज्ञासा**" इत्यनेन सूत्रेण धर्मजिज्ञासायाः कर्तव्यतां प्रतिज्ञाय द्वितीयसूत्रे धर्मलक्षणमेवमाह –"**चोदनालक्षणोऽर्थो धर्मः**" इति । वेदबोधितश्रेयस्साधनताको धर्म इति धर्मलक्षणं परिष्कृत्य तल्लक्ष्यत्वेन यागादिरेव धर्मः इत्याह । आदिपदेन होमस्य ग्रहणम् । तर्हि यागहोमयोः कः भेदः इति जिज्ञासायामाह तयोर्लक्षणं सूत्रकृत् भगवान् जैमिनिः चतुर्थाध्यायद्वितीयपादे "यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्"[2] । यजति चोदना – यजिधातुः । द्रव्यदेवताक्रियं - द्रव्यं च देवता च क्रिया च तत्समाहारः द्रव्यदेवताक्रियम् । एतत्समुदाये कृतार्थत्वात् क्लृप्तशक्तिकत्वात् । लोके देवतोद्देश्यकद्रव्यत्यागरूपा क्रिया यागपदार्थ इति प्रसिद्धत्वात् ।

त्यज्यमानद्रव्योद्देश्यत्वं देवतात्वम् । मीमांसकमते शब्ददेवतात्वाङ्गीकारेण विग्रहाभावात् प्रतिगृहीतृत्वं नास्तीति सम्प्रदानैकदेशत्वं देवतात्वमिति फलितोऽर्थः । एवञ्च द्रव्यप्रतिग्रहरहितत्वे सति द्रव्योद्देश्यतया चोदितत्वं देवतात्वमिति पर्यवस्यति । तथा च देवतामुद्दिश्य द्रव्यत्यागः इति यागलक्षणं सम्पद्यते ।

होमस्वरूपमेवमाह । "तदुक्ते श्रवणात् जुहोतिरासेचनाधिकः स्यात्"[3] आसेचनं प्रक्षेपणम्, अधिकं

---

[1] श्लोकवार्तिकम् १.४५

[2] जैमिनिसूत्रम् ४.२.२७

[3] जैमिनिसूत्रम् ४.२.२७


ISSN: 2320-740X

यस्मात् सः आसेचनाधिकः यागः, जुहोतिः - होमः स्यात् ।कुतः तदुक्ते श्रवणात् चतुर्गृहीतेन आज्येन चतुर्होत्रा राजानं याजयेत् इत्यादौ यज् धातूक्ते कर्मणि “अर्धं वा पूर्वेण ग्रहेण जुहुयात् अर्धमुत्तरेण” इत्यादिना प्रक्षेपाधिक्येन जुहोतेः श्रवणात् । एवमेव “चित्रया यजेत” इत्यादौ यागे विहिते सामान्यतः “चतुरवत्तं जुहोति” इत्यादिना होमः श्रूयते । अभिघारयति,हविषः सकाशात् द्विरवद्यति, उपस्तृणाति, चतुरवत्तं जुहोति” इति विधानात् । देवतोद्देशेन हविषः विभागःअवदानम् । अवदानसंस्कारसंस्कृतस्य द्रव्यस्य अग्नौ प्रक्षेपः होमः इति सिद्ध्यति । प्रक्षेपाधिको होमः इति यावत् । एवञ्च “देवतोद्देशेन त्यक्तस्य अग्नौ प्रक्षेपः होमः” इति होमलक्षणं सिद्ध्यति ।

यत्र वेदवाक्ये द्रव्यदेवतासम्बन्धः श्रूयते तत्र यजतिपदाश्रवणेऽपि द्रव्यदेवतासम्बन्धान्यथानुपपत्त्या यागः कल्प्यते । अतश्च “यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति” इत्यादौ यजिपदाश्रवणेऽपि न दोषः । एवमेव वषट्कारप्रदानकः यागः । स्वाहाकारप्रदानकश्च होमः इत्यपि कल्पकारैः स्पष्टीकृतम् । दर्शपूर्णमासादयः वषट्कारप्रदानकत्वेन यागाः । अग्निहोत्रादयः स्वाहाकारप्रदानकत्वेन होमाः इत्येवं व्यवस्था कृता ।

एवं यागहोमयोः लक्षणमुक्त्वा यागस्य अवान्तरभेदरूपयोः सत्राहीनयोः (यागविशेषयोः इति यावत्) लक्षणं स्पष्टीक्रियते । दशमषष्ठे सत्रलक्षणमेवमुक्तम् – **“द्वादशाहस्य सत्रत्वमासनोपेयिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात्”**[1] इति । “द्वादशाहप्रभृत्यधिकदिनसाध्यानि सत्राणि” “आसीरन्” “उपेयुः” इत्यन्यतरचोदनाचोदितत्वं सत्रलिङ्गम् । एवम् “अदक्षिणाको हि यज्ञः” इति दक्षिणारहितः यज्ञः । ये यजमानाः त ऋत्विजः । इति यजमाना एव ऋत्विजः न यजमानभिन्नाः । अतः दक्षिणादाता कः ? कस्मै देया ? इति सन्देहः स्यात् । सर्वे कर्मफलभोक्तारः । “अष्टादशरात्रं पशुकामा उपेयुः” । “य एवं विद्वांसः त्रयोदशरात्रमासते” इत्यादिवाक्यविहितानि सत्राणि । यजमानबहुत्वं नियतसंख्याविशिष्टकर्तृकत्वं च सत्रसामान्यलक्षणम् । “चतुर्विंशति परमाः सप्तदशावराः सत्रमासीरन्” इति सत्र शब्दसहचरितलिङ्गदर्शनात् । एवञ्च आसीरन्, उपेयुरिन्यतरचोदनाचोदितत्वे सति बहुयजमानकत्वं सत्रत्वमिति । अथवा यजमानकर्तृकार्त्विज्याहर्गणत्वं सत्रत्वमिति वा लक्षणं सिद्ध्यति ।

अहीनलक्षणन्तु – **“यजतिचोदनादहीनत्वं स्वामिनां चास्थिरपरिमाणत्वात्”**[2] । इति । यजतिचोदनाचोदितत्वे सति अनियतसङ्ख्याकयजमानकत्वं अहीनत्वम् । अहीने एको यजेत त्रयषड् द्वादश

[1] जैमिनिसूत्रम् १०.६.५७

[2] जैमिनिसूत्रम् १०.६.६०

त्रयोदश पञ्चदश वा "इत्युपक्रम्य अपरिमिता वा दीक्षेरन्" इति श्रवणात् ऋत्विजां नियमो नास्तीति प्रतीयते । द्विरात्रादारभ्य एकादशरात्रपर्यन्ताः अहीनाः। द्वादशाहस्तु उभयात्मकः इत्युक्तम् । याज्ञिकप्रसिद्धिरपि । उभयलक्षणस्य श्रवणात् । द्वादशाहेन यजेत इत्यादिना यजति चोदना श्रवणात् अहीनत्वम् । "ऋद्धिकामाः द्वादशाहमुपयन्ति" "द्वादशाहमासते" इत्यादिना आसीरन्, उपेयुः इत्येवं चोदनाश्रवणात् सत्रत्वमपि । अनयोरुभयोरपि प्रकृतिः द्वादशाहः । यजमानभिन्नऋत्विक् कर्तृकः अहीनः इत्यपि भेदः ।

एवञ्च यजतिचोदनाचोदितत्वे सति अनियतसङ्ख्याकयजमानकत्वे सति यजमानभिन्नऋत्विग्युक्ताहर्गणत्वम् अहीनलक्षणं सम्पन्नं भवति । एवमेव वषट्कारप्रदानकः यागः यथा - ज्योतिष्टोमादिः । स्वाहाकारप्रदानकः होमः यथा - अग्निहोत्रादिः इत्यपि यागहोमयोः लक्षणं लभ्यते । इत्येवं रूपेण यागहोमादीनां लक्षणानि मीमांसाशास्त्रे प्रतिपादितानि ।

**********


ISSN: 2320-740X

# कार्यसामान्यस्य बीजप्रयोजनाभ्याम् अविनाभावः

**आचार्यः नवीनहोळळः**

नव्यन्यायविभागः

अनादौ काले विविधैरात्मभिःअनवरतमारभ्यमाणानि सुकृतानि दुष्कृतानि च अनन्तान्युत्सर्गतो भोगैकनाश्यानि साक्षादुपभोगं निष्पादयितुमपारयन्ति तत्साधनीभूतान्विषयानुत्पादयन्ति । ते च विषयाः स्वस्वजनकादृष्टनाशकारणीभूतान् भोगानवश्यमुत्पादयन्ति । अन्यथा तादृशादृष्टानां नित्यत्वापत्तेः । तत्र च स्वस्वजनकादृष्टवैलक्षण्यात् विषयाणामुपभोगनिष्पादने भूयान्विशेषः । यथा केचित् विषयाः स्वसंयोगेन केचित् स्वसंयोगप्रध्वंसेन केचित् स्वप्रत्यक्षेण केचित् स्वीयरूपादिप्रत्यक्षेण केचित् स्वसमवेतद्रव्येण केचित् स्वसमवेतद्रव्यसमवेतद्रव्येण केचित् स्वनाशजन्यद्रव्येणेति रीत्या भोगान् जनयन्ति । एवं बहुपुरुषीयबहुविधादृष्टविशेषजनिता वापीकूपतटाकाराममहीधराकूपारादयः केचन विषयाः तत्तददृष्टपरिपाकदशायां तेषां तेषामुपभोगान् जनयन्ति । एवमेकपुरुषीयविविधादृष्टजनिताः तिन्त्रिणीफलकटुमाचीशलाटुसैन्धवमाषा जीरकास्सर्षपा इति बहवो विषयाः केचन मिळिता एकस्यैकमेव भोगं जनयन्ति । एवं क्रमेण सर्वेषां विषयाणां भोगसाधनत्वात् ।

अत एव महाप्रलयोऽपि सिद्ध्यति । संसरतां जीवानां प्रतिकल्पं केचिदपवृज्यन्ते, अपवृक्ताश्च न पुनस्संसरन्ति । नाप्यपवृक्तसमसङ्ख्याकानि संसार्यन्तराणि कुतश्चिदागच्छन्ति । अतः पूर्वपूर्वसर्गापेक्षयोत्तरोत्तरसर्गे न्यूनता वाच्या । अपवृक्तात्मभोगसाधनानां शरीरेन्द्रियविषयाणामसर्गात् । ततो यदा सर्व एवापवृज्यन्ते, तदा बीजप्रयोजनयोरभावात् विश्वसृष्ट्युयपरमो महाप्रलयः सम्पद्यते । तमेव च महाप्रलयं मोक्ष इति केचन व्यवहरन्ते । नन्वत्र सत्यां दृष्टसामग्र्याम् अदृष्टविलम्बान्न कार्यविलम्बं क्वचिदीक्षामहे । तत्कुतः कार्यमात्रेऽदृष्टस्य कारणतेति चेत् ।

**अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।**
**विविधा च पृथक् चेष्टा देवं चैवात्र पञ्चमम् ॥**
**भोगायैवास्य सकलं कर्मभिः परिकल्पितम् ॥**

इत्याद्यागमवशादिति ब्रूमः । ननु कार्यमात्रस्यादृष्टाधीनत्वे कार्यत्वाविशेषाददृष्टमप्यदृष्टाधीनं स्यादिति चेदिष्यत एवेदम् । किन्तु केचिददृष्टविशेषा भोगानुत्पादयन्तो यथोचितमदृष्टविशेषानप्युत्पादयन्ति, केचन भोगानेव, केचन अदृष्टविशेषानेव । इदं पुनरिहावसेयम् - देवदत्तीयभोगविशेषजनिका घटव्यक्तिर्येनादृष्टेन जनिता तेनैव

ISSN: 2320-740X

तद्घटव्यक्त्युपधायकः कपालसंयोगः कपालस्तत्क्रियाविभागादिस्तत्क्रियानुकूलनोदनादिकं चक्रभ्रमणादिकं चोत्पद्यते आत्ममनस्संयोगादिवत् । यथा हि क्वचिदेकेनैवात्ममनस्संयोगेन ज्ञानमिच्छाकृतिश्चोत्पाद्यन्ते तद्वत् । नन्वेवं घटः कपालसंयोगाधीनः, च चक्रभ्रमणाधीनः, तच्च दण्डसंयोगाधीनं, स च दण्डाधीनः, च वृक्षाधीनः, स च बीजाधीन इति रीत्यैकैकादृष्टकार्यधारा तददृष्टोत्पत्तिप्राक्कालोत्पत्तिकपदार्थसाधारणी अनवस्थिता च स्यादिति चेन्न यावत्या कारणधारया तद्घटव्यक्तिविशेषजनितभोगातिरिक्तभोगेनोपयुज्यते तावत्या एव तद्घटव्यक्त्युयपधायकादृष्टाविशेषाधीनत्वस्य लाघवानुरोधात् कल्पनयोक्तदोषद्वयानवकाशात् ।

अत्र नीलकण्ठमतम् । अदृष्टस्य कार्यमात्रं प्रति हेतुता न साक्षात् । नहि सामग्रीसमवधानेऽदृष्टविलम्बे कार्यविलम्बो दृष्टः । येन तत्साक्षाद्धेतुस्स्यात् किन्तु सामग्रीसम्पादकतया प्रायः परम्परयैव तदुपयोगः क्वचिन्मेघसञ्चारादौ साक्षादेव तद्धेतु अन्यथा, सामग्रीसम्पादनस्यैवानुपपत्तेः । अत एव **'यत्कार्यं यद्दृष्टादीनां तत्तदुपभोगं साक्षात् परम्परया वा जनयत्वेव'** इति व्याप्तौ साक्षात्परम्परासाधारणजन्यत्वबोधकमधीनपदमुपात्तम् इति । अत्रेदमस्वारस्यबीजम् । यथा सामग्रीसत्त्वेऽदृष्टविलम्बान्न घटविलम्बः तथा सामग्रीभूतानां चक्रभ्रमणादिपदार्थानामपि मिथो या सामग्री तस्यां सत्यामदृष्टविलम्बात्तत्पदार्थविलम्बाभावेन तत्रापि त्वदुक्तरीत्या साक्षाद्धेतुत्वासम्भवेन अदृष्टहेतुताया एव विलोपप्रसङ्गात् । मेघसञ्चारादेरपि या सामग्री वायुनोदनादिरूपा तस्या भूमात्रसञ्चारिभिः अस्माभिरपरिकलितत्वेऽपि वस्तुतो लब्धात्मकतया तस्यां सत्यामवश्यमेव तदुत्पत्तिरिति । अत्र तत्तत्कर्मविशेषजनितानां सुकृतदुष्कृतरूपाणामदृष्टविशेषाणां तत्तन्नियतफलोपधायकत्वस्याऽऽगमसिद्धतया तत्तत्कार्यविशेषे तत्तददृष्टविशेषाणां यथोचितसम्बन्धाभ्यां यथोचितरूपाभ्यां च विशेषकार्यकारणभावाः कल्पनीयाः । सामान्यकार्यकारणभावस्तु कार्यत्वावच्छिन्नं प्रति स्वसमवायिसंयुक्तसंयोगसंबन्धेनादृष्टस्य कारणतेति नीलकण्ठमते दर्शितम् । कालिकसम्बन्धेन कार्यत्वावच्छन्नं प्रति कालिकसम्बन्धेनादृष्टत्वेन कारणतेत्यन्यैरुक्तम् । तत्र प्रथमपक्षे कार्यतावच्छेदकसम्बन्धो यदि समवायः तदा ध्वंससाधारण्याभावः, गुणोत्पत्तेः प्रागाद्यक्षणावच्छिन्नघटादौ तदसंभवश्च । तादृशसंयुक्तसंयोगस्यापि कार्यतया तत्पूर्वं तदपेक्षणेऽनवस्थादोषश्च । किन्तु कालिकसम्बन्ध एव कार्यतावच्छेदकसम्बन्धः । नचैवं कालिकसम्बन्धेन कार्याधिकरणे स्पन्दादौ यथोक्तसम्बन्धेनादृष्टस्याभावात् व्यभिचार इति वाच्यम् । कार्यतावच्छेदकावच्छिन्नयत्किञ्चिद्व्यक्त्यधिकरणयावद्व्यक्तिनिष्ठाभावप्रतियोगित्वस्यैव व्यभिचारपदार्थत्वेन कार्याधिकरणे महाकाले यथोक्तसंबन्धेनादृष्टसत्त्वेन व्यभिचाराप्रसक्तेः । कार्यमात्रं प्रति अदृष्टस्य हेतुता न समवायसम्बन्धेन, घटाद्यधिकरणे कपालादौ समवायेन तदभावात् व्यभिचारात् । यत्तु स्वसमवायिसंयोगसंबन्धेनादृष्टं कार्यमात्र हेतुरिति । तन्न शब्दरूपकार्याधिकरणे गगनेऽदृष्टसमवाय्यात्मसंयोगाभावेन


ISSN: 2320-740X

व्यभिचारात् । स्वसमवायिसंयुक्तसंयोगसम्बन्धेनादृष्टस्य हेतुता बोध्येति । तत्तु ध्वंसासङ्ग्रहादिदोषात् हेयमिति । आवश्यकं च ध्वंसस्यादृष्टजन्यत्वं पुत्रपश्वादिनाशस्य तत्तत्कर्मविशेषजन्यतायाः श्रुतिसिद्धत्वात् ध्वंसेनापि भोगोत्पादनेन तस्यादृष्टाधीनत्वमन्तरेणानुपपत्तेश्च ।

यदि बीजप्रयोजनाभ्यां विना न कस्यचिदुत्पत्तिस्तदा भोगस्य किं प्रयोजनमिति वक्तव्यम् । उच्यते । सुखदुःखसाक्षात्कारो हि भोगः । स च सुखदुःखवासनां जनयति, पूर्वोत्पन्नां वा दृढयति । दृढया च वासनया स्मरन् पुरुषः सुखान्यभिलषति, दुःखानि च विद्वेष्टि । ततः प्रवर्तते । ततस्सुखं दुःखं वानुभवतीत्यस्ति भोगस्यापि भोगसाधनत्वम् ।

इदन्तु बोध्यम् । कार्यमात्रस्य न भोगप्रयोजनकत्वसम्भवः । तथाहि अपवर्गपूर्वभाविनो भोगस्य न भोगान्तरं प्रयोजनं, किन्तु स्वजनकप्रारब्धनाशद्वाराऽपवर्ग एव प्रयोजनम् । अदृष्टनाशस्य तत्कार्यभोगाभावः प्रयोजनं, कारणाभावस्य कार्याभावप्रयोजकत्वात् । एवमिदानीन्तनानां भोगनाशानामुद्बोधकविधया सुखदुःखसाक्षात्कारकत्वेन भोगसाधनत्वसम्भवेऽपि अपवर्गपूर्वभाविभोगनाशस्य न भोगः प्रयोजनं, किन्तु विशेषाभावकूटस्य सामान्याभावप्रयोजकतया तादृशकूटघटकत्वेन तन्नाशस्य भोगसामान्याभावप्रयोजकत्वमेव । तन्नाशे च तद्भोगजनकादृष्टमेव कारणं, नत्वदृष्टान्तरं मानाभावात् । महाप्रलयस्य च भोगसामान्याभाव एव प्रयोजनं, कारणाभावस्य कार्याभावप्रयोजनकत्वात् । महाप्रलयो हि चरमादृष्टनाशश्चरमशरीरादिनाशो वा चरमपरमाणुत्रसरेणुसंयोगनाशो वा । तत्र चरमशरीरादिनाशे तच्छरीजनकादृष्टमेव कारणम् । तददृष्टनाशश्च तच्छरीरादिनाशात् प्राग्वा स्यादुत्तरकाले वा । न चात्र प्रथमपक्षे तच्छरीरादिनाशं प्रति तददृष्टस्य कारणत्वानुपपत्तिरव्यवहितपूर्ववृत्तित्वाभावादिति वाच्यम् । पूर्ववृत्तित्वमात्रेणापि कारणत्वनिर्वाहादिति ।

**आकरग्रन्थः –**

- मुक्तावली प्रभामञ्जूषा

**********

# आयोगेषु संस्कृतशिक्षकाणां स्थितिः सर्वकारस्य समर्थनञ्च

**आचार्यः गौराङ्ग बाघः**

आचार्यः, शिक्षाशास्त्रिविभागः

भारतीयशिक्षणपरम्परा अद्भुता अतुलनीया च वर्तते । भारतीयसभ्यता तदितरेभ्यः सभ्यताभ्यः प्रभाविता प्रभावोपादिका च वर्तते । अद्यतनशिक्षा प्राच्यपाश्चात्य शिक्षयोः प्रभाविता वरीवर्ति ।

**1) प्रथमशिक्षायोगः – राधाकृष्णनन् आयोगः / विश्वविद्यालायोगः**

(28/12/1949), 1956 सर्वकारीय

अध्यक्षः – डा. सर्वपल्ली राधाकृष्णनन्

आयोगस्य नियुक्तिः 04/11/1948 तः 15/07/1949

अस्य आयोगस्य त्रीणि उद्देश्यानि वर्तन्ते यानि संस्कृतविषयं प्रति ध्यानाकर्षणं कुर्वन्ति तानि –

- वर्तमानेन सह अतीतज्ञानस्य विकासः ।
- केषाञ्चनमूल्यानां विकसीकरणं – यथा निर्भिकता, विवेकशक्तिः, उद्देश्यानम् अखण्डता च ।
- स्वसांस्कृतिकस्रोतसः उत्थानाय विद्यार्थिभ्यः अस्य परिचयप्रदानम् ।

त्रयाणाम् उद्देश्यानाम् आधारेण संस्कृतविषयाः अपि अन्तर्भवन्ति ।

आयोगेन शिक्षकाणां विभागः चतुर्धा कृतः –

a) आचार्यः (Professor)

b) सहाचार्यः (Associate Professor)

c) सहायकाचार्यः (Assistant Professor)

d) प्रशिक्षकाः (Trainer)

तेभ्यः उत्तमवेतनम्, योग्यताधारेण पदोन्नतिः, आवासव्यवस्था, भविष्यत् निधिः ।

शिक्षायै केवलं भारतस्य 'GDP' इत्यस्य 6% व्ययी भवेत् ।

**2) माध्यमिकशिक्षायोगः – 23 / 09 /1952 – 53**

केन्द्रियशिक्षापरिषदः प्रस्तावानुसारं माध्यमिकशिक्षायां परिष्कारम् आनेतुं मद्रासविश्वविद्यालयस्य उपकुलपतिः डा. लक्ष्मणस्वामी मुदालियरवर्यस्य अध्यक्षतायाम् आयोगस्य स्थापना अभूत् । अस्मिन्



ISSN: 2320-740X

आयोगे प्रस्तावविषये अन्तिमे क्षणे सामाजिक – सांस्कृतिक – नैतिकमूल्यानि विकसी कर्तुं प्रक्रियाः भवेयुः ।

**3) कोठारी आयोगः (राष्ट्रिया शिक्षानीतिः)**

विद्यालयीय शिक्षायाः दिशःप्रदानाय केन्द्रियसर्वकारेण 1964 – 66 तदानीन्तन विश्वविद्यालयानुदानायोगस्य अध्यक्षरूपेण डा. दौलतसिंहस्य नियुक्तिः अकारि । 24/07/1968 शिक्षायोगः स्थापितः –

अत्रापि नैतिकमूल्यानां सामाजिकमूल्यानां विकसीकरणे अधिकं बलं प्रदत्तम् । शिक्षकाणाम् आर्थिकदशायाः, सामाजिकदशायाः, व्यावसायिकदशायाः च अनुकूलता कल्पिता ।

**4) आचार्यः राममूर्ति – आयोगः – 1992 – 23/01/1993**

कालेऽस्मिन् जयप्रकाशनारायणवर्यः भारतस्य प्रधानमन्त्री आसीत् । सः सम्पूर्णक्रान्तौ विश्वासं करोति स्म । सम्पूर्णा क्रान्तिः सप्तबिन्दुयुक्ता आसीत्– सामाजिक– सांस्कृतिक– बौद्धिक– आध्यात्मिकक्रान्तयः । तदानीन्तनकाले वर्णभेदाः, जातिभेदादयः आसन् । तदाधारेण शिक्षायां परिवर्तनम् आनेतुं प्रयत्नः विहितः ।

**5) प्रो. आर्. टकवाले आयोगः – 1995**

सेवारताध्यापकेभ्यः पत्राचारशिक्षास्नातकः ।

**6) राष्ट्रियज्ञानायोगः**

(NCF 2005) एषः आयोगः NCERT द्वारा कृतः आसीत् । अस्य आयोगस्य निर्देशकः प्रो. कृष्णकुमारः । प्रमुखं लक्ष्यम् आसीत् 'आत्मज्ञानम्' विद्यार्थिभ्यः पृथक् अवसरान् प्रदाय आत्मज्ञानप्राप्तुं स्वयम् उद्यमं कुर्यात् । ज्ञानायोगे द्वितीयोऽध्यायः भवति । अध्याये तत्र चतुर्थबिन्दोः प्रथमः ज्ञानार्जनस्य कृते अध्यापनम्, पञ्चमः – ज्ञानं बोधञ्च षष्ठबिन्दुः – ज्ञानस्य पुनारचना । एतादृशाणां सन्दर्भे संस्कृतं यथार्थं भवति ।

- ❖ पाठ्यचर्चा सन्दर्भे प्रथमः बिन्दुः भवति भाषा । तस्मिन् संस्कितमपि अन्तर्भवति । पञ्चमबिन्दुः भवति कलाशिक्षा अष्टमबिम्दुः शान्तिशिक्षा इति ।
- ❖ पञ्चमाध्याये गुणवत्ताविषये चर्चा जाता ।

7) **राष्ट्रियशिक्षानीतिः 2017**

(देशस्य 150 विशेषज्ञाः शिक्षकाः आसन्)

अन्तरीक्षवैज्ञानिकः डा. के. कस्तरीरङ्गनवर्यः अध्यक्षः

अस्मिन् प्रमुखविशेषेताः आसन् तेषु प्रथमा या विशेषता वर्तते तत्र संस्कृतभाषायाः उल्लेखः वर्तते । यथा – नूतनशिक्षानीतौ पाठ्यसामग्री, परीक्षाप्रणाली, छात्रेषु आत्मस्वातन्त्रम्, शिक्षायां कौशलानि उद्योगावसराः, विद्यालयीय शिक्षायाः स्तरः, संस्कृतभाषा, उच्चशिक्षायां गुणवत्ता, नवाचारः, शिक्षकेषु कौशलविकासः, छात्रेषु अधिकारः ।

8) **संस्कृतायोगः (प्रथमः)**

जनाग्रहस्तथा लोकसभायाः आग्रहेण 01/10/1956 तमे आयोगस्य रचना अभूत् 10/1957 तमे सर्वाङ्गपूर्णं प्रतिवेदनं प्रास्तौत् । 12 अध्यायाः आसन् । अध्यक्षः प्रो. सुनीतकुमार चटर्जी ।

तस्मिन् प्रतिवेदने संस्कृतशिक्षायाः इतिहासेन सह तस्याः साम्प्रतिकी स्थितिः या आसीत् तस्याः रुचिपूर्णं चित्रणं चकार । तथा च साम्प्रतिकपरिप्रेक्ष्ये संस्कृतशिक्षा तथा भारतीयसंस्कृतेः प्रचारः । जनेषु अस्याः लोकप्रियता स्थापनाय अनिवार्यता उपरि बलं प्रदत्तम् ।

- संस्कृतम् उभयथा पाठनपाठनं करणीयं पारम्परिकरूपेण आधुनिकरूपेण च । तदर्थं नैकेषां मार्गाणां निर्देशाः प्रदत्ताः । यथा– राष्ट्रिय, आन्ताराष्ट्रीयस्तरे च भारतस्य व्यक्तित्वं समुज्ज्वलं भवेत् । तथा स्वतन्त्रभारतस्य आकाङ्क्षाः पूर्णाः भवेयुः – मौखिकस्तरे, मूर्त्तस्तरे, व्यावहारिकस्तरे च ।

- संस्कृतभाषायां सङ्घटनस्य चरित्रनिर्माणस्य च अद्भुता शक्तिरस्ति इति निश्चप्रचम् । अतः आधुनिकविद्यालयेषु येषां छात्राणां मातृभाषा आङ्ग्लं भवति, ते संस्कृतात् वञ्चिताः न स्युः तथा नियमः भवेत् । संस्कृतं पठितुम् इच्छुकाः ये वर्तन्ते तेभ्यः कीदृशी अपि समस्या न स्यात् । त्रिभाषा सूत्रे संस्कृतं तथा स्यात् संस्कृतं यथा कथञ्चित् स्यादेव ।

- संस्कृतविद्यालयात् निर्गतेभ्यः छात्रेभ्यः तादृशं सम्मानं स्यात्, तादृशी सामान्यविद्यालयात् निर्गतेभ्यः जीविकोपार्जनाय तादृशाः अवसराः स्युः । तदर्थं विशेषजनजागरणं संस्कृतपठनपाठनं प्रति निष्ठा, विविधप्रतियोगितासु परीक्षासु च संस्कृतशिक्षा सर्वसाधनसम्पन्ना स्यात् ।

- चितेषु संस्कृतविद्यालयेषु सर्वकारः पर्याप्तं वेतनं दातुं शक्नुयात् तेभ्यः वासवनस्य, छात्रावासस्य, पुस्तकालयस्य च समुचिता व्यवस्था कल्पनीया । अस्यां दिशि प्रयत्नाः प्रचाल्यमानाः वर्तन्ते



ISSN: 2320-740X

विश्वविद्यालयानुदानायोगः चेष्टायाम् अनुकूलः वर्त्तते । प्रतियोगितापरीक्षासु शास्त्रियविषयाणां समवेशाय प्रयत्नाः वर्तन्ते । कार्येऽस्मिन् केन्द्रियसर्वकारः राज्यसर्वकारश्च अनुकूलौ वर्तेते ।

- वारणसीसंस्कृतविश्वविद्यालयस्य सफलताम् अवलोक्य देशेषु अन्येषां संस्कृतविश्वविद्यालयानाम् आरम्भः भवेत् । सर्वप्रथमं दक्षिणभारते संस्कृतविश्वविद्यालयानां स्थापना भवेत् । संस्कृतविश्वविद्यालयानां स्थापनेन निश्चयेन संस्कृतस्य मान्यता वर्धते तथा अध्ययनाध्यापनाय पारम्पारिकाधुनिकविध्योः समन्वयः भविता । सर्वकारस्य अनुष्ठानेन संस्कृतविद्वद्भ्यः छात्रेभ्यः च संस्कृतोद्योगे विश्वासः भविता सम्मानं च प्राप्येत । अनेन भारतस्य विशालभण्डारस्य प्रकाशनं भारतीय दृष्ट्या भवितुम् अर्हति । रचनात्मकता, सर्जनात्मकता च उन्मोचिता भवति ।

- आधुनिकविश्वविद्यालयेषु शोधसंस्थाने च पारम्परिकपाठ्यक्रमप्रणालीनां तथा आधुनिकप्रणालीनां प्रशिक्षणं देयं तादृशाः प्रशिक्षिताः च विद्यालयेषु नियुक्ताः भवेयुः । यथा- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः काशी हिन्दुविश्वविद्यालयः आदि ।

- भारतीयशिक्षाव्यवस्थां राष्ट्रियदृश्ट्या सुदृढां, आकर्षिकां, प्रभावशालिनीं तथा ज्ञानार्जनलक्ष्यात् लोकोपयोगिनीं कर्तुम् आयोगस्य अनुशंसनं श्लाघ्यं समर्थयोग्यं च आसीत् । विज्ञानसम्बद्धविषयाणाम् अध्ययने तेन सम्बद्धसंस्कृतवाङ्मयस्य भूमिकायाः तुलनात्मकम् अध्ययनं कार्यम् ।

- समेभ्यः विद्यालयमहाविद्यालयविश्वविद्यालयच्छात्रेभ्यः स्वदेशस्य पैतृकसम्पत्तेः ज्ञानस्य परिचयं कारयितुं विभिन्नस्तरेषु अनुकूलसाहित्य- भारतीयचिन्तन- दर्शन- धर्म- नीतिशास्त्र- कालाकौशल- वास्तुविद्यानां भूमिकां प्रदाय भारतीयसंस्कृतेः एकस्य क्रमिकपाठ्यक्रमस्य अनिवार्यता आवश्यकी ।

- संस्कृतशोधक्षेत्रं सुव्यवस्थितं राष्ट्रियदृष्ट्या लाभप्रदं कर्तुं शोधसंस्थाने आवश्यकस्थानस्य, उपकरणानां, योग्यप्रशिक्षकाणां च नियुक्तिव्यवस्था भवेत् ।

- उपयोगी परिश्रमसाध्यविषयाः यथा- वेद- वैदिकसंस्कार- कर्मकाण्ड- कल्पसूत्र- भाषाविज्ञान- पुराण- शब्दार्थविकासविज्ञान- नाट्यशास्त्र- तर्कशात्र- भारतीयमनोविज्ञान- आचारशास्त्र- भारतीयसमाजशात्र- लोकसंस्कृति- सौन्दर्यशास्त्र- सङ्गीत- वास्तुकला- चित्रकला- मूर्त्तिकला- भारतीयविज्ञान- ज्यौतिषसंहिताशारवाः रुचिपूर्णाः विषयाः उपेक्षिताः वर्त्तन्ते एतेषु शोधकार्याणि भवेयुः ।

- भारतीयसम्पदः रक्षणाय केन्द्रियपाण्डुलिपिसर्वेक्षणविभागः स्थापनीयः तथा च अस्य विभागस्य शाखाः

प्रत्येकं राज्ये भवेयुः । पाण्डुलिपीनाम् अनुसन्धानं, सर्वेक्षणं, एकत्रीकरणं, विवरणात्मकं सूचीकरणम् एतेषां सम्पादनञ्च स्थानीयप्रशासकसंस्थाभिः व्यवस्था करणीया । तत्र केन्द्रतः धनव्यवस्था भवेत् ।

**द्वितीयसंस्कृतायोगः**

अध्यक्षः पद्मभूषण सत्यव्रत शास्त्री- 2014, 13 सदस्याः पारम्परिकसंस्कृतज्ञानस्य आधुनिकीकरणम्, आधुनिकशिक्षाप्रणाल्या सह समन्वयस्थापनम्, 58 वर्षेभ्यः पश्चात्

प्रमुखसंस्तुतयः –

- विद्यालयीयशिक्षायां चतस्रः भाषाः भवेयुः । तदनुसारं कक्ष्या षष्ठीतः कक्ष्यादशमी यावत् संस्कृतस्य अध्ययनम् अध्यापनम् अनिवार्यम् ।
- विशेषप्रयोगशालानां स्थापना भवेत् यत्र वैज्ञानिकाः विद्वांसः च एकत्र उपविश्य प्राचीनभारतस्य वैदिकयागानां, यागावशेशस्य उपचारात्मकगुणस्य वर्षादीनां प्रक्रियायां विश्वासस्य परीक्षणं कर्तुं शक्नुयुः ।
- सर्वासु प्रौद्योगिकसंस्थासु संस्कृतपत्रस्य अनिवार्यता भवेत् ।
- सर्वेषु विभागेषु संस्कृताध्यापकानां नियुक्तिः भवेत् ।

केन्द्रसर्वकाराणां योगदानम् –

- राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
    1. 21 आदर्शसंस्कृतमहाविद्यालयाः
    2. 11 परिसराः
    3. 4 शोधसंस्थाः
- राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
- लालबहादुर शास्त्री राष्ट्रियसंस्कृतविद्यापीठम्
- महर्षी सान्दिपनी राष्ट्रियवेदविद्याप्रतिष्ठानम् – 73 वैदिकपाठशालाः

**********


ISSN: 2320-740X

# आख्यातवाच्यत्वविवेकः

**आचार्यः सूर्यनारायणभट्टः**
आचार्यः, मीमांसाविभागः

आख्यातवाच्यः कर्ता, आक्षेपलभ्या भावना इति योऽयं वैयाकरणाभिमतः पक्षः, तमनूद्य मीमांसासम्मतः पक्षः निरूप्यते ।

विषयस्य अयं प्रसङ्गः - तृतीयाध्याये श्रुत्यादिभिः षड्भिः प्रमाणैः अङ्गाङ्गिभावः प्रतिपाद्यते । तत्राद्यं प्रमाणान्तरनिरपेक्षं प्रमाणं भवति श्रुतिः । **'पशुना यजेत'** इत्यत्र श्रुतिप्रमाणेन अङ्गाङ्गिभावः प्रदर्श्यते । पशुना यजेत इत्यत्र पशुगतैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम् । द्वयोः अर्थयोः सामान एकोऽभिधयकः शब्दः, सा समानाभिधानश्रुतिः । अतः तत्र यागसाधनीभूतो यः पशुः सः पुमान् एकश्चेति । अनया समानाभिधानश्रुत्या तयोरेकत्वपुंस्त्वयोः कारकाङ्गत्वम् । यजेत इत्याख्याताभिहितसङ्ख्यायाः भावनाङ्गत्वं समानाभिधानश्रुत्या । ननु कथं आर्थभावनाङ्गत्वं सङ्ख्यायाः युज्यते ? अङ्गाङ्गित्वेन प्रकल्पितयोः सङ्ख्याभावनयोरुभयोरपि अमूर्तत्वम् । अमूर्तं हि मूर्तस्य कस्यचिदङ्गं भवति, एवमेव मूर्तस्य मूर्तं हि किञ्चिदङ्गं भवितुमर्हति । एतादृशस्थले अङ्गित्वेन प्रकल्पितं यदमूर्तं तस्य अन्यत्किञ्चित् मूर्तमङ्गं शब्दतः उपस्थितं भवेत् चेत् तद्द्वारा तदङ्गत्वेन प्रकृतममूर्तमङ्गं प्रकल्पयितव्यं भवति ।

यथा **'अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति'** इत्यत्र तृतीयाश्रुत्या आरुण्यस्यामूर्तस्य अमूर्तक्रयाङ्गत्वं बोधितम् । तत्र च पिङ्गाक्ष्येत्यादिना गोरूपं मूर्तं द्रव्यं क्रयस्याङ्गत्वेनोपस्थितमिति तद्द्वारा आरुण्यं क्रयाङ्गं भवति । तथा अत्र वक्तुं न शक्यते । आर्थभावनाङ्गत्वेन अन्यस्य मूर्तस्य कस्यचिदत्र अनुपस्थितत्वात् । किञ्च पशुना यजेत इत्यत्र आख्यातबोध्यमेकत्वम् एकपदश्रुत्या यागाङ्गमिति कथ्यते । अमूर्तायाः तस्याः सङ्ख्यायाः कथं यागाङ्गत्वमिति सन्देहे कर्तृपरिच्छेदद्वारा तदुपपद्यते । आख्यातवाच्या भावना तमाक्षिपति तद्द्वारा यागाङ्गत्वमिति स्थितिः । आक्षेपलभ्यः कर्ता इति पक्षमसहमानाः आख्यातवाच्य एव कर्ता कुतो न स्यात् आक्षेपलभ्या भावना एव स्यादिति विवदन्ते ।

ननु वाच्यार्थः कः इति निर्णयः यच्च यस्मात् प्रतीयते तत् तस्य वाच्यम् इति नियमेन क्रियते । आख्यातश्रवणे तु कर्ता प्रतीयते । तर्हि आख्यातवाच्यः कर्तैव स्यात् । आख्यातश्रवणे नियमेन कर्तुः प्रतीतिर्विद्यते अतः आख्यातवाच्य एव कर्ता स्यादिति चेत् सत्यम् - आख्यातश्रवणे कर्तुः प्रतीतिरवश्यं भवति । परं तु

तादृशप्रतीतिनिर्वाहार्थं यदि कर्तरि शक्तिः स्वीक्रियते तर्हि गौरवम् । शक्तिस्वीकारं विनापि भावनया आक्षेपेण कर्तुः प्रतीतिः सम्भवति भावनां विना कर्तृप्रतीतिः न भवतीति भावना एव आख्याअतवाच्या भवतु इति चेत् -

आक्षेपात् भावना लक्ष्यतां कर्तैव आख्यातवाच्यः स्यात् । यथा कर्तारं विना कृतिः न भवति तथैव कृतिं विना कर्ता अपि न भवति । अतः आख्यातवाच्यः कर्ता आक्षेपलभ्या भावना इत्येवं स्यात् । अत्रेदं विनिगमकम् - यदि आख्यातवाच्या भावना स्यात् तस्याः सर्वैरपि कारकैः सह सम्बन्धः समानतया वर्तते - न केवलं कर्त्रा सह इति न सर्वाणि भावनया सह सम्बद्धानि वर्तन्ते । एवं स्थिते सा कर्तारमेव आक्षिपतीति कथं वा स्यात् - सर्वाण्यपि कारकाणि आक्षेप्तुं प्रभवतीति नियमाभावात् कर्तारमेव आक्षिपतीति वक्तुं नैव शक्यते । परं तु कर्ता वाच्यार्थः इति यदा अङ्गीक्रियते तदा नियमेन सः भावनामेव आक्षिपेत् तेन तयैव सह सम्बन्धस्य विद्यमानत्वात् । कर्ता नाम एकं कारकम्, कारकाणां क्रियान्वयनियमात् तयैव सह नियतः इति आख्यातवाच्यः कर्ता इत्येव पक्षः युक्तः । कारकाणि सर्वाणि भावनया सह सम्बद्धानि न तु परस्परं सम्बद्धानि - तस्मात् यदा सर्वाणि भवनायां विशेषणीभूतानि तदा विशेषभूतानां कारकाणां परस्परसम्बन्धो विशेष्यविशेषणभावरूपेण न भवति इति **गुणानां च परार्थत्वात् असम्बन्धः समत्वात् स्यात्** इति कथ्यते - अर्थात् एकं प्रधानं प्रति गुणीभूतानां बहूनां प्रधानार्थत्वात् परस्परं गुणप्रधानभावेन सम्बन्धो न भवति - अतः सर्वाणि कारकाणि कारकत्वेन रूपेण समानानि इति कृत्वा परस्परं विशेष्यविशेषणभावरूपसम्बन्धो नास्तीति कर्ता आख्यातस्य वाच्यः स्यात् तर्हि तस्य सम्बन्धः केवलं भावनया सहैव, अन्येन केनापि कारकेण सह नास्तीति कृत्वा भावनामेव आक्षिपतीति नियमेन वक्तुं शक्यते । इदमेव आख्यातवाच्यः कर्ता आक्षेपल्भ्या भावना इत्यत्र विनिगमकम् ।

अपि च भावनायाः आख्यातवाच्यत्वपक्षे तस्याः सर्वैः कारकैः सह सम्बन्धो वर्तते इति करणत्वादीनामपि आक्षेपलभ्यत्वात् करणत्वादीनां तृतीयाविभक्तिः न स्यादिति आपत्तिर्जायेत । कर्तुर्वाच्यत्वपक्षे नेयमापत्तिः ।

अपि च एकत्वं कर्त्रा अन्वेति एकश्चेत् यजेत, द्वौ चेत् यजेयाताम् इति कर्तृसङ्ख्यानुरोधेन एकवचनं द्विवचनादिकं च भवति । इदमेकत्वं कर्तरि अन्वेति कर्तृपरिच्छेदद्वारा यागाङ्गं भवतीति मीमांसकैरपि स्वीक्रियते । सङ्ख्या कर्तरि अन्वयमवाप्य भावनायाः अङ्गं भवति । कर्ता यदि पदेन उपस्थापितो न स्यात् तर्हि वृत्त्या पदेन अनुपस्थापिते अर्थे अन्वयः सङ्ख्यायाः कथं वा स्यात् । तस्मादेव **न हि शाब्दमशाब्देनान्वेतीति** न्यायविरोधः सम्भवति । कर्ता यदि केनचित्पदेन उपस्थापितः स्यात् तदा न्यायानुरोधेन शाब्दी सङ्ख्या शाब्दे कर्तरि अन्वयं प्राप्नोतीति न कश्चिद्विरोधः । शाब्दो नाम वृत्त्या पदजन्य उपस्थितिविषयः ।

अत्र तु सङ्ख्या वृत्त्या पदजन्योपस्थितेः विषयः । कर्ता तु न तथेति विरोधः इति कर्त्रा सह अस्याः


ISSN: 2320-740X

अन्वयो नोपपद्यते । किञ्च यदि अशाब्देन शाब्दमन्वियात् तर्हि अस्मिन् शास्त्रे ऊहादिनिरूपणं यत् क्रियते तस्य वैयर्थ्यं स्यात् । यतो हि यस्यां प्रकृतौ अग्निदेवताकः यागः - तत्र अग्नये जुष्टं निर्वपामीति मन्त्रः निर्वापे उपयुज्यते - **अग्नये जुष्टं निर्वपामीति** । तत्र अग्निः देवता इति स मन्त्रः समीचीनः । परन्तु विकृतौ सौर्यादौ देवता भवति सूर्यः । अतः मन्त्रः अत्र न सङ्गतो भवति तत्स्थाने सूर्य इति पदस्य ऊहः क्रियते - यदि शाब्दमशाब्देन अन्वियात् तदा सूर्यपदाध्याहारं विनापि वाक्यार्थो लभ्येत, ऊहः न कर्तव्यश्च स्यात् । परन्तु सूर्याय इति पदप्रक्षेपः कर्तव्य इति न हि शाब्दमशाब्देन अन्वेतीति नियमः अङ्गीकृतः । तस्मादपि आख्यातवाच्यः कर्ता एव स्यात् । अपि च देवदत्तः पचतीत्यत्र सामानाधिकरण्यं न स्यात् । यथा नीलो घटः इत्यत्र भिन्नप्रवृत्तिनिमित्तयोः शब्दयोः एकार्थवृत्तित्वं सामानाधिकरण्यम् । नीलपदस्य प्रवृत्तिनिमित्तमन्यत् घटपदस्य प्रवृत्तिनिमित्तमन्यत् तथापि नीलो घटः इत्यत्र इदं पदद्वयमपि एकमर्थं बोधयति - अतः एकार्थवृत्तित्वात् एकार्थबोधकत्वं सामानाधिकरण्यं यथा वर्तते तथा देवदत्तः पचतीत्यत्र न स्यात् - आख्यातेन कृतिः (भावना) उच्यते देवदत्तशब्देन कश्चित्पुरुषः कथ्यते । तर्हि देवदत्तः पचतीत्युक्ते एकार्थबोधकत्वाभावात् सामानाधिकरण्यं न स्यात् ।

केवलभावनावाचकस्य आख्यातस्य देवदत्तस्य च समानविभक्त्याद्यभावात् सामानाधिकरण्यं न सम्भवति। तयोः देवदत्त-आख्यातपदयोः एकार्थबोधकत्वं नास्ति अभेदोऽपि नास्ति । अतः सामानाधिकरण्यसिद्ध्यर्थं कर्ता एव आख्यातवाच्यः स्यात् ।

**लः कर्मणि च भावे चाकर्मकेभ्यः** इति स्मृत्या नियमः क्रियते - धातवः द्विविधाः सकर्मकाः अकर्मकाः चेति । तत्र सकर्मका ये धातवो भवन्ति तेभ्यः कर्तरिलकारः कर्मणिलकारश्च भवति । एवमेव ये अकर्मकाः धातवो भवन्ति तेभ्यः कर्तरिलकारः भावे लकारश्च भवतीति अनुशासनादवगम्यते । यदि अन्यथा कथ्यते आक्षेपलभ्यः कर्ता इति तदा अनुशासनविरोधः प्रसज्यते ।

अपि च यदि आख्यातवाच्यः कर्ता न स्यात् तदा देवदत्तेन पचतीति अनिष्टः प्रयोगः प्रसज्येत - तदित्थम् - अत्र अभिहिते अनभिहिते च कारके विभक्तिभेदो भवति । अनभिहिते कर्तरि तृतीयाविभक्तिः, अभिहिते प्रथमाविभक्तिः । यदि देवदत्तः पचतीत्यत्र आख्यातेन कर्ता नाभिधीयेत तदा कर्ता अनभिहितो भवति तदा अनभिहिते कर्तरि तृतीया स्यादिति न प्रथमा, किन्तु देवदत्तेन पचतीति अनिष्टप्रयोगः स्यादिति आपत्तिः । यदा आख्यातवाच्यः कर्ता स्यात् तदा कर्तुः अभिहितत्वात् अभिहिते तु प्रथमा - तदा देवदत्तः पचतीति साधुरेव प्रयोगः इति आख्यातवाच्यः कर्ता, आक्षेपलभ्यैव भावनेति बहुयुक्तिभिः उपस्थिते पूर्वपक्षे -

**समाधीयते** - यः अर्थः प्रकारान्तरेण लब्धुं न शक्यते शब्दादेव सः ज्ञातव्यो भवति स एव शब्दस्य

वाच्यार्थः भवति **अनन्यलभ्यः शब्दार्थः** इति न्यायात् । पदस्य वाच्यार्थः स एव भवति यः पदस्य तस्मिन् अर्थे शक्तिकल्पनां विना अन्यथालभ्यो न भवति । कर्ता तु यदि अन्यलभ्यः स वाच्यार्थो भवितुं नार्हति । यदि आख्यातवाच्या भावना भवति तदाश्रयभूतः कर्ता आक्षेपादेव लभ्यत इति कृत्वा तस्य अन्यलभ्यत्वात् स न वाच्यार्थः । कर्ता यदि वाच्यार्थः तर्हि भावनैव वाच्यार्थः इति उक्तं भवेत् । कृतिमान् हि कर्ता । यत्र विशिष्टे शक्तिः उच्यते तत्र आकृत्यधिकरणन्यायेन विशेषणे शक्तिरभ्युपगम्यते मीमांसकैः । अन्ये नैयायिकादयः जातिविशिष्टव्यक्तौ शक्तिं स्वीकुर्वन्ति । मीमांसकास्तु **विशेषणं नाभिधागच्छेत् क्षीणशक्तिर्विशेषणे** इति न्यायेन जातौ शक्तिं स्वीकुर्वन्ति । एवं च कृतिमान् इति यदा उच्यते तदा विशेषणीभूतायां कृतावेव शक्तिः पर्यवस्यति । तस्मात् कृतिशक्त्यैव कृतिमतः बोधः इति स्वीकर्तव्यम् । कृतिविशिष्टे पृथक् शक्तिः न स्वीकर्तव्या इति आख्यातवाच्या भावना इति पक्ष एव समीचीनः । भावनायां शक्तिर्यदा उच्यते तदानीं कृतित्वं शक्यतावच्छेदकं भवति स च पक्षः लघुभूतः । यदा कृतिः शक्यतवच्छेदिका स्यात् तदा कृतीनां हि अनन्तत्वात् अनन्ताः कृतयः निवेशनीयाः भवन्ति । एवमाकृत्यधिकरणन्यायेन भावनायां शक्तिः भावनाश्रयस्य कर्तुः आक्षेपात् लाभः इति विनिगमकस्य सत्त्वात् आख्यातवाच्या भावना आक्षेपलभ्यः कर्ता इति सिद्ध्यति ।

तथा च भावनायाः सम्बन्धः सर्वैः कारकैः सह वर्तते तदा सा कर्तारमेव नियमेन कथमाक्षिपेत् । कर्ता तु भावनया सह सम्बद्धः तस्मात् नियमेन तामेव आक्षिपेत् तस्मात् आख्यातवाच्यः कर्ता इति या शङ्का, तस्याः समाधानम् - यद्यपि भावनायाः यथा कर्त्रा सह सम्बन्धः तथैव इतरैः सहापि वर्तते, परन्तु कर्त्रा सह सम्बन्धः नियतः इतरैः सह अनियत इति कारणात् नियमेन तमेव आक्षिपति सा । तिष्ठति शेते इत्यादिषु केवलं कर्त्रैव सह सम्बन्धः न कर्मत्वादिभिः सह सम्बन्धः अवलोक्यते इति नियमेन कर्तारमेव आक्षिपति ।

किञ्च येन सह नियतः सम्बन्धः वर्तते तस्यैव बोधनमाक्षेपेण क्रियते - अतः प्रत्ययोपस्थिता सङ्ख्या प्रथमोपस्थिते कर्तरि एव अन्वेति । अतः भावना करणत्वादिकं न आक्षिपतीति तद्वाचकतृतीयादिविभक्तयः अपेक्षन्ते । किञ्च आख्यातश्रवणं विनापि तृतीयादिश्रवणे करणत्वादिप्रतीतिः यदा भवति तदा तृतीयादिष्वपि करणत्वादिप्रतिपादकशक्तिरस्तीति करणत्वादिनैव ज्ञायते ।

अपि च कर्ता च आक्षेपलभ्यः अतः अशाब्दः सङ्ख्या तु प्रत्ययात् प्रतीयते इति शाब्दी - यदि सङ्ख्यायाः कर्तरि अन्वयः उच्यते - सङ्ख्या शाब्दी पदजन्यपदोपस्थितिविषयः, कर्ता तु न तथा । तर्हि कर्त्रा सह तस्याः न हि शाब्दमशाब्देनान्वेतीति न्यायविरोधात् कथमन्वय इति आक्षेपस्य समाधानं तु इत्थम् - आक्षेपलभ्यः कर्ता यः सः आख्यातस्य लक्ष्यार्थः । आख्यातस्य कर्तरि लक्षणा अङ्गीक्रियते । लक्षणावृत्त्या कर्ता उपस्थितो भवतीति सङ्ख्यायाः कर्त्रा सह अन्वयः न न्यायविरुद्धः । तस्मादेव देवदत्तः पचतीति सामानाधिकरण्यमपि उपपद्यते ।


ISSN: 2320-740X

सम्प्रति आख्यातवाच्यः कर्ता इति यदि कथ्यते तदा शक्त्या कर्तुः प्राप्तिः, आक्षेपलभ्यः इति कथ्यमाने लक्षणया इति स्थितौ शक्तिः स्वीकार्या उत लक्षणा इति सन्देहे - अनन्यलभ्यः शब्दार्थः इति न्यायेन सः अन्यलभ्यः इति लक्ष्यार्थ एव न तु वाच्यार्थः । अन्यथा सिंहो देवदत्तः इत्यादावपि शक्तिः स्वीकार्या यया सामानाधिकरण्यं स्यात् यन्न स्वीक्रियते तत्र गौणार्थेनैव सामानाधिकरण्यमुच्यते तथैव देवदत्तः पचतीत्यादौ सामानाधिकरण्ये लक्ष्यार्थं स्वीकृत्यापि उपपादयितुं शक्यते । किञ्च आख्यातस्य प्रथमान्तस्य च सामानाधिकरण्यं कथयतामपि सामानाधिकरण्यं न मुख्यम् । देवदत्तः पचति इति यत् सामानाधिकरण्यं तत् देवदत्तपदेन व्यक्तिविशेषः उच्यते पचति इत्यनेन कर्तृत्वरूपधर्मः कथ्यते । तदा च कर्तृत्वरूपधर्मस्य आश्रयो भवति देवदत्तः। तदा धर्मधर्मिवाचकयोः सामानाधिकरण्यं कथं वा स्यात् इति प्रश्ने लक्षणयैव निर्वाह्यं भवति कर्तृशक्तिः वाच्यार्थः तदाश्रये लक्षणा कर्तव्या ततःपरमभेदेन प्रथमान्तपदार्थस्यान्वयो भवति - सामानाधिकरण्यं लाक्षणिकमेव । अतः उभयपक्षेऽपि तुल्यमिदमिति न दोषः ।

लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रविरोधस्यायं परिहारः - अनेन सूत्रेन वाच्ये कर्तरि लकारो भवतीति न कोऽपि निर्बन्धः वर्तते अथवा न तस्य लक्ष्यं तत् । वाच्यवाचकभावनिर्णयार्थं नेदं सूत्रं प्रवृत्तं किन्तु कर्तुरेकत्वे एकवचनात्मको लकारः इत्यस्मिन्नर्थे प्रमाणम् । **द्व्येकयोर्द्विवचनैकवचने, बहुषु बहुवचनम्** इत्यनेन सूत्राणामेकवाक्यत्वं सिद्ध्यति ।

कर्त्रनभिधाने देवदत्तेन पचतीति तृतीयापत्तिः प्रदर्शिता तस्याः समाधानं तु एवम् - तत्र देवदत्तेन इत्यत्र कर्तृत्वं सङ्ख्या चेति द्वयं कथ्यते - परन्तु अत्र तृतीयया वक्तव्यं किमपि नावशिष्यते एतदुभयमपि लब्धमेव । कर्तरि प्रयोगे आख्यातेन एकवचनरूपेण कर्तृगत-एकत्वसङ्ख्यैव प्रतीयते कर्तृत्वमपि लक्षणयैव बोधितम् । अतः तृतीयायाः कार्याभावात् न प्रयुज्यते सा, प्रथमैव भवति ।

यदा आख्यातेन कर्ता, तद्गतसङ्ख्या वा न उच्यते तदा देवदत्तेन पच्यते इति साधुः प्रयोग एव प्रयुज्यते । एवं देवदत्तः पचतीत्यत्र आख्यातस्य कर्तरि लक्षणा स्वीक्रियते तदा देवदत्तपदोत्तरं तृतीया न भवति तृतीयया प्राप्तव्याः सर्वे अर्थाः प्राप्ता इति तृतीया निरर्थिका, प्रथमैव भवति इति न कश्चिद्विरोधः । अतः

**सङ्ख्यायां कारके वा धीर्विभक्त्या हि प्रवर्तते ।**
**उभयं चात्र तत्सिद्धं भावना तिङ्विभक्तितः ॥**

एवं च कर्तुः आख्यातवाच्यत्वाङ्गीकारे न कोऽपि दोषः अतः आख्यातस्य भावनावाचित्वमेवेति आख्यातवाच्या भावना, आक्षेपलभ्यः कर्ता इति पक्षः समीचीन इति सर्वं सुमङ्गलम् ॥

**आकरग्रन्थाः**

मीमांसान्यायप्रकाशः
तन्त्रवार्तिकम्
मीमांसा - उद्धरणकोषः
मीमांसाकौस्तुभः
अष्टाध्यायी

**********


ISSN: 2320-740X

# समावेशितशिक्षायाः स्वरूपविमर्शः

**डा. चन्द्रकान्तः**
शिक्षाविभागाध्यक्षः

भारतदेशः विविधतायामेकतां प्राप्य प्रपञ्चे विराजमानः देशः वर्तते । वसुधैव कुटुम्बकमिति मन्यमानः समाजः अस्मिन् देशे वसति । देशेऽस्मिन् शिक्षणस्य इतिहासोऽपि वैविध्यपूर्णः वर्तते । शिक्षायामपि कालानुसारं परिवर्तनं सम्पद्य समाजे विद्यमानान् सर्वानपि मुख्यधारायां समावेशयितुं निरन्तरं प्रयत्नः देशेऽस्मिन् क्रियमाणो विद्यते। समाजे विद्यमानाः सर्वेऽपि शिक्षां प्राप्नुयुरिति मुखयं लक्ष्यं भवति । देशस्य भविष्यं बालानां श्रेयसि निहितं वर्तते यतो हि अधुनातनबाला एव भाविनि काले देशस्य नेतारः भविष्यन्ति । शारीरिकरूपेण मानसिकरूपेण च स्वस्थानां बालानां अधिगमे दिव्याङ्गानामधिगमे च महदन्तरं वरीवर्ति । एतन्मनसि निधाय सर्वकारः शिक्षाविद्भिः सह चिन्तनं मन्थनं च विधाय तादृशानां दिव्याङ्गानां श्रेयोऽभिवृध्यर्थं समन्वयात्मिकां समावेशितशिक्षां कार्यान्वयनार्थं समानयनत् । एवं सति समावेशितशिक्षा नाम का ? ग्रामीणप्रदेशे अस्याः स्वादं बालाः प्राप्नुवन् वा ? इत्यादिप्रश्नाः मुखरिताः भवन्ति । विशेषावश्यकताः बाला अपि सामान्यबालैः सह विकासं प्राप्तुमपेक्षितं वातावरणं संस्थाभिः प्रकल्पनीयमस्ति । अपि च दिव्याङ्गाः बालाः अपि यथा सामान्यबालेभ्यः दीयमानं सौलभ्यम्, एतैः प्राप्यमाणम् अनुभवमपि प्राप्नुयुः तथा पूरकान् शैक्षिककार्यकलापान् समायोज्य सर्वसाधारणवातावरणं प्रकल्पनीयमस्ति ।

## समावेशितशिक्षायाः पृष्ठभूमिः

शिक्षणे समन्वयस्य चिन्तनं वा समन्वयात्मकशिक्षणस्य चिन्तनं वा केवलमाधुनिकं नास्ति । प्राचीन कालेऽपि अस्य चिन्तनस्य फलरूपं शिक्षणम् आसीदिति सोदाहरणं प्रतिपादयितुं शक्नुमः । धृतराष्ट्रमहाराजः पूर्णान्धिस्सन् अपि सर्वैरन्यैः समकक्षः युद्धविशारदः आसीदिति श्रूयते । तथापि अनादिकालादारभ्य विकलाङ्गता सर्वदा मनुकुलं पीडयन्ती समस्या वर्तते । नागरिकतायाः विकासेन सह मानवमनोभावाः परिवर्तनमावहन्तः समागताः सन्ति । साम्प्रतिके काले विकलाङ्गानां कृते समुचितमार्गदर्शनं दीयते चेत् समाजे तेऽपि विकलङ्गाः सकलाङ्गवत् जीवितुमर्हन्ति इति भावः समुत्पन्नः । अस्यां दिशि भारतसर्वकारः विकलाङ्गानां कृते आवश्यकानि संसाधनानि दत्वा, सुन्दरजीवनं यापयितुं स्वस्थवातावरणेन सह समाजस्य मुख्यधारायां भागभागित्वप्रदाने कटिबद्धो वर्तते । 1961 तमे वर्षे समेभ्यः शिक्षणप्रदानार्थं नीतिः या समागता तदनन्तरं दिव्याङ्गानां कृते

विशेषविद्यालयाः समारभन्त । परन्तु एतेषु विशेषविद्यालयेषु अधिकधनव्ययस्य कारणात् अत्यल्पसंख्यायां छात्राः शिक्षणं प्राप्नुवन्ति स्म । अतः शिक्षणेन वञ्चितानां संख्या एव महती आसीत् । निर्धनानां, मध्यमवर्गाणां कृते खपुष्पमिव एते विद्यालयाः आसन् । एतदवगत्य सर्वकारः 1970 तमे वर्षे समन्वयशिक्षणयोजनां समानयत् । 1977 तमवर्षस्य संसदधिवेशने "विश्वाङ्गविकलदिनाचरणा"र्थं प्रस्तावः कृतः । 1978-79 तमे वर्षे संसदधिवेशनसन्दर्भे विकलाङ्गकल्याणकार्यक्रमः समानतायाः सिद्धान्ताधारेण समनुष्ठितः । 1981 तमे वर्षे समग्रविश्वे अन्तराष्ट्रियविकलाङ्गानां वर्षत्वेन समुद्घोषणा अभूत् । 1982 तमे वर्षे विश्वव्यापि विकलाङ्गविकासकार्यक्रमस्य करपुस्तिकायाः विमोचनम् अभूत् । 1982 तः 1992 पर्यन्तं विकलाङ्गदशकमित्येव उद्घोषणमभूत् । 1993 तमे वर्षे विश्वसंस्थया विकलाङ्गानां स्थानमानस्य अधिकारस्य च अन्ताराष्ट्रियस्तरे नियमानाम् एकरूपता समानयनार्थं निर्णयः विहितः । 1993 तः 2002 वर्षपर्यन्तं एषिया फेसिफिक् विकलाङ्गवर्षमिति आघोषणमभूत् । एतदर्थं भारते संविधानस्य 86 तमः परिष्कारः चतुर्दशायुपर्यन्तं समेषां बालानामुचितम् अनिवार्यञ्च शिक्षणं समानयत् । अस्मिन् परिष्कारे विकलाङ्गानमपि अन्तर्भावः विहितो वर्तते । 1992 तमस्य भारतीयपुनर्वसतिपरिषदः नियमानुसारं विकलाङ्गानां बालानां कृते विशेषरूपेण प्रशिक्षितैः शिक्षकैः बोधनव्यवस्थापि प्राकल्पि । 1995 तमवर्षस्य विकलाङ्गानां नीतेरनुगुणं अष्टादशायुपर्यन्तं तत्तादृशेभ्यः विकलाङ्गबालेभ्यः तेषामवश्यकतानुसारं शिक्षणव्यवस्था भवेदिति नीतिः समानीता वर्तते । इत्थं समावेशितशिक्षायाः विकासः समजायत । समुचितपरिसरे विकलाङ्गानां सर्वैः बालैः सह आवश्यकतानुसारं शिक्षणावसरस्य प्रकल्पनमस्याः समावेशितशिक्षायाः लक्ष्यं वर्तते ।

## समावेशितशिक्षायाः आकारः

- **आवासव्यवस्थारहित विशेषविद्यालयः**

अधिकाङ्गन्यूनतावद्भ्यः बालेभ्यः तेषां विकलतानुसारं विद्यालयान् परिकल्प्य, विशिष्टपाठ्यक्रमस्य विशिष्टबोधनपद्धतेः, सहगामिक्रियाकलापानां समायोजनमुखेन मूलभूतशिक्षणं दीयते । विद्यालयसमयानन्तरं एते विकलाङ्गाः बालाः अपि सामान्यछात्रवत् स्वगृहं प्रति गमिष्यन्ति । अनेन विद्यालयवातावरणगृहवातावरणयोः अधिकाधिकसमन्वयः सम्पाद्यते ।

- **विशेषकक्ष्याः**

कक्ष्याध्यापकः विशिष्टप्रशिक्षणयुतानां शिक्षकाणां सहायेन सामान्यविद्यालये एव विशिष्टवर्गसञ्चालनस्य योजना भवति । विशेषरूपेण वैयक्तिकावधानमत्र प्रकल्प्यते । बालकस्य न्यूनताः पूरयितुमपेक्षितानि साधनानि



ISSN: 2320-740X

अत्र व्यवस्थापितानि भवन्ति ।

▪ **सुसज्जितकक्ष्याप्रकोष्ठः**

विकलाङ्गबालकोऽपि सर्वसामान्यकक्ष्यायाः पूर्णावधिछात्रः भवति । यदा आवश्यकता भवति तदा सम्पत्पूर्णं संसाधनयुतं प्रकोष्ठं प्रति नीत्वा न्यूनतानुसारं साधनानामायोजनं विधाय घण्टामेकां वा घण्टाद्वयं तत्र बोधनव्यवस्थापनम् एव सुसज्जितकक्ष्याप्रकोष्ठः भवति ।

▪ **सञ्चारी शिक्षकः**

सामान्यविद्यालयेषु शिक्षकाः यदा विशेषावश्यकतां बालानां न्यूनताः पूरयितुं असमर्थाः जायन्ते तदा विशेषप्रशिक्षितशिक्षकानाहूय विशेषावश्यकतावतां कृते अधिगमे सौविद्यप्रकल्पनमित्यस्यार्थः ।

▪ **सम्मिश्ररूपी**

सम्पत्पूर्णप्रकोष्ठयोजनायाः सञ्चारीशिक्षकयोजनायाः च मिश्रितरूपेण व्यवस्थाप्रकल्पनमेवास्ति अस्याकारः । बहुविधकार्यकलापाः योजनाश्चास्मिन् सम्मिलिताः भवन्ति ।

▪ **विशेषैक्यता**

विशेषावश्यकतायुतायां बालानां कृते सामान्यबालैः सह सर्वसाधारणपाठ्यक्रमं बोधयन्ति शिक्षकाः । पुनश्च ते एव शिक्षकाः विशेषाधिगमसामग्रीः परिकल्प्य बोधनं कर्तुं प्रयतन्तेऽत्र इति विशेषः ।

**विकलाङ्गानां बोधने शिक्षकैरनुभूयमानाः समस्याः**

1. सामान्यविद्यालये एव विकलाङ्गानामुपरि वैयक्तिकावधानस्य समस्या ।
2. विकलाङ्गबालेषु सकलाङ्गबालेषु च परस्पराधिगमैक्यतायाः समानबोधनस्य च सम्बन्धप्रकल्पनस्य समस्या ।
3. समानपाठ्यक्रमस्य युगपत् बोधनस्य समस्या ।
4. विकलाङ्गानामभिभावकानां मनः परिवर्तनम्, नकारात्मकभावस्य सकारात्मकरूपेण परिवर्तनम् ।
5. निरन्तरोपस्थितेः परिपालनसमस्या ।
6. सर्वत्र विद्यालयेषु साधनानामभावः ।

एवञ्च यथाकथमपि सर्वेषु बालकेषु समताभावस्य समुत्पादनेन सह समानशिक्षणव्यवस्थाप्रकल्पनमेव समावेशितशिक्षायाः सम्प्रत्ययः वर्तते ।

**सहायकग्रन्थसूची**


1. डा. एन्. बि. कोङ्गवाड (2006) प्रगतिशील भारतदल्लिशिक्षण विद्यानिधि प्रकाशन गदग ।
2. डा. एस्. पी. गुप्ता (2010) उच्चतरशिक्षामनोविज्ञान शारदा पुस्तक भवन प्रयागराजः ।
3. सी. वि. म्यागेरी (2009) शैक्षणिक तन्त्रज्ञान – विद्यानिधिप्रकाशन गदग ।
4. Inclusive Education (2016) Dr. N. Laxmi - KSOU Mysore


**********


ISSN: 2320-740X

# सिद्धान्तलेशसङ्ग्रहे समुद्धृताः अप्रसिद्धाः ग्रन्थकाराः

**डा. गणेश ईश्वर भट्टः**
वेदान्तविभागाध्यक्षः

श्रीमदप्पय्यदीक्षिताः अद्वैतदर्शनान्तर्गतान् प्राचीनान् सिद्धान्तलेशान् सङ्कलयन्तः सिद्धान्तलेशसङ्ग्रहे प्राचीनानां बहूनाम् आचार्याणां मतं प्रदर्शयामासुः । तेषु सूक्ष्माणां सिद्धान्तभेदानाम् अप्रसिद्धावपि बहवः ग्रन्थाः ग्रन्थकाराश्च प्रसिद्धाः । किन्तु अन्ये केचित् विद्वन्निकाये अध्ययनाध्यापनपरम्परायां च अप्रसिद्धाः । ग्रन्थस्य पठनकाले अध्येतॄणां सहजतः एतेषां देशकालकृत्यादिषु जिज्ञासा जायते । अतः तान् ग्रन्थान् ग्रन्थकारांश्च अधिकृत्य कश्चिद्विचारः अत्र प्रस्तूयते ।

**अद्वैतविद्याचार्याः** -

ग्रन्थे अनेकत्र **अद्वैतविद्याचार्यास्तु** इत्युल्लेखपूर्वकम् एतेषाम् आचार्याणां मतम् उद्ध्रियते । यथा - संसारदशायाम् आत्मनः स्वरूपभूतस्य आनन्दस्य प्रकाशमानत्वे, मुक्तिसंसारयोः अविशेषप्रसङ्गः इति प्राप्ते एतेषाम् मतं दीक्षितैः सिद्धान्तरूपेण प्रदर्शितम् - संसारदशायाम् अध्यस्तापकर्षतारतम्यप्रयुक्तम् आनन्दस्य सातिशयत्वम्, मुक्तौ निखिलापकर्षनिवृत्तेः निरतिशयत्वम् इति । यथा वा ज्ञानगतापरोक्ष्यनिरूपणावसरे तत्तद्व्यवहारानुकूलार्थाभेदः ज्ञानापरोक्ष्यम् इति एतेषां मतं प्रपञ्चितम् । एते के, एतेषां ग्रन्थः कः इति विचारयामः ।

केचिदाहुः - अप्पय्यदीक्षितानां अद्वैतविद्यायाः गुरवः स्वयं पितृचरणा एव । ज्ञापितं च दीक्षितैः आरम्भ एव **तातचरणव्याख्यावचःख्यापितान्** इति वदद्भिः । मम पितृचरणैः अध्यापनावसरे ये सिद्धान्तभेदाः ज्ञापिताः, तान् अहं अपेक्षितोपपादनपूर्वकं सङ्कलयामि इति तैः प्रतिज्ञातम् । दीक्षितानां तातचरणानां तेषां नाम श्रीरङ्गराजाध्वरिः इति । शास्त्रेषु नदीष्णास्ते कर्मठा अपि आसन् । श्रौतयज्ञाः तैः नैके अनुष्ठिताः । स्वयं दीक्षितैः अस्य ग्रन्थस्य अन्ते विषयोऽयं ज्ञापितः -

**विद्वद्गुरोर्विहितविश्वजिदध्वरस्य**
**श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।**
**श्रीरङ्गराजमखिनः श्रितचन्द्रमौलेः**
**अस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥** इति ।

न्यायरक्षामणेः उपक्रमेऽप्युक्तम् -

**यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षात्**
**तद्दर्शनादखिलदर्शनपारभाजः ।**
**तं सर्ववेदसमशेषबुधाधिराजम्**
**श्रीरङ्गराजमखिनं गुरुमानतोऽस्मि ॥** इति ।

परिमलस्य समाप्तौ क्वचित् **श्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिसूनोः अप्पयदीक्षितस्य** इति पुष्पिका दृश्यते । प्रथमाध्यायस्य तृतीयपादस्यान्तेऽपि एवमेव दीक्षितैः सन्दृब्धम् -

**वैकुण्ठाचार्यवंशाम्बुधिहिमकिरणश्रीमदद्वैतविद्या -**
**चार्यश्रीरङ्गराजाह्वयविसृतयशोविश्वजिद्याजिसूनोः ॥** इति ।

एतैः श्रीरङ्गराजमखिभिः अद्वैतविद्यामुकुरः विवरणदर्पणश्चेति ग्रन्थद्वयं लिखितमासीत्, यदिदानीं केवलं मातृकारूपेण अपूर्णतया उपलभ्यते । तथा च दीक्षिताः एतान् स्वस्य अद्वैतविद्यागुरून् पितृचरणान् अद्वैतविद्याचार्या इति निरदिशन् इति केचित् ।

एतदपेक्षया अत्र मतान्तरं पश्यामः - द्रविडदेशे तञ्जावूरुनगरे अच्युतनायकः रघुनाथनायकः चेति द्वौ राजानौ बभूवतुः । तयोः मन्त्रिणः अनेकशास्त्रपटवः श्रौतकर्मनिष्ठाः वैदिकधर्मसमुद्धारकाः प्रसिद्धाः गोविन्ददीक्षितनामानः । इमे सङ्गीतशास्त्रज्ञा अपि । एतैः सङ्गीतसुधानिधिः इति ग्रन्थोऽपि लिखितः, यस्य स्वयम् अप्पय्यदीक्षिताः एव व्याख्यानमकार्षुः इति प्रथा वर्तते । एतैः कुमारिलदर्शनं सुन्दरकाण्डव्याख्यानं च विरचितमिति ज्ञायते । किन्तु इदं ग्रन्थद्वयं नोपलभ्यते । एते होय्सळकर्णाटकब्राह्मण इति समुदायादागताः । तञ्जावूरुसमीपस्थे पट्टिश्वरम् इति ग्रामे एते बभूवुः, यत्र इदानीमपि सपत्नीकानाम् अमीषां विग्रहं मन्दिरे जनाः पूजयन्ति । एतेषाम् अप्पय्यदीक्षितानां च कालः समानः अर्थात् षोडशशतकम् । एवं कथा श्रूयते- कदाचिदेते शिष्येभ्यः कल्पतरुग्रन्थं पाठयन्त आसन् । तस्मिन् ग्रन्थे नैकत्र काठिन्यं तैः अनुभूतम् । तदा तत्र समीपे अप्पय्यदीक्षिताः गच्छन्त आसन् । ते गोविन्ददीक्षितानां समीपमागत्य सर्वमपि कल्पतरुग्रन्थस्य काठिन्यं न्यवारयन्। तदा चकिताः सन्तुष्टाश्च गोविन्ददीक्षिताः एवमूचुः -

**अप्पदीक्षित ! किमित्यतिस्तुतिं वर्णयामि भवतो वदान्यताम् ।**
**सोऽपि कल्पतरुरर्थसिद्धये त्वद्गिरामवसरं प्रतीक्षते ॥** इति ।


ISSN: 2320-740X

अत्र कल्पतरुपदं अर्थपदं च श्लिष्टम् । एकत्र देववृक्षः कल्पतरुः, अर्थः च सम्पत् । अन्यस्मिन् पक्षे कल्पतरुः ग्रन्थः, अर्थः तु शब्दार्थः इति ज्ञेयम् । स्वयं सर्वार्थसाधकः कल्पतरुः अपि त्वाम् अपेक्षते इति विशेषः अत्र व्यञ्जितः ।

इमे च गोविन्ददीक्षिताः अद्वैतविद्याचार्य इति प्रथिताः । तथा च राजचूडामणिदीक्षितनामा मीमांसकः तन्त्रशिखामणिग्रन्थे स्वगुरुं गोविन्ददीक्षितानां पुत्रं वेङ्कटमखिनं एवं संस्मरति - **श्रीमदद्वैतविद्याचार्यसर्वतन्त्र-स्वतन्त्रसाग्निचित्सर्वतोमुखसाग्निचित्याप्तवाजपेययाजिश्रीगोविन्ददीक्षितसूनोः** इति । अत्र गोविन्ददीक्षिता अद्वैतविद्याचार्य इत्युल्लिखिताः । एत एव अप्पय्यदीक्षितैः निर्दिष्टा अद्वैतविद्याचार्या इत्यन्यः पक्षः ।

**तत्त्वशुद्धिकाराः –**

तत्त्वशुद्धिः इति षट्चत्वारिंशत्प्रकरणोपेतः ग्रन्थः । अस्य ग्रन्थस्य कर्तारः ज्ञानघननामानः । इमे चित्सुखाचार्याणां परमगुरवः । एते प्रायः दशमशतके आसन् । एतेषां ग्रन्थस्य उत्तमज्ञयतिः व्याख्यामकरोत्, यः पञ्चपादिकायाः वक्तव्यकाशिका इति व्याख्यामपि लिलेख, यया व्याख्यया सहिता पञ्चपादिका शृङ्गेरीमठात् मुद्रिताऽस्ति । ब्रह्मणः सर्वज्ञत्वोपपादनावसरे एतेषां मतमुद्धृतम् । द्वितीये परिच्छेदे, प्रत्यक्षं घटादिगतसत्त्वमेव गृह्णाति इति अद्वैतब्रह्मश्रुतेः नास्ति प्रत्यक्षविरोधः इति वदताम् एतेषां मतं दर्शितम् ।

**कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायाः -**

भ्रमस्थले इदमाकारवृत्तेः अज्ञाननिवर्तकत्वमस्ति न वेति विचारावसरे, कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्याया इति नाम आयाति, ये रजताकारवृत्तेः पूर्वम् इदमाकारवृत्तिमेव नाङ्गीकुर्वन्ति । एतेषां विषये कुत्रापि प्रामाणिकं विवरणं नोपलभ्यते । कश्चित् विमर्शकः लिखति– अध्यासनिरूपणावसरे भामत्याम् अधिष्ठानज्ञानस्य अध्यसकारणत्वम् उपपादितम् इति हेतोः कवितार्किकैः निरस्यमानाः भामतीकाराः इति । गन्जाम् इति आन्ध्रदेशीयस्थे कस्मिंश्चित् देवालये विद्यमानं शिलाशासनम् आश्रित्य स एतेषां कालः त्रयोदशशतकम् इत्यूहते । किन्तु तत्र विश्वासार्हः आधारः कोऽपि नास्ति ।

**सिद्धान्तमुक्तावलीकाराः –**

एतेषां मतम् एकजीववादे दृष्टिसृष्टिवादे चायाति । एते न न्यायसिद्धान्तमुक्तावलीकाराः । वेदान्तसिद्धन्तमुक्तावली इति कश्चन ग्रन्थः । तस्य कर्तारः इमे प्रकाशानन्दनामानः । अद्वैतदीपिकाप्रभृतीनां ग्रन्थानां ये कर्तारः नृसिंहाश्रमिश्रीचरणाः, तेषां समकालिकाः इमे । अर्थात् एते षोडशशतकस्य उत्तरभागे जनिमलभन्त । ये

विवरणादिग्रन्थेषु तत्तत्प्रक्रियानिर्वाहाय सत्तात्रैविध्यम्, मायाया उपादानत्वम् इत्यादयः विषयाः निरूपिताः, तान् सर्वान् एते खण्डयन्ति । जगन्मिथ्यात्ववादिभिरपि प्रबोधपर्यन्तं जगतः अनुवर्तमानत्वात् प्रक्रियानिर्वाहाय अनेके विषयाः व्यावहारिकतया अङ्गीकृताः । किन्तु एते वदन्ति- जाग्रत्कालिकः अपि प्रपञ्चः स्वप्नतुल्यः, तादृशस्य अस्य उपपादनं किमर्थम् इति । अतः बन्धमोक्षव्यवस्था, कार्यकारणभावः इत्यादिविषयेषु आदरम् अकृत्वा ज्ञानस्वरूपं निष्प्रपञ्चं ब्रह्मैव परमार्थ इति एते सिद्धान्तं स्थापयामासुः । **अत्र च सम्भावितसकलशङ्कापङ्कप्रक्षालनं स्वप्नदृष्टान्तसलिलधारयैव कर्तव्यम्** इति एतेषां दृढः निश्चयः ।

**कौमुदीकाराः –**

ब्रह्मणः सर्वज्ञत्वनिरूपणावसरे **कौमुदीकृतस्तु वदन्ति** इति वाक्ये कौमुदीकाराः उद्धृताः । कौमुदीकारा एते रामाद्वयनामानः वेदान्तकौमुदी इत्यस्य ग्रन्थस्य कर्तारः । अस्मिन् ग्रन्थे चतुस्सूत्रीव्याख्यानरूपाणि चत्वारि प्रकरणानि सन्ति । विवरणप्रस्थानानुसारी अयं ग्रन्थः मद्रास् विश्वविद्यालयात् मुद्रितः ।

**प्रकटार्थविवरणकाराः -**

प्रकटार्थविवरणम् इति शारीरकभाष्यस्य प्राचीना व्याख्या । अस्य व्याख्यानस्य कर्तृणां नाम निश्चिततया न ज्ञायते चेदपि अनुभूतिस्वरूपाचार्या इति बहवः मन्यन्ते । एते प्रायः द्वादशशतके आसन् । न्यायशास्त्रे पटव एते श्रीहर्षकृतखण्डनखण्डखाद्यस्य व्याख्याम् अकुर्वन् । एते विवरणप्रस्थानानुगामिनः । विवरणे निगूढः अर्थः अत्र प्रकटरूपेण विद्यते इति अन्वर्थनामाऽयं ग्रन्थः । स्वयमेव ग्रन्थकारैः ग्रन्थादौ इदमुक्तम्-

**ज्ञात्वाऽपि यस्य बहुकालमचिन्तनेन**
**व्याख्यातुमक्षमतया परितापि चेतः ।**
**तस्योपतापहरणाय मयेह भाष्ये**
**प्रारभ्यते विवरणं प्रकटार्थमेतत् ॥** इति ।

बहुत्र भामतीमतम् एतैः खण्ड्यते । एतैः कृतानां दूषणानां कल्पतरुकारैः समाधानं विहितम् । एतैः सर्वासाम् उपनिषदां व्याख्यानं व्यरचीति ज्ञायते । किन्तु तद्व्याख्यानं किमपि नोपलभ्यते । एतैः प्रमाणरत्नमालाव्याख्या, गौडपादीयभाष्यटिप्पणी, गौडपादीयविवेकः, न्यायमकरन्दव्याख्या, न्यायरत्नदीपावल्याः चन्द्रिकाव्याख्या, भगवद्गीताभाष्यटिप्पणी, सारस्वतचन्द्रिका चेति ग्रन्थाः प्रणीताः ।

**पदार्थतत्त्वनिर्णयकाराः-**


ISSN: 2320-740X

मायायाः जगत्कारणत्ववादिश्रुत्यर्थविचारावसरे ब्रह्म माया चेत्युभयमपि कारणम् इति वदताम् एतेषां मतम् उद्धृतम् । आनन्दानुभव इति एतेषां नाम । एतेषां कालः द्वादशशतकम् । एते कर्णाटकीया इति विमर्शकैः ऊहितम् । एतैः पदार्थतत्त्वनिर्णयः इष्टसिद्धिविवरणम् न्यायरत्नावली चेति ग्रन्थाः रचिताः । पदार्थतत्त्वनिर्णये वैशेषिकाभिमतान् पदार्थान् निरूप्य तेषां भेदः खण्डितः ।

**न्यायचन्द्रिकाकृतः-**

धारावाहिकज्ञानस्थले द्वितीयादिज्ञानानां सार्थक्यस्य उपपादनावसरे एतेषां नाम उल्लिखितम् । एतन्मतानुसारम्, धारावाहिकज्ञानस्थले द्वितीयादिज्ञानानामपि अज्ञाननिवर्तकत्वमेव, न तु अज्ञानतिरस्कर्तृत्वम् । एतेषां नाम आनन्दपूर्ण इति । स्वीयग्रन्थेषु गोकर्णक्षेत्रस्य स्मरणात् एते तत्प्रदेशीया इति सम्भाव्यते । त्रयोदशशतकम् एतेषां कालः । एतैः न्यायकल्पलतिकाप्रभृतयः नव ग्रन्थाः विरचिताः । तत्र न्यायचन्द्रिकाग्रन्थः परिच्छेदचतुष्टयात्मकः, यत्र तार्किकादिमतखण्डनपुरस्सरं प्रमाणानां लक्षणं प्रतिपादितम् ।

**न्यायसुधाकाराः –**

उत्तमश्लोक इति एतेषां नाम सम्भाव्यते । द्वितीयपरिच्छेदे, सन् घट इत्यादौ अधिष्ठानसत्तानुवेधः इति एतेषां मतमुद्धृतम् । एतेषां विषये अधिकं विवरणं नोपलभ्यते । एतावत्तु शक्यं वक्तुम्- वाराणसीयः शुद्धानन्दस्य शिष्यः उत्तमश्लोकः वेदान्तसूत्रवार्तिकनामानं ग्रन्थं निर्ममे, यत्र अधिकरणार्थः श्लोकरूपेण सङ्गृहीतः । ग्रन्थकारेण तस्य स्वोपज्ञव्याख्या रचिता न्यायसुधा इति । शुद्धानन्दः आनन्दगिर्याचार्यस्य गुरुः । अतः अस्य कालः त्रयोदशशतकम् ।

तदेवं यथामति अप्रसिद्धानां प्राचीनानाम् अद्वैतिनां तेषां ग्रन्थानां च विषये अवलोकनं कृतम् । अन्ये तु सिद्धान्तलेशसङ्ग्रहे उद्धृताः ग्रन्थकाराः प्रसिद्धा एवेति न तत्र किञ्चिद्वक्तव्यमस्ति इति शम् ।

**आधारग्रन्थाः-**

१. अद्वैतग्रन्थकोशः, देववाणीपरिषत्, कल्कत्ता

२. अद्वैतवेदान्तसाहित्येतिहासकोशः, आर्. तङ्गस्वामी, मद्रास् विश्वविद्यालयः, १९८०

३. सिद्धान्तलेशसङ्ग्रहहः, भावूशास्त्री वझे, चौखम्बा संस्कृतसंस्थानम्

४. न्यायरक्षामणिः, नन्दकुमार ब्रदर्स्, मैसूरु, २००७

५. ब्रह्मसूत्रशाङ्करभाष्यम्, भामतीकल्पतरुपरिमलोपेतम्, राष्ट्रियसंस्कृतसंस्थानम्

**********

# न कर्मधारयान्मत्वर्थीयः

**डा. चन्द्रशेखरभट्टः**

सहायकाचार्यः, व्याकरणविभागः

नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासम्प्रदायकर्तृभ्यो वंशर्षिभ्यो नमो महद्भ्यो गुरुभ्यः । 'शब्दसाधुत्वविषया सैषा व्याकरणस्मृतिः'[1] इति हर्युक्तदिशा साधुशब्दानपशब्देभ्यो विविच्य बोधयितुं प्रवृत्तिर्व्याकरणस्य । अत एव शब्दानुशासनमित्यन्वर्थं नामास्य । अथ किं नाम साधुत्वम् ? व्याकरणनियमान्वितत्वम् । व्यकरणनियमान्वितत्वं च केषाम् ? शिष्टप्रयुक्तानाम् । के च ते शिष्टाः ? पुण्यभूमावस्यां निवसन्ति ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण सर्वविद्यायाः पारङ्गतास्तत्र भवन्तः शिष्टाः[2] । अथेदानीं व्यर्थं व्याकरणम् स्यात्, शिष्टप्रयोगादेव साधुशब्दावगतेः । नैष दोषः। शिष्टपरिज्ञानार्थं व्याकरणम् । शिष्टप्रयुक्तान् शब्दाननेनाभ्युपायेन प्रतिपद्यामहे । तस्मादत्यर्थमावश्यकता व्याकरणज्ञानस्य । एवञ्च शिष्टप्रयुक्तत्वे सति व्याकरणानुगतत्वं साधुत्वमिति पर्यवसन्नम् ।

इह केचन शब्दाः व्यवहारकाले केषाञ्चिन्मुखात् स्वैरं निस्सरन्ति । यथा – पलितकेशी, अरूपी, दृढसङ्कल्पवती, सूक्ष्मेक्षिकावद्भिर्महर्षिभिः, चारुरूपवत्यः कन्यकाः इत्यादि । किमेतेषामस्ति साधुत्वम् ? पलितकेशः अरूपः इत्यादीनां तु साधुत्वं निर्विवादम् । इदमत्र वर्णो वर्णेन इति सूत्रभाष्यपर्यालोचनपूर्वकं विचार्यते । तत्र हि समानाधिकरणसमासाद्बहुव्रीहिर्विप्रतिषेधेन कदाचित्कर्मधारयः सर्वधनाद्यर्थः इति वार्तिकम् । अस्यायमर्थः – कर्मधारय[3]बहुव्रीह्योरेकस्मिन् लक्ष्ये समावेशे परत्वाद्बहुव्रीहिर्भवति । तथा हि वीरः पुरुषो वीरपुरुष इति मत्वर्थीयाविवक्षायां समानाधिकरणसमासो लब्धावकाशः । कण्ठे कालो यस्य सः कण्ठेकाल इत्यत्र बहुव्रीहिश्चरितार्थः । वीराः पुरुषा यस्मिन् स वीरपुरुषको ग्राम इत्यत्र कर्मधारयबहुव्रीह्योरुभयोः प्राप्तयोः बहुव्रीहिरेव भवति इति ।

कदाचित्कर्मधारयः सर्वधनाद्यर्थः इति वार्तिकशेषः । क्वचित्तु बहुव्रीहेः कर्मधारयो भवति सर्वधनाद्यर्थम् इति वक्तव्यम् । ननु सर्वं धनं सर्वधनमित्यत्र पूर्वोक्तरीत्या कर्मधारय एव भवति बहुव्रीहेरप्रसङ्गात् । सत्यम्,

[1] वाक्यपदीयम्

[2] पृषोदरादीनि यथोपदिष्टम् ६.३.१०९ म.भा.

[3] तत्पुरुषः समानाधिकरणः कर्मधारयः १.२.४२



ISSN: 2320-740X

मत्वर्थस्याविवक्षायामिदम् । यदा तु मत्वर्थो विवक्षितः तदास्त्येवोभयप्रसङ्गः, तत्र परत्वाद्बहुव्रीहिरेव स्यात् कर्मधारयस्य प्रवृत्त्यर्थं यत्न आस्थेय इत्यर्थः । यथा सर्वं धनस्यास्तीति सर्वधनी । सर्वबीजी, सर्वकेशी नटः, कृष्णसर्पवान् वल्मीकः, गौरखरवदरण्यम् इत्यादि । सर्वाणि धनानि सर्वधनानि, सर्वधनान्यस्य सन्ति सर्वधनी इति कर्मधारयात् मत्वर्थीयप्रत्ययोऽत्र विवक्षितः । नन्वत्र मा भून्नाम कर्मधारयः, बहुव्रीह्युत्तरं मत्वर्थीयेनोत्पत्तुं शक्यम् ? नैतदस्ति । बहुव्रीहिणैव मत्वर्थस्योक्तत्वात् उक्तार्थानमप्रयोग इति मत्वर्थीयो नोत्पद्येत । ननु यथैव बहुव्रीहिणोक्तत्वाद्धेतोः मत्वर्थीयो न प्राप्नोति तथैव कर्मधारये सत्यपि कर्मधारयेणोक्तत्वान्मत्वर्थीयो न प्राप्नोति । न हि बहुव्रीहिकर्मधारयसंज्ञामात्रेण स्वरव्यवस्थावत् पदार्थस्य अभिधानानभिधानव्यवस्था सेत्स्यति । अभिधानव्यवस्था तु स्वाभाविकी । अतः पक्षद्वयेऽपि दोषः सम इति परत्वात् बहुव्रीहिरेव न्याय्यः । नात्र विप्रतिषेधो युक्तः अन्तरङ्गत्वात् कर्मधारयस्य । कथमन्तरङ्गः कर्मधारयः ? अनपेक्षितान्यपदार्थे स्वपदार्थे तस्य विधानात् । एवमपि स्वपदार्थान्यपदार्थरूपविषयभेदेन कर्मधारयस्य वैकल्पिकत्वात् पक्षे वीरपुरुषको ग्राम इति बहुव्रीहिः सिद्ध्यत्येवेति चेत् उच्यते । कर्मधारयबहुव्रीह्योरुभयोः सिद्धौ यदा कर्मधारयः तदा कर्मधारयप्रकृतिभिः मत्वर्थीयैरभिधानरूपदोषस्तदवस्थ एव । तस्मान्नेदं वार्तिकं विप्रतिषेधोदाहरणप्रदर्शकं किन्तु अपूर्वार्थबोधनपरा इष्टिः । समानाधिकरणसमासाद्बहुव्रीहिरिष्टः । स्वपदार्थे विधीयमानस्य कर्मधारयस्यान्तरङ्गत्वेऽपि वीरपुरुषादौ प्रथममेव अन्यपदार्थो विवक्षणीयः । ततश्च बहुव्रीहिणोक्तत्वान्न ततो मत्वर्थीयः । एतद्वार्तिकसिद्धमेव प्रसिद्धं वचनं न कर्मधारयान्मत्वर्थीय इति । कदाचित्कर्मधारयः सर्वधनाद्यर्थः । सर्वधनी इत्यादिसिद्ध्यर्थं सर्वं धनं सर्वधनम् इति स्वपदार्थे समानाधिकरणसमासं विधाय पश्चात् सर्वधनमस्यास्तीत्यन्यपदार्थो विवक्षणीय इष्टानुरोधादित्यर्थः ।

यदीष्टिः नार्थोऽनेन । लोके हि सर्वे मनुष्या अल्पेनाल्पेन महतो महतोऽर्थानाकाङ्क्षन्ति । एकेन माषेण शतसहस्रम्[1], एकेन कुद्दालपदेन[2] खारीसहस्रम् । एवं च लाघवाद्बहुव्रीहिणा भाव्यम् । अयमाशयः – यदि कर्मधारयान्मत्वर्थीयः क्रियते तदा स्वपदार्थप्राधान्यमाश्रित्य कर्मधारयः कर्तव्यः,तेषामेव पदार्थानामन्यत्र गुणीभावमाश्रित्य मत्वर्थीय उत्पादनीय इति प्रतिपत्तिगौरवम् । पूर्वमेवान्यपदार्थविवक्षया बहुव्रीह्याश्रयणे तु वर्तिपदार्थानां गुणभाव एवाश्रयितव्य इति प्रतिपत्तिलाघवम् । किञ्च कर्मधारयान्मत्वर्थीये एकस्यैवार्थस्य प्रतिपादनाय वृत्तिद्वयापेक्षायां गरीयान् शब्दो बोधकः, बहुव्रीहौ त्वल्प इति शाब्दं लाघवमपि इति । एवञ्च न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः इति वचनं न्यायसिद्धमेव ।

ननु तर्हि कथं सर्वधनी, सर्वबीजी, सर्वकेशी नटः, कृष्णसर्पवान् वल्मीकः, गौरखरवदरण्यम्

---

1 शतं सहस्रं च । वस्त्राणि गा वा इत्यर्थः।

2 पर्वतीयाः प्रायेण कुद्दलैरेव भूकर्षणं कृत्वा सस्यादिकं सम्पादयन्तीति तद्व्यवहारानुसारेणेदम् ।

गौरमृगवदरण्यम् इत्यादिप्रयोगाणां साधुत्वम् ? अत्र भाष्यकृत् 'इनिप्रकरणे सर्वादिरिति वक्ष्यामि[1]' इति समादधौ । अत इनिठनौ (पा.सू.५.२.११५) इति सूत्रे सर्वधनादिशब्दान् पठित्वा सर्वधनीत्यादयः साध्याः । आश्रितेऽपि वार्तिके सर्वधनादिशब्देभ्यः ठनो निवृत्त्यर्थं वचन माश्रयणीयम् । अन्यथा सर्वधनिक इत्याद्यनिष्टापत्तिः ।

ननु चैवमपि गौरखरवदरण्यम्, गौरमृगवदरण्यम्, कृष्णसर्पवान् वल्मीकः, लोहितशालिमान् ग्रामः इत्यादिप्रयोगा दुरुपपादा इति चेदस्त्यत्र विषेशः – कृष्णसर्प इति जातिरभिधीयते । मत्वर्थस्य जात्याऽभिसम्बन्धः क्रियते । अत्र हि बहुव्रीह्याश्रयणे जातेरप्रतीतेः जातिविशेषस्य मत्वर्थसम्बन्धो बोधयितुमशक्य इत्यगत्या कर्मधारय एवाश्रयितव्यः । अतस्तत्र वृत्तिद्वयप्रयुक्तगौरवं सोढव्यम् । एवं च कृष्णसर्पवान् वल्मीक इत्यत्र कर्मधारयान्मतुप् । यदा तु जातिनैरपेक्ष्येण कृष्णगुणविशिष्टसर्पयुक्तेन कृष्णसर्पयोरभिसम्बन्धः क्रियते तदा तु कृष्णसर्पो वल्मीक इति बहुव्रीहिरेव । न कर्मधारयादित्यत्र कर्मधारयपदं नञ्तत्पुरुषस्याप्युपलक्षणम् । तेन असुखी, अदुःखी, तमः अरूपि द्रव्यम् इत्यादिप्रयोगा दुष्यन्ति । यद्यपि तद्धितान्तान्नञ्समास इति पक्षे प्रयोगोपपत्तिरस्त्येव तथापि ईदृशस्थले बहुव्रीहिरेव ज्यायान् । असुब्वत इति भाष्यप्रयोगात् नञ्तत्पुरुषादपि मत्वर्थीय इति लभ्यते चेदपि तथाविधा अस्मदादीनां प्रयोगा दुष्यन्त्येव । सर्वत्र तदाश्रयणे पूर्वोक्तनियमस्य वैयर्थ्यापत्तिश्चेति शिवम् ।

**********

[1] वर्णो वर्णेन २.१.६९ म.भा.


ISSN: 2320-740X

# भक्तिमार्गे यक्षगानस्य स्थानम्

**डा. राघवेन्द्रभट्टः**
साहित्यविभागाध्यक्षः

**कर्णाटकेषु भक्तिपरम्परा**

भारतवर्षे पुरुषार्थसाधनोपायत्वेन ज्ञानमार्गः कर्ममार्गः उपासनामार्गः भक्तिमार्गश्च लोककल्याणकारिभिर्महर्षिभिः प्रवर्तिताः । तत्र भक्तिमार्गः अन्यैः मार्गैः सह सम्पृक्तोऽस्तीति अस्य वर्तते इतरेभ्यो वैशिष्ट्यम् । **मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी** इति शङ्करभगवत्पादा आहुः । का नाम भक्तिरिति चेत् स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते इति ते वदन्ति । स्नेहो भक्तिरिति मध्वाचार्याः । भगवति पुरुषोत्तमे विद्यमानो भक्तस्य स्नेह एव भक्तिरिति तेषाम् आशयः । कर्णाटकेषु भक्तिपरम्परा विशिष्टा परिलक्ष्यते ।

शाङ्कराः, शैवाः, वीरशैवाः, वैष्णवाः, श्रीवैष्णवाः तत्र प्रमुखतया वर्तन्ते । शैवाः, शाङ्कराः, वीरशैवाः लिङ्गायताः, वैष्णवा माध्वाः, श्रीवैष्णवाः रामानुजीयाः इत्येते समग्रं कर्णाटकं व्याप्य निजपरम्परां रक्षन्ति । तत्र मठाः आश्रमाः मन्दिराणि च भक्तिपरम्परायाः संवर्धने प्रधानकेन्द्राणि भवन्ति । आधुनिककाले शृङ्गेरीशारदापीठम्, गोकर्णमहाबलेश्वरमन्दिरम्, आदिचुञ्चनगिरिकालभैरवेश्वरमन्दिरम्, रामचन्द्रापुरमठः, स्वर्णवल्लीमठः, कृष्णराजपुरमठः, होळेनरसीपुरस्य अध्यात्मकार्यालयः, मैसूरुगणपतिसच्चिदानन्दाश्रमः, वरदहळ्ळीश्रीधराश्रमः इत्येतेषु मठेषु आश्रममन्दिरेषु शाङ्करभक्तिपरम्परा सुदृढा वर्तते । सुत्तूरु-सिद्धगङ्गा-मूरुसाविरमठेषु वीरशैवभक्तिपरम्परा वर्तते । उडुपिकृष्णमन्दिरम्, उडुपिस्था अष्टौ मठाः, मन्त्रालयस्थः राघवेन्द्रस्वामिमठः, उत्तरादिमठः, सोसलेव्यसरायमठः गौडसारस्वतपर्तगाळिमठश्च माध्वमतावलम्बिनां कृष्णभक्तेः प्रसाराय वर्तन्ते । मेलुकोटेचलुवनारायणमन्दिरम्, मैसूरुपरकालमठश्च रामानुजीयसिद्धान्तप्रचारकेन्द्रं विष्णुभक्तिं प्रसारयति । धर्मस्थलस्थमञ्जुनाथस्वामिमन्दिरम्, मुरुडेश्वरक्षेत्रम्, कोल्लूरुमूकाम्बिकामन्दिरम्, इडगुञ्जीमहागणपतिमन्दुरम् इत्यादीनि शिवदेवीगणपत्यादिदेवतामन्दिराणि अनेकानि भक्तिकेन्द्राणि सन्ति । दासपरम्परायां पुरन्दरदासः कनकदासश्च प्रसिद्धौ कर्णाटकीयौ याभ्याम् अनेकानि भक्तिगीतानि लिखितानि प्रसिद्धानि । अद्यापि मन्दिरेषु तानि श्राव्यन्ते । कर्णाटक-केरल-आन्ध्र-तमिलुनाडुराज्येषु एतानि गीतानि प्रचुरतया गीयन्ते । तत्र कनकदासस्य मोहनतरङ्गिणी कृतौ कृष्णपराणि गीतानि प्रसिद्धानि ।

कर्णाटकेषु भक्तिश्रद्धाकेन्द्रेषु तदितरस्थानेषु च भक्तिपरम्परायाः संवर्धनाय प्रवचनम्, हरिकथा,

सङ्गीतगमकयक्षगानादिकला आश्रिता दृश्यते । मन्दिरेषु उत्सवस्यावसरे, धार्मिककार्यक्रमेषु एते कलाप्रकारा अनुष्ठीयन्ते । तत्र यक्षगानकलाया अस्ति विशिष्टं स्थानम् ।

त्रिवर्गसाधनं नाट्यम् इति आचार्यो भरतमुनिराह । भारतभूमिः बह्वीनां कलानां जननदात्री पोषणकर्त्री च वर्तते । रामलीला, रासलीला, ओडिस्सी, कथक्, कूचुपुडी, कूतु, कूडियाट्टम्, कथक्कळी, कृष्णनाटम्, यक्षगानम् इति प्रदेशभेदेन विद्यमानानां नानाभारतीयकलाप्रकाराणां केवलं मनोरञ्जनं लक्ष्यं न वर्तते । ते नीतिं धर्मं च बोधयन्तः पुरुषार्थसाधने साहाय्यमाचरन्तीति तत्परम्परापरिशीलनेन ज्ञायते ।

**कर्णाटके यक्षगानकलाया आरम्भः विकासश्च**

क्रिस्तात् १२तमे शतके शिवशरणाः वैष्णवदासाश्च यक्षगानकलाविदां समूहं ग्रामाद्ग्रामं नीत्वा यक्षगानं नाटयन्ति स्म इति डा. राघवनम्बियार् अभिप्रैति । यक्षगानस्य प्राचीनः प्रसिद्धश्च कविः पार्तिसुब्बः क्रिस्तात्परं १५९०-१६३० काले आसीदिति कारणेन ततः पूर्वमेव इयं कला विकासं प्राप्त आसीदिति ज्ञायते ।

यक्षगानकलाया अपरा काचित् ऐतिहासिकपृष्ठभूमिः मनागिव अवलोकनीया येन भक्तेः धार्मिकाध्यात्मिकमौल्यानां प्रचारे अस्य यक्षगानस्य पात्रं किमिति अवगम्यते । कर्णाटकस्य यक्षगानकलायाः अष्टशतस्य वर्षाणामितिहासो वर्तते । त्रयोदशशताब्दः द्वैतदर्शनस्य अद्वैतदर्शनस्य च प्रचारकालः आसीत् । कर्णाटके द्वयोर्दर्शनयोरनुयायिमुख्याः स्वमतप्रचारविषये मिथः स्पर्धमाना आसन् । तदा विशेषतः कर्णाटकस्य दक्षिणभागे राजा द्वितीयः जयसिंहः उभयोरपि दर्शनयोः समन्वयदृष्ट्या केरलकर्णाटकयोः सीमनि विद्यमाने **कुम्बळे** नामके ग्रामे उभयदर्शनप्रमुखान् पण्डितान् समाहूय अनेकवारं मार्गदर्शनं व्यधात् । तत्परिणामात् उभयेषां मनःकषायभावः दूरङ्गतः । उभयसम्प्रदायसाधारणतया ‘भागवतसम्प्रदायः’ प्रादुरभूत् । विष्णोः भक्ताः शिवस्य भक्ताश्च सम्भूय धर्माधर्मविवेकसाधिकां भगवद्दर्शनमुख्योपायभूतां भक्तिम् अवलम्बमानाः सन्तः, धार्मिकाध्यात्मिकविचाराणां प्रचारं कर्तुमारभन्त । मन्दिरेषु रामायणभारतभागवतादिप्रवचनं व्यापकतया समजायत । तस्मिन् काले सर्वेषामपि जनानां धार्मिकमौल्यानां सुष्ठु अवगमनार्थमेव यक्षगानकला जनिमलभत । इत्थं भक्तेः प्रसाराय कर्णाटके यक्षगानम् आरब्धम् ।

अस्य कलाप्रकारस्य यक्षगानम् इति नामकरणे किञ्चित् कारणं वर्तते । तत्र अनेके अभिप्राया वर्तन्ते । तथा हि यक्षगानस्य मूलम् आन्ध्रप्रदेशः । तत्र गुण्टूरुप्रदेशस्थाः सङ्गीतनर्तनादौ निरतः जक्कलु अथवा यकरुनामको जनवर्ग आसीत् । ततः जक्कलपाटु इत्यभूत् । ततः यक्षगानं प्रादुरभवत् इति वेतूरुप्रभाकरशास्त्री अभिप्रैति । गान्धर्वगानमिव विशिष्टशैल्या प्रस्तूयमानस्य अस्य कलाप्रकारस्य यक्षगानमिति कर्णाटाभिजनाः तन्नाम


ISSN: 2320-740X

कृतवन्तः स्युरिति ज्ञानपीठपुरस्कारभाक् डा. शिवरामकारन्तः प्रतिपादयति । यक्षगानं गीतवाद्यनृत्यवाचिकाभिनयैः युक्ता सम्मिश्रजानपदकला इति कैश्चिदुच्यते । केचन 'कञ्चित् प्रबन्धरचनाप्रकारं यक्षगानं वदन्ति यस्मिन् प्रकारे गेयता भवति । अतः आदौ तत्र आर्यादिच्छन्द इव विषयस्य गेयतया प्रकाशनार्थं यक्षगानमवलम्ब्यते स्म । स्मरणार्थं सौकर्यं भवतीति औषधनिर्माणस्य कृषिकर्मणः सम्बद्धा नानाविषया यक्षगानरचनाविधानेन रच्यन्ते स्म । तथा सङ्गीतनर्तनादावपि अस्य प्रयोगः क्रियते स्म । विजयनगरसाम्राज्यम् आन्ध्रकर्णाटकयोर्विस्तृतमासीत् । तस्मिन् काले असौ प्रकारः आन्ध्रदेशात् कर्णाटकमागत्य क्रमेण रूपान्तरं प्राप्नोत्' इति मन्वते । किन्तु यक्षगानस्य ऐतिहासिकभूमिकायाः संशोधकेषु अन्यतमः डा. राघव नम्बियार् इत्थं वदति- यक्षगानम् इत्यत्र यक्षपदं जानपददैवसूचकम् । दैवाराधनं कर्णाटकेषु प्राचीनकालाद् वर्तते । तत्र विग्रहेषु दैवं सम्भावयन्तः जनाः तदुत्सवमाचरन्ति स्म । तस्मिन् काले गीतं नृत्यञ्च प्रस्तुवन्ति स्म । तत्र नटा वेषं धृत्वा भगवतो महिमानमवलम्ब्य अभिनयं कुर्वन्तः यक्षं सेवन्ते स्म । कथावस्तुनः गानम् तस्य अभिनयश्च नटैः क्रियते स्म । यक्षस्य आराधनपरतया आरब्धः कलाप्रकारः यक्षगानम् इति प्रथते' इति । एवं यक्षगानस्य आरम्भवादः अनेकैः अभिप्रायैः संवलितो वर्तते । तेषु अभिप्रायेषु डा. राघवनम्बियारस्य अभिप्रायो युक्ततम इति प्रतिभाति । तथापि एते सर्वे विचारा यक्षगानस्य प्राचीनतासमर्थने सहाया एव सन्ति । यक्षगानस्य एवमारम्भविकासक्रमस्य परिशीलनेन असौ कला भक्तेः नैतिकमौल्यानाञ्च प्रचाराय प्रारब्ध इति ज्ञायते ।

**यक्षगानस्य स्वरूपम्**

यक्षगानम् आङ्गिकवाचिकसात्त्विकाहार्याख्यैः चतुर्विधैरभिनयैः परिपोषङ्गतः एकः कलाप्रकारः। तौर्यत्रिकम्- गीतम्, नृत्यम्, वाद्यम् च अस्मिन् समाविष्टं भवति । वाद्यानि मृदङ्गः चण्डा, स्वरसङ्गमनाय हार्मोनियं च भवन्ति । अत्र चण्डामृदङ्गयोः द्वयोः चर्मवाद्ययोः उपयोगः क्रियते । भारतीयकलाप्राकारेषु एकस्मिन् प्रकारे द्वयोः चर्मवाद्ययोः प्रयोगः अतिविरलो वर्तते । रामायणभारतभागवतान्यवलम्ब्य निर्मितं गेयसाहित्यं यक्षगानस्य कथावस्तु । चतुरस्रा अर्धचन्द्राकारा वा रङ्गवेदी भवति । रङ्गपीठे गायकः मार्दङ्गिकः चण्डावादकश्च उन्नतासने उपविशन्ति । प्रकरणानुसारं नटाः तत्तद्भूमिकामालम्ब्य गायकस्य वामपार्श्वस्थे द्वारे वेदिकां प्रविश्य ताललयाश्रयं नृत्यन्ति । अभिनयं कुर्वन्तः ते नृत्योत्तरं गायकेन गीतं वस्तु परस्परं वाचिकाभिनयद्वारा प्रस्तुत्य मञ्चस्य पुरतः आसीनेषु सामाजिकेषु रसास्वादं सम्पादयन्ति नीतिं धर्मं भक्तिञ्च ज्ञापयन्ति । यक्षगाने वाचिकाभिनयः **अर्थ** इत्यभिधीयते । कथावस्तु **प्रसङ्ग** इति कथ्यते । गायकेन प्रस्तुतं कथावस्तु समाश्रित्य नटाः सम्भाषणं कुर्वन्ति । कथक्कळी, ओडिस्सी, मोहिनीयाट्टम् इत्यादिप्रकारेषु सम्भाषणं न भवति । यक्षगाने तद् भवतीति इतरेभ्यः अस्य एकं वैशिष्ट्यम् । किन्तु कन्नडभाषायां सम्भाषणकारणात् यक्षगानं कर्णाटकराज्यादन्यत्र प्रचारं विशेषरूपेण न

प्राप्नोदिति अस्य तद् नैयून्यमपि । वाचिकोत्तरं पुनः गीतनृत्ये पुनः वाचिक इति पर्यायेण प्रवर्तते । एवं रीत्या नटाः साङ्गोपाङ्गं यक्षगाननाट्यं प्रस्तुवन्ति । पूर्वं सप्ताहकालं यावत् निरन्तरम् एकं कथावस्त्ववलम्ब्य यक्षगानं प्रवर्तते स्म । साम्प्रतं जनानां समयस्य न्यूनताकारणात् एकरात्रसाध्यत्वेन घण्टात्रयसाध्यत्वेन वा प्रवर्तते ।

**यक्षगानस्य प्रकाराः व्यापकता च**

यक्षगाने देशभेधात् शैलीभेधः, नामभेधश्च वर्तते । अस्मिन् कलाविशेषे मुख्यतया मूडलपायः पडवलपायश्चेति द्वौ प्रकारौ वर्तेते ।

**१. मूडलपायः** मूडलपायः कर्णाटकराज्यस्य उत्तरभागे मैसूरुप्रदेशे च प्रवर्तते । अस्मिन् प्रकारे दोड्डाटः, सण्णाटः पारिजातश्चेति त्रयः प्रकारा वर्तन्ते । तत्र **दोड्डाट** इति प्रकारे विशालः रङ्गमञ्चः भवति । पात्रधारी पुरुषः बृहत्किरीटं धरति । अस्मिन् प्रकारे अभिनये गाने वाद्यादि प्रयोगे च जानपदीयो धर्मः भूयान् वर्तते । **सण्णाट** इति प्रकारे गाने 'लावणी' 'कव्वाली' चेति कन्नडजानपदीया शैली आद्रियते । गाने भागवतेन (गायकेन) सह पात्रधारिणः अपि स्वरसंयोगं कुर्वन्ति । अत्र पात्राणाम् अङ्गरागो वैकल्पिकः । नाटकप्रभावः अत्र महान् दृश्यते । तत्र तालः, सारङ्गी, दप्पु इत्यादिवाद्यप्रयोगः भवति। **पारिजात** इति प्रकारः यद्यपि यक्षगानस्यैव अथापि अत्र गीतनाटकच्छाया भूयसी वर्तते । श्रीकृष्णपारिजातम् इति अपराळतम्मण्णनामकेन कविना रचितं काव्यं नटा अभिनयन्ति । अत्र नटा अपि गायन्ति । तबला, हार्मोनियम्, सारङ्गी इत्यादिवाद्यानां प्रयोगो भवति । उत्तरकर्णाटके असौ प्रकारः जनप्रियो वर्तते ।

**२. पडुवलपायः** कर्णाटकराज्यस्य समुद्रतीरप्रदेशे अयं प्रभेधः प्रवर्तते । अस्मिन् नाना परिष्काराः सञ्जाता वर्तन्ते । साम्प्रतं लोकविश्रुततया कर्णाटककला इति एष प्रकारः ख्यातो वर्तते । अत्र द्वौ प्रकारौ तेङ्कुतिट्टु बडगुतिट्टु चेति । **तेङ्कुतिट्टु** (दक्षिणशैली) इति कर्णाटकराज्यस्य दक्षिणभागे प्रवर्तते । उडुपि-दक्षिणकन्नड-कासरगोडुमण्डलेषु असौ प्रकारः प्रसिद्धः । अस्मिन् चण्डावादकः भागवतस्य वामपार्श्वे स्थितः सन् चण्डां वादयति । वीररसाभिव्यञ्जकस्य नृत्यस्य प्राशस्त्यम् । भूताराधनस्य कथक्कळीकलायाः प्रभावः अत्र महान् दृश्यते । गानशैल्याम्, आहार्ये अङ्गरागे च वैविध्यं वर्तते । कर्णाटकस्य मध्यभागे, उत्तरभागे च **बडगुतिट्टु** (उत्तरशैली) इति प्रकारः प्रवर्तते । उडुपि-उत्तरकन्नड-शिवमोग्गमण्डलेषु प्रसिद्धः एष प्रकारः शैल्या तेङ्कुतिट्टुप्रकाराद् भिद्यते । रङ्गपीठे चण्डावादकः भागवतस्य दक्षिणभागे उपविश्य चण्डां वादयति । नर्तनं लास्यप्रधानं भवति । भरतनाट्यप्रभावः अत्र दृश्यते । आहार्ये भेदः वर्तते । कच्छविन्यासे, किरीटे, अन्येषु आभूषणेषु वैलक्षण्यं वर्तते । गानशैली भिद्यते । अथ च केवलवाचिकाभिनयरूपः प्रकारः **ताळमद्दळे** इति


ISSN: 2320-740X

प्रसिद्धः । असौ प्रकारः तेङ्कुतिट्टु बडगुतिट्टु चेति द्वयोः प्रकारयोः प्रवर्तते । गीतवाद्यप्रस्तुतिः तत्तच्छैलीमवलम्ब्य भवति । यक्षगानस्य सर्वप्रकारेषु क्वचित् नाट्यधर्मी प्रचुरतया अवलम्ब्यते क्वचिच्च लोकधर्मी । एवम् प्रतिप्रकारम् उभयधर्मीसामञ्जस्यं वर्तते ।

**यक्षगाने तालरागौ**

यक्षगानस्य तालरागभागः अत्यन्तं दृढो वर्तते । तालस्य मूलं भगवत्तत्वमेव प्रतिपादयति ।

**तकारः शङ्करः प्रोक्तो लकारः पार्वती स्मृता ।**
**शिवशक्तिसमायोगात्ताल इत्यभिधीयते ॥**

तालस्य महत्त्वम्- **गीतं वाद्यञ्च नृत्तञ्च सर्वं ताले प्रतिष्ठितम् ।**
**न तालेन विना किञ्चित् तस्मात्तालस्य मुख्यता ॥** इति शिवतत्त्वरत्नाकरे प्रोक्तम् ।

यक्षगाने, विशेषतः पडवलपायप्रकारे प्रयुज्यमानाः तालाः -

**धृवो मट्यं रूपकञ्च झम्पा त्रिपुट एव च ।**
**आटतालैकताले च सप्ततालाः प्रकीर्तिताः ॥**

धृवतालः, मट्यतालः, रूपकतालः,झम्पातालः, त्रिपुटतालः, आटतालः, एकतालश्चेति ते सप्त भवन्ति । तत्र धृवतालस्य प्रयोगः सम्प्रति न दृश्यते । अष्टतालसञ्ज्ञकः अन्यः तालः प्रयुज्यते ।

कलाप्रकारेषु सर्वत्र तालस्य महत्त्वं वर्तते । यक्षगाने कर्णाटकसङ्गीतसम्बद्धा रागाः प्राचुर्येण अवलम्ब्यन्ते । तथापि तत्प्रस्तुतिक्रमस्य अत्यन्तं भिन्नता वैशिष्ट्यञ्च वर्तते । तत्र यक्षगानस्यैव निजगुणः परिलक्ष्यते । यक्षगानप्रस्तुतेः प्रारम्भः नाटिः, मध्यमावती, सौराष्ट्रः,भैरवी इत्येतेषु अन्यतमेन क्रियते । समाप्तिः बिलहरी, मोहनः, सावेरी इत्येतेषु अन्यतमेन क्रियते । तत्तद्रसानुकूलतया शङ्कराभरणम्, बेगडे, कल्याणी, आरभिः, काम्बोधिः, मुखारिः, तोडिः, तुजावन्तुः, अठाणः, देवगान्धारी, काफी, हिन्दोलः, सुरुटिः, खरहरप्रियः, नवरोजुः, पन्तुवरालिः, हंसानन्दी, देशः, फूवभूपालिः, भेहाग्, चान्द्, कानड इत्यादयः रागाः प्रसिद्धाः प्रयुज्यन्ते । यक्षगाने अशीत्यधिकाः रागाः सन्ति ।

यक्षगाने, विशेषतः पडवलपायप्रकारे अभिनेतृगणः (नाट्यदलम्) **मेळ**नाम्ना कथ्यते । केचन गणा वृत्तिपरतया अभिनयन्ति, अन्ये प्रवृत्तितया । साम्प्रतं कर्णाटके ४५ मेळाः वर्तन्ते । तत्र वृत्तिपरा रात्रौ आ प्रातः डिसेम्बर् मासतः मेमासपर्यन्तं प्रतिदिनं भिन्ने निर्दिष्टे देशे (प्रातः प्रस्तुतेः समाप्तेः परं सर्वैः रङ्गगसामग्रीभिः सह तस्मात् प्रदेशात् प्रदेशान्तरं गत्वा कर्मचारिणः तत्र प्रदर्शनानुकूलं रङ्गभवनं निर्मान्ति) रङ्गवेदीं निर्माय यक्षगानं

प्रस्तुवन्ति । जून्मासतः मुम्बई-देहलीप्रभृतिषु प्रदेशेषु गत्वा अभिनयन्ति । विदेशान् गत्वा कानिचन नाट्यदलानि यक्षगानं प्रस्तुवन्ति । यद्यपि यक्षगाने नटाश्रयः वाग्व्यापारः कन्नडमाध्यमेनैव पूर्वमारब्धः किन्तु साम्पृतं तुळु-हिन्दी-कोङ्कणी- आङ्ग्लभाषामाध्यमेनापि तत्र तत्र अस्य प्रदर्शनं प्रवर्तते । यक्षगानस्य संस्कृतभाषयापि प्रयोगा भवन्तीति विशेषः । एवम् सम्प्रति कर्णाटककला यक्षगानाख्यैषा देशे विदेशेषु च प्रसिद्धा वर्तते । साम्प्रतं अस्य कलाप्रकारस्य प्रभावः भारतीयनाटकरङ्गमञ्चे दृश्यते । अन्यत्र कलाप्रकारेषु च अस्य प्रभावः परिलक्ष्यते । एवमेव यक्षगानम् इतरैः कूडियाट्टम्, भरतनाट्यम्, कथक्कळी, इत्यादिभिः कलाप्रकारैः प्राप्तप्रभावकं वर्तते ।

**भक्तिप्रसारे साधनं यक्षगानम्**

यक्षगानं पुरुषार्थप्रवृत्तिसाधनोपायत्वेन कर्णाटकेषु प्रसृतिं प्राप्नोदिति पूर्वं प्रोक्तम् । धर्मः, परोपकारः, भक्तिः, पातिव्रत्यम्, मोक्षः इत्येतानि भारतीयमौल्यानि एव यक्षगानकाव्येषु निरूपितानि वर्तन्ते । परापराभ्यां द्विविधा भक्तिस्तु प्रतिकाव्यं साक्षात् व्यञ्जनामर्यादया वा प्रतिपाद्यते । विशेषतया अपरा भक्तिः तत्रापि पुनः विष्णुभक्तिः

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥**

इति नारदभक्तिसूत्रोक्ता नवविधा यक्षगानकाव्यैः अभिव्यज्यमाना दृश्यते ।

यक्षगानं भगवद्भक्तेः प्रसारे उपायत्वेन स्वीकृतम् इति विषये बहूनि प्रमाणानि उपलभ्यन्ते । तानि यथा

१. **दशावतारी मेळ इति नाम** – पूर्वकाले भगवतः विष्णोः दशावतारकथाः एव मुख्यतया प्रस्तूयन्ते स्म । अतः यक्षगानप्रस्तुतिदलस्य **दशावतारी** इति नाम आसीत् ।

२. **गायकस्य भागवत इति अभिधानम्** – केरलस्य कृष्णनाटम् इति कलाप्रकारे गायकः भागवत इत्युच्यते । तत्र भगवतः कृष्णस्य कथा भवति । तथा यक्षगानेऽपि सः भागवत इत्यभिधीयते ।

३. **यक्षगाने पूर्वरङ्गः** – यक्षगाने, विशेषतः पडवलपाये पूर्वरङ्गः अतिविशिष्टम् अङ्गम् । एष सभालक्षणम् इत्यपि कथ्यते । 'तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्' इति नाट्यशास्त्रोक्तः क्रमः अत्र अनुस्रियते ।

**यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।**
**कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥**

यक्षगाने पूर्वरङ्गः सर्वेषु प्रसङ्गेषु प्रायः समानो भवति । कथाप्रसङ्गस्य प्रारम्भात् प्राक् कोडङ्गी, बालगोपालः, कोक्के चिक्कः, पीठिकास्त्रीवेषः, इत्येते क्रमशः रङ्गं प्रविश्य स्वीयं पूर्वरङ्गकर्म विधाय निवर्तन्ते । तत्र बालगोपालस्य पीठिकास्त्रीवेषस्य च अभिनयार्थं पद्यानि भगवत्पराकाणि भवन्ति । यथा बालगोपालस्य


ISSN: 2320-740X

**रागः मारविः, एकतालः**

हरे रमण गोविन्द ।

नारायण केशव माधव कृष्ण मुकुन्द मुरारे ॥

ता तागडतक तरगड ताम्

ता तागडतक तरगड ताम्

तरगड ताम् तरगड ताम् तक्कधिक्कुतक दधिन्ना दधिगिणधेम्

---------------------------------------------------------------------------

**रागः केदारगौळः, एकतालः**

हरि नारायण गोविन्द । अच्युतानन्त गोविन्द ॥

मत्स्यावतार गोविन्द । कूर्मस्वरूप गोविन्द ॥

क्रोडाकार गोविन्द  नरहरि वामन गोविन्द ।

अनन्तमहिम गोविन्द भार्गवराम गोविन्द ॥

दशरथनन्दन गोविन्द  वसुदेवात्मज गोविन्द ।

बौद्धावतार गोविन्द कल्किस्वरूप गोविन्द ॥

ताधिं ताधिं ताधिंताननान्ततरिता

---------------------------------------------------------------------------

पीठिकास्त्रीवेषस्य अभिनयार्थं पद्यानि यथा

**रागः नाटी, आदितालः**

राधालोल ।  बालगोपाल ॥

बालगोपाल । राधालोल ॥

मलगिरलु अम्बर । सेळेदोय्व सुन्दर ॥

तिळिदु ई परि दूर । जार ॥ राधा

चण्डबलनु एन्न । दुण्डु कुचगळन्नु ।

कण्डु पिडिदवन्यारे । नीरे । राधा

मारन लीलेयेल्ल । तोरिद जगकेल्ल ।

मारसुन्दर सुकुमारन पित । ईत ॥ राधा

---

**रागः कल्याणी, आदितालः**

एन्दिगे काणुवे ना । सुन्दरन माधवन ।
एन्दिगे काणुवे ना ।
जाणे केळिदे ना । प्राणकान्तन मन ।
काणदे निल्ललारे ना । सुन्दरन एन्दिगे
अङ्गजजनक श्री । मङ्गळ महिमन ।
गङ्गाधरन प्रियन । सुन्दरन ॥ एन्दिगे
दिट पार्थसारथि । विठल नम्मोडेयन ।
कपटनाटक सूत्रन । सुन्दरन ॥ एन्दिगे

४. **आहार्यसाम्यम्** - यक्षगाने किरीटम्, पगडि, मुण्डासु इत्यादीनि पुरुषवेषाणाम् शिरोभूषणानि भवन्ति । तेषाम् अधोवस्त्रं कच्छम् । प्रायः तत् सर्वपात्राणां समानरूपं भवति । शिरोभूषणं तत्कच्छं च पण्डरापुरस्य भगवतः विठलस्य वेषभूषासाम्यं धत्ते । विष्णोरनुयायिनां सर्वेषामपि पात्राणाम् ऊर्ध्वपुण्ड्रं तिरुपतेः वेङ्कटेशस्य पुण्ड्रेण भृशं साम्यं धत्ते ।

५. **विष्णुपरकं यक्षगानसाहित्यम्** – रामायणमहाभारतश्रीमद्भागवतदेवीभागवतादिकमवलम्ब्य रचितानि यक्षगानकाव्यानि परस्त्रिसहस्रं संख्याकानि वर्तन्ते । तानि च विष्णु-शिव-देवीपरकाणि ।

**वेदे रामायणे चैव पुराणे भारते तथा ।**
**आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥**

इत्युक्तरीत्या रामायणभारतभागवतादौ प्राधान्येन प्रतिपाद्यस्य विष्णोश्चरितमवलम्ब्य यक्षकाव्यानि बहूनि विरचितानि ।

६. **लक्ष्मीशकवेः जैमिनिभारतम्** – कृष्णचरितमाश्रित्य जैमिनिभारतं कविना लक्ष्मीशेन कन्नडभाषया विरचितं विशिष्टं काव्यम् । वार्धकषट्पदी इति छन्दःप्रकारमवलम्ब्य विरचितम् । एतत् छन्दः यक्षगाने अत्यन्तं गेयतायाम् अत्यन्तमनुकूलं भवति । अत एव अस्य काव्यस्य महान् प्रभावः यक्षगानसाहित्ये वर्तते । इदं काव्यं बहूनां यक्षगानकाव्यानाम् उपजीव्यकाव्यम् । अद्यापि ग्रामजना जैमिनिभारतं पठन्ति ।

७. **मूडलपायस्य पारिजातः** - मूडलपायस्य पारिजात इति कर्णाटकस्य उत्तरभागे अभिनीयमाने यक्षगानप्रकारे


ISSN: 2320-740X

प्रायेण **श्रीकृष्णपारिजातम्** इति प्रसङ्गः अभिनीयते ।

८. **यक्षगानसाहित्ये कृष्णनाटस्य प्रभावः** - यक्षगानसाहित्यस्य अग्रमान्यः कविः अनेकयक्षगानकाव्यकर्ता पार्तिसुब्बः कर्णाटककेरलसीमप्रदेशीयः केरलानां नृत्यप्रकारेण कृष्णनाटम् इत्यनेन प्रभावित आसीदिति तत्काव्ये विद्यमानानि **केळिकोट्टु, तेरे, पुरप्पाडु** इत्यादिमलयाळभाषापदानि प्रमाणयन्ति । पार्तिसुब्बेन कृष्णचरितमाश्रित्य अनेकानि यक्षकाव्यानि रचितानि ।

९. **भक्तिभावव्यञ्जकाः रागाः** – यक्षगाने उपयुज्यमानेषु रागेषु अधिकाः भक्तिव्यञ्जकाः सन्ति ।

१०. **मुक्तरङ्गवेदी** – यक्षगाने मुक्तरङ्गवेदी एव प्राचुर्येण भवति । एषा सामूहिकभक्तेः संसूचिका वर्तते ।

११. **जनानां भगवद्भक्तिः** - कर्णाटकेषु जननाम् आस्तिकबुद्धिः, भगवद्भक्तिः, भगवदुपासना, दैवाराधना धार्मिकश्रद्धा धार्मिकाध्यात्मिकमौल्येषु निष्ठा च विशिष्टा विलोक्यते । तत्र यक्षगानस्य प्रभावो भूयान् वर्तते ।

**प्रसिद्धाः केचन विष्णुशिवदेवीचरिताश्रिता यक्षगानप्रसङ्गाः (यक्षगानकाव्यानि)**

| क्र.सं | कृतिः | लेखकः |
|---|---|---|
| १ | कृष्णसन्धान | देवीदासः |
| २ | भीष्मार्जुनकाळग | हलसिनहळ्ळि नरसिंहशास्त्री |
| ३ | अभिमन्युकाळग, सैन्धववध | देवीदासः |
| ४ | द्रोणपर्व | उडुपिराजगोपालाचार्यः |
| ५ | कर्णपर्व | गेरुसोप्पशान्तप्पय्यः |
| ६ | गदापर्व | अज्ञातकर्तृकम् |
| ७ | साहसभीमविजय | के. पि. वेङ्कप्पशेट्टी |
| ८ | कर्णार्जुनकाळग | पाण्डेश्वरवेङ्कटः |
| ९ | विराटपर्व | अजपुरविष्णुः |
| १० | भीष्मोत्पत्ति, भीष्मविजय | हलसिनहळ्ळि नरसिंहशास्त्री |
| ११ | आदिपर्व | अज्ञातकर्तृकम् |
| १२ | द्रौपदीस्वयंवर | हट्टियङ्गडिरामभट्टः |
| १३ | सुभद्राकल्याण | हट्टियङ्गडिरामभट्टः |
| १४ | राजसूयाध्वर | बिष्टप्पः |
| १५ | इन्द्रकीलक | ब्रह्मापुरविष्णुभागवतः |
| १६ | घोषयात्रा | देवीदासः |

| | | |
|---|---|---|
| १७ | सुधन्वार्जुनकाळग | वेङ्कटेशभक्तः |
| १८ | बभ्रुवाहनकाळग | देवीदासः |
| १९ | श्रीकृष्णपरम्धाम | के वि गोविन्दभट्टः |
| २० | हिरण्याक्षवध | कु. रामकृष्णय्यः |
| २१ | वराहचरित | जत्ति ईश्वरभागवतः |
| २२ | प्रह्लादचरित | मैर्पाडिवेङ्कटरमणय्यः |
| २३ | वामनचरित | हलसिनहळ्ळि नरसिंहशास्त्री |
| २४ | श्रीकृष्णबाललीले | होस्तोटमञ्जुनाथभागवतः |
| २५ | कंसवध | होस्तोटमञ्जुनाथभागवतः |
| २६ | त्रिजन्मकंसकैवल्य | बेळसलिगे गपतिहेगडे |
| २७ | श्रीविष्णुलीले | वि. डि वि होळ्ळः |
| २८ | राधाविलास | मट्टिवासुदेवप्रभुः |
| २९ | वीरमणिकाळग | हलसिनहळ्ळि नरसिंहशास्त्री |
| ३० | कृष्णचरित | पार्तिसुब्बः |
| ३१ | यादवाभ्युदय | पेरडालकृष्णय्यः |
| ३२ | रुक्मिणीस्वयंवर | मलेनाडकविः |
| ३३ | श्रीकृष्णविवाह | हलसिनहळ्ळि नरसिंहशास्त्री |
| ३४ | जाम्बवतीकल्याण, सत्यभामापरिणय | चोराडिवेङ्कटरमणभट्टः |
| ३५ | पारिजातप्रसङ्ग | अजपुरसुब्बः |
| ३६ | नरकासुरवध | बलिपनारायणभागवतः |
| ३७ | देवीमहात्मे | देवीदासः |
| ३८ | गिरिजाकल्याण | देविदासः |
| ३९ | कुमारविजय | मुद्दणकविः |
| ४० | दक्षयज्ञ | अज्ञातकविः |
| ४१ | मीनाक्षीकल्याण | अज्ञातकविः |
| ४२ | गोकर्णक्षेत्रमहात्मे | अड्डूरुबळकिल विष्णय्यः |
| ४३ | बेडर कण्णप्प | कडतोक मञ्जुनाथभागवतः |
| ४४ | कर्णावसानम् (संस्कृतम्) | म.म. अभिराजराजेन्द्रमिश्रः |
| ४५ | ययात्युद्धरणम् (संस्कृतम्) | म.म. अभिराजराजेन्द्रमिश्रः |
| ४६ | कुन्तीसन्तापः (संस्कृतम्) | म.म. अभिराजराजेन्द्रमिश्रः |
| ४७ | सुधन्वार्जुनीयम्(संस्कृतम्) | डा. महेशकाकत्करः |



ISSN: 2320-740X

| | | |
|---|---|---|
| ४८ | कंसवधः(संस्कृतम्) | डा. महेशकाकत्करः |
| ४९ | लवकुशीयम्(संस्कृतम्) | डा. महेशकाकत्करः |
| ५० | सत्यसेनवधः(संस्कृतम्) | राघवेन्द्रपुराणिकः |

एतेषां यक्षकाव्यानां प्रयोगाः पडवलपायप्रकारे प्राचुर्येण भवन्ति ।

त्रयोदशशतके कर्णाटकेषु प्रवृत्ते भक्तेरान्दोलने यक्षगानकलायाः महद्योगदानम् आसीदिति इतिहासावलोकनेन स्पष्टं भवति । किञ्च अद्यापि अत्र गृहेषु आबालवृद्धाः पौराणिकविषयेषु चर्चां कुर्वन्ति । एतावता वालिवधः, सीतापरित्यागः, अम्बाविवाहः, द्रौपदीवस्त्रापहारः इत्यादिविषयेषु सयुक्तिकं संवादं कुर्वन्ति । जनानां विशेषतया आस्तिकता भगवद्भक्तिश्च दृढतया वर्तते । एवं कर्णाटकेषु भगवद्भक्तेः प्रसारे यक्षगानस्य विशिष्टं पात्रमस्तीति शुभम् ।

**सहायकग्रन्थाः**


१ यक्षगानपदकोश – डा. एम्. प्रभाकरजोशी, प्रा.जा.र. अध्ययनकेन्द्र, उडुपि(१९९४)

२ यक्षगान मत्तु चित्रकले – मूडुबेळ्ळे उपाध्यायः, कलागङ्गोत्री, सोमेश्वर(१९९५)

३ यक्षान्दोळन -अमृतसोमेश्वरः, कर्णाटकललितकला एकाडेमी, बेङ्गलूरु(२००४)

४ यक्षगान कलादर्शन – प्रो.टि. केशवभट्टः, कन्नडसाहित्यपरिषत्, बेङ्गलूर्(२००४)

५ रङ्गवैखरी – पादेकल्लुनरसिंहभट्टः, मित्तनड्क(१९८१)

६ यक्षगान परिशीलन –जि.एस्.भट्टः, कर्णाटक जानपद मत्तु यक्षगान एकाडेमी, बेङ्गलूरु(१९९५)

७ विलोकन – डा. के. एम्. राघव नम्बियार्, इळाप्रकाशन, बेङ्गलूरु(१९९८)

८ यक्षगान सभालक्षण – श्रीमन्मध्वसिद्धान्तग्रन्थालयः,(२००२)

९ सङ्क्षिप्तनाट्यशास्त्रम् – प्रो. राधावल्लभत्रिपाठी, वाणीप्रकाशन, नई दिल्ली(२००९)

१० Vaisnavism in Indian Arts and Culture -Ratan Parimoo (Ed) Book & Books Publishers & Distributors, New Dehli(1987)

११ www.bayalata.com

१२ www.kanaja.in


**********

# समालङ्कारः

**डा. चन्द्रकला आर्. कोण्डी**
सहायकाचार्या, साहित्यविभागः

काव्यस्य परमप्रयोजनस्य विगलितवेद्यान्तरानन्दस्योद्भावकः यद्यपि काव्यात्मभूतो रस एव तथापि वक्रोक्त्यलङ्कारादिभिः अन्यतत्त्वैः स नितान्तमुपकृतो भवतीत्यपि अङ्गीकरणीयमेव । तादृशरसोपकारकतत्त्वेषु प्राधान्यम् अलङ्काराणाम् । किन्तु काव्ये प्रयुक्ताः सर्वेऽप्यलङ्काराः सर्वत्रापि रसोपकारका एव भवन्तीति वक्तुं न शक्यम् । कुत्रचिदनौचित्येन प्रयुक्तास्ते रसविघातका अपि भवन्त्येव । तदा ते दोषत्वेनैव परिगण्यन्ते । रसोपकारकत्वानुपकारकत्वातिरिक्ततयापि तेषां स्थितिः काव्ये कुत्रचिद्भवति उक्तिवैचित्र्यरूपेण[1] ।

एवं बहुप्रकारेण काव्ये विलसतामलङ्काराणामाधारभूतांशा अपि बहुप्रकारका एव । केचन सादृश्यं, केचन विरोधं, केचन लोकन्यायं, केचन विशेषणविच्छित्तिं केचन शृङ्खलाम् आधारीकृत्य बहुविधवैचित्र्यं प्रदर्शयन्ति । तत्र विरोधमूलकालङ्कारा विशिष्यन्ते ये लोके दोषत्वेन परिगणितस्य विषयस्य अलङ्कारत्वं सम्पाद्य चमत्कारातिशयमुत्पादयन्ति । तत्र येन केनापि प्रकारेण अर्थात् स्थायित्वेन, अस्थायित्वेन, कार्यकारणभावभङ्गेन, विपर्ययात्मकतया इत्येवमादिरीत्या विरोधः चमत्करोति । तेषु केचनालङ्कारा यद्यपि विरोधेन न स्पृष्टाः तेऽपि अन्यान्यकारणात् विरोधमूलकालङ्कार इति परिगणिताः काव्यशास्त्रकारैः । तादृशेषु अन्यतमः समालङ्कारः । अत्र तस्यालङ्कारस्य किञ्चिद्विवेचनं क्रियते ।

लोके वस्तुनोर्मध्ये अनुरूपता अननुरूपता वा भवति । यत्र अननुरूपता वर्ण्यते तत्र विषमालङ्कारोऽङ्गीकृतः । किन्तु यत्र अनुरूपता भवति तत्र समालङ्कारः तथा । अनुरूपपदार्थयोः परस्परं योग्यसम्बन्धस्य वर्णनं यत्र भवति तत्र समालङ्कार इत्युच्यते । कविप्रतिभामाध्यमेन द्वयोः योग्यपदार्थयोः सम्बन्धोऽत्र स्थाप्यते । योग्यपदार्थस्य सम्बन्धः योग्यपदार्थेन, अयोग्यपदार्थस्य सम्बन्धः अयोग्यपदार्थेन भवतीति अस्य स्वरूपम् । पारस्परिकं योग्यसम्बन्धस्य वर्णनमेव अस्यालङ्कारस्य जीवनाधायकं तत्त्वम् ।

एवम् अनुरूपतावर्णनात् तत्र कोऽपि विरोधो न भासत एव । तथापि विषमविपर्यय इति परिगणय्य काव्यशास्त्रकारैः अयमलङ्कारः विरोधालङ्कारे निवेशितः । अस्यालङ्कारस्य विविधालङ्कारिकैः दत्तानां लक्षणानामवलोकनेन अयमंशः स्पष्टो भवति ।

[1] यत्र तु नास्ति रसः तत्र केवलमुक्तिवैचित्र्यशालिनः । काव्यप्रकाशः-अष्टमोल्लासः


ISSN: 2320-740X

'सम योग्यतया योगो यदि सम्भावितः क्वचित्' [1] । 'तद् (विषम) विपर्ययः समम्'[2] । "तद्विपर्ययः समम्। यद्यपि विषमस्य भेदत्रयमुक्तं, तथापि तच्छब्देन सम्भवादन्त्यो भेदः परामृश्यते । पूर्वभेदद्वयविपर्ययस्य अनलङ्कारत्वात् । अन्यभेदविपर्ययस्तु चारुत्वात् समाख्योऽलङ्कारः"[3] । 'तद् विपर्ययः समम्'[4] । 'तच्छब्देन त्रयाणां विषमभेदानां परामर्शः । कविना विच्छित्तिविशेषोपनिबन्धं कार्यकारणयोरानुरूप्यम् अनुरूपसंयोगः सामग्रीसाकल्यं च समम्'[5] । 'अनुरूपकार्योत्पत्तौ विच्छित्तिविशेषवशेन सौन्दर्यातिशयदर्शनात् कारणानुरूपत्वे कार्यस्य न किञ्चिच्चारुत्वमिति न वाच्यम्'[6] । 'योग्यतया योगः समम्'[7] । 'सममौचित्यतोऽनेकवस्तुसम्बन्धवर्णनम्[8] । 'सा समालङ्कृतिर्योगे वस्तुनोरनुरूपयोः[9] । 'अस्य (विषमस्य) प्रथमभिदायाः सममिति कविभिर्विपर्यये कथितम्'[10]। 'तत् समं सङ्गमो यत्र द्वयोरप्यनुरूपयोः'[11] । 'समं स्यादनुरूप्येण श्लाघा योग्यस्य वस्तुनः'[12] । 'औचित्येनोत्कृष्टा-पकृष्टयोर्योगे समम्'[13] । 'श्लाघ्यत्वेन भवेद् योग्यो यदि योगस्तदा समम्'[14] । 'समानयोश्चेत् घटना समालङ्कृतिरुच्यते'[15] । 'अनतिशयोक्तिमूलत्वे सत्यनुरूपघटनम् अनौपम्यपर्यन्तत्वे सत्यनुरूपघटनं वा'[16] ।

**समं स्याद् वर्णनं यत्र द्वयोरप्यनुरूपयोः ।**
**सारूप्यमपि कार्यस्य कारणेन समं विदुः ।**

---

[1]काव्यप्रकाशः- सू.१९३

[2]अलङ्कारसर्वस्वम्-४७

[3]अलङ्कारसर्वस्वम्-४७, वृत्तिः

[4]अलङ्काररत्नाकरः-६१

[5]तत्रैव

[6]तत्रैव

[7]काव्यानुशासनम्-६.२७

[8]चन्द्रालोकः-५.७९

[9]प्रतापरुद्रीयम् -८.१६९

[10]एकावली-८.३९

[11]अलङ्कारमहोदधिः-८.५७

[12]साहित्यदर्पणम्-१०.७१

[13]काव्यानुशासनम्- अ.३, पृ.४०

[14]अलङ्कारकौस्तुभम्-८.२५८

[15]साहित्यरत्नाकरः-७.१२४

[16]अलङ्काराघवम्पृ. १४८

**विनानिष्टं च तत्सिद्धिर्यमर्थं कर्तुमुद्यतः ॥**[1]

'अनुरूपसंसर्गः समम्' ।[2] 'अन्योन्यं वस्तुसम्बन्धे सममौचित्यवर्णने'[3] । 'समानयोश्चेद् घटना समालङ्कृतिरुच्यते'[4] ।

**वस्तुनोस्तुल्यगुणयोर्योगस्यौचित्यचर्चया ।**
**प्रशंसनं विशेषेण समाख्यालङ्कृतिर्मता ॥**[5]

१. अनुरूपयोर्द्वयोर्यत्र क्रियते यदि वर्णनम् । तर्हि तत्र परिज्ञेयं समालङ्करणं बुधैः ॥

२. कारणेन हि कार्यस्य सारूप्यमपि तद्विदुः ।

३. यदर्थं कर्तुमुद्युक्तस्तदवाप्तिर्भवेद्यदि । विनानिष्टं तदप्याहुः समं काव्यार्थकोविदाः ॥

४. इष्टार्थावाप्तिसत्त्वेऽपि श्लेषवशादसतोऽनिष्टार्थस्यापि यत्र प्रतीतिः तत्रापि समालङ्कारः स्वीक्रियते ।

५. अनिष्टार्थप्रतीतिं विना श्लेषलब्धसदिष्टावाप्तिप्रतीतिर्यत्र तत्रापि समम् ॥[6]

'अन्योन्यसङ्गमार्हौ सम्बध्येते यदा समं तत्स्यात् '[7] ।

१. यत्रानुरूपघटनं वर्ण्यते तत्समं विदुः ।
२. समं तदपि कार्यस्य सारूप्यं कारणेन यत् ।
३. यत्किञ्चिदिष्टसिद्ध्यर्थं स उद्योगो वितन्यते ।
अनिष्टेन विना तस्य सिद्धिश्च सममुच्यते [8] ॥

एतेषां लक्षणानां परिशीलनेन ज्ञायते यत् अयमलङ्कारः अनुरूपयोर्वर्णनेन भवतीति । किन्तु अनुरूपता उच्चयोर्मध्य एव भवेदिति न । नीचवस्तुनोर्मध्येऽपि तत्सम्भवति । यतः उत्तमवस्तुना उत्तमवस्तुनः योगः यथा अनुरूपतां प्राप्नोति तथैव अधमवस्तुना अधमवस्तुनः योगोऽपि उचितमेव, तयोः अधमत्वरूपेण समत्वात् । किन्तु

[1]कुवलयानन्दः-९१-९३

[2]रसगङ्गाधरः, द्वितीयाननम्, पृ. ४४९

[3]काव्यविलासः-२.४२

[4]नञ्जराजयशोभूषणम्- वि.७, पृ.१९६

[5]अलङ्कारमञ्जरी-१८५

[6]अलङ्कारमञ्जूषा-६४-६५ (वृत्तिः च)

[7]अलङ्कारकौस्तुभम्- पृ. ३७२

[8]अलङ्कारमणिहारः-४१


ISSN: 2320-740X

एकस्य उत्तमत्वम्, अन्यस्य यदि नीचत्वं वर्ण्यते तथा अननुरूपता । अत एव मम्मटाचार्यः समालङ्कारस्य भेदद्वयमङ्गीकृतवान्-सुन्दरवस्तुद्वयस्य अनुरूपसम्बन्धः (सद्योगः) असुन्दरवस्तुद्वयस्य अनुरूपसम्बन्ध (असद्योग) श्चेति । तत्र सद्योगस्य इदमुदाहरणम्-

**धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी**
**रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य ।**
**जातं दैवात्सदृशमनयोः सङ्गतं यत् तदेत-**
**च्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥**[1]

अत्र मृगाक्षी नायिका नाम ब्रह्मणः निर्माणकौशलोत्कर्षस्य निकषस्थानम् अर्थात् अतिसुन्दरी । राजापि स्मराय दत्तपत्रः अर्थात् उत्कृष्टनायकतया कामपदे स्थापितः इति अनयोः मृगाक्षीदेवयोः सतोः योगस्य औचित्यवर्णनात्समालङ्कारः ।

असद्योगस्य इदमुदाहरणम्-

**चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं**
**जातो दैवादुचितरचनासंविधाता विधाता ।**
**यन्निम्बानां परिणतफलस्फीतिरास्वादनीया**
**यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥**[2]

अत्र निम्बकाकयोः निकृष्टतयोचितयोगः इति समालङ्कारः । अत्र सामान्यतया सद्योगः स्तुतौ असद्योगश्च निन्दायां पर्यवस्यति ।

**शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।**
**इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटुनृपाणामेकवाक्यं विवव्रुः ॥**[3]

इन्दुमतीस्वयंवरवृत्तान्तोऽयम् । यदा इन्दुमत्या अजः वृतः तदा द्वयोरपि समानगुणयोः सम्बन्धात् पुरवासिनां मुखात् समकाल एव एतद्वाक्यं निःसृतम् –'समानगुणसम्बन्धात् इयम् इन्दुमती मेघनिर्मुक्तचन्द्रं प्राप्तवत्या चन्द्रिकाया, योग्यं समुद्रं प्राप्तवत्या गङ्गायाश्च च समानतां प्राप्तवती' इति । अत्र इन्दुमती-अजयोः समानगुणत्वात् द्वयोरपि सम्बन्धोऽभिरूपो वर्तते । अत एवेदं सद्योगस्योदाहरणम् ।

[1]काव्यप्रकाशः उ.१०,उदा.५३५

[2]काव्यप्रकाशः उ.१०, उदा.५३६

[3]रघुवंशम्-६.८५

सद्योगासद्योगौ भेदौ अतिरिच्य कार्यकारणभावौचित्यमूलकोऽपि कश्चन समालङ्कारभेदः सम्भवति -

**गुणो पयोधेर्निजकारणस्य न हानिवृद्धी कथमेतु चन्द्रः ॥** [1]

अस्मिन् पद्ये एतदुक्तमस्ति यत् यथा समुद्रः हीयते वर्धते च तथैव तस्य (पयोधेः) पुत्रः चन्द्रोऽपि इति । अत्र कार्यकारणभावौचित्यस्य प्रतिपादनं कृतमस्ति । चन्द्रस्य कारणं समुद्र इति, चन्द्रस्य वृद्धि-क्षययोः तत्पितुः समुद्रस्य वृद्धिक्षयावेव कारणम् इति । विश्वेश्वरपण्डितेन एतदेव पद्यं कार्यकारणभावमूलकसमालङ्कारस्य उदाहरणत्वेन दत्तम् ।

एवम् अस्यालङ्कारस्य लक्षण-भेदादीनां समालोचनेन अस्य विरोधमूलकालङ्कारेष्वन्तर्भावः सर्वथा अनुचित एवेति निर्णीयते । केवलं विषमविपर्ययः समः इत्येव तदभिप्रायः । 'विषमालङ्कारस्य विरोधी' इत्ययमंश एव अस्य तत्र समावेशने कारणं, न त्वन्यत्किमपि ।

कवयः सान्दर्भिकतया एनमलङ्कारं स्वकाव्येषु निबध्नन्ति । रघुवंशे षष्ठे सर्गे इन्दुमतीस्वयंवरप्रसङ्गे,

**कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।**
**त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन॥**[2]

अत्र अजेन्दुमत्योः अनुरूपसम्बन्धः प्रदर्शित इति समालङ्कारः । किरातार्जुनीये द्वितीयसर्गे,

**स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।**
**विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥**[3]

श्लाघ्यगुणैः सज्जनैः सेविते मार्गे चित्तं निदधतां मनुष्याणां दैवकृतानर्थः अपि अभ्युदयेन तुल्यः भवति । सतां वर्त्मानुगमनेन सत्फलप्राप्तिः इति कारणात् समानगुणकार्यस्योत्पत्तिकथनात् समालङ्कारः । चम्पूभारते द्वादशे सर्गे नकुलकृतशकुनिवधप्रसङ्गे,

**अथ तं सुबलात्मजं क्षणादवगत्य प्रियपाशकं मृधे ।**
**यमदापितपाशकं व्यधाद्यमयोः प्राथमिकः पराक्रमी॥**[4]

अत्र प्रियपाशकस्य (शकुनेः) प्रदापितपाशकत्वकथनात् अनुरूपसङ्घटनम् अतः समालङ्कारः ।

**निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।**
**विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥** [1]

---

[1]नैषधीयचरितम्-२२.७४

[2]रघुवंशम् – ६.७९

[3]किरातार्जुनीयम्-२.३४

[4]चम्पूभारतम्-१२.३


ISSN: 2320-740X

नैषधीयचरिते हंसदमयन्तीसंवादे नलप्राप्तिं द्रढयतः हसस्य उक्तिरियम् । रात्र्या चन्द्रं, गौर्या गिरीशं, श्रिया विष्णुं च योजयतः ब्रह्मणः स्वेच्छाकारी प्रयासः योग्ययोः मेलनाय ख्यातः । अतः नलमपि त्वया योजयिष्यतीति भावः । नलदमयन्त्योः अनुरूपसङ्घटनस्य कथनात् समालङ्कारः ।

एवं लोके समत्वं यत्र दृश्यते स एव बाहुल्येन अस्यालङ्कारस्य विषयः भवति । कविप्रतिभया यदा रमणीयतां प्राप्नोति तदा अस्यालङ्कारत्वप्राप्तिरिति शम् ।

**********

[1]नैषधीयचरितम्-३.४८

# रसशास्त्रपरिचयः

(रसेश्वरदर्शनस्य, चिकित्सकीयरसशास्त्रस्य च परिप्रेक्ष्ये)

**विद्वान् कू. वेङ्कटेशमूर्तिः**

समन्वयकः, मुक्तस्वाध्यायपीठम्

अथ किं नाम रसशास्त्रम् ? रसम् अधिकृत्य कृतं शास्त्रम् । कोऽयं रसः? किमयं साहित्यशास्त्रे उच्यमानो रसः? उत मधुराम्लादिरूपेण परिगणितः रुचिसम्बद्धः? न हि सः । अत्र प्रकृतप्रकरणे **रसः** इत्येषः पारदस्य एकः प्रकारः । आधुनिकरसायनशास्त्रे मर्क्युरि अथवा हैड्रार्जिरम् (Hg) इति यदुच्यते तदस्मिन् शास्त्रे रसशब्देन व्यवह्रियते । रसः विभिन्नधातूनां ग्रसने समर्थः इत्यतः, जरारोगादिवारणे उपयुज्यते इत्यतश्च अस्य रस इति नाम निर्दिष्टम् । तदुक्तं रसरत्नसमुच्चये -

**रसनात् सर्वधातूनां रस इत्यभिधीयते ।**
**जरारुङ्मृत्युनाशाय रस्यते वा रसो मतः ॥**[1] इति ।

देहधातुवादयोः निमित्तमुपयुज्यमानाः इतरपदार्थविशेषाः (महारसाः, उपरसाः च) अपि रसशब्देनाभिधीयन्ते । शास्त्रेऽस्मिन् रसस्यैव प्राधान्याद् अस्य शास्त्रस्य रसशास्त्रमिति व्यवहारः । भारतीय-रसशास्त्रीयग्रन्थेषु पारदः, अभ्रकादि- महारसाः, उपरसाः, साधारणरसाः, कनकरजतादिलौहानि – एतेषां गुणाः लक्षणानि, तदुपलब्धिस्थानानि, प्रयोगशालानिर्माणम्, यन्त्रनिर्माणम्, शोधनादिरस-संस्काराः, रसौषधनिर्माणम्, तत्सेवनविधिः, लोहवेधद्वारा सुवर्णनिर्माणम् – इत्येवं बहुषु अंशेषु वैज्ञानिकं विवरणमुपलभ्यते ।

### रसशास्त्रस्य मूलं विकासश्च

**सीसं च मे त्रपुश्चमे श्यामं च मे लोहं च मे .......** इत्यादिना कृष्णयजुर्वेदे चमकप्रश्ने पठितवाक्येन इदमवगन्तुं शक्यते यद् रसशास्त्रस्य मूलं तावद् वैदिकवाङ्मये वर्तत इति । 'ब्राह्मणग्रन्थेषु अपि रसविद्यायाः अंशाः उपलभ्यन्ते । अस्य कल्पस्य आदौ रसशास्त्रस्य विकासः आरब्धः' इत्यभिप्रैति रसजलनिधिकर्ता भूदेवमुखोपाध्यायः । त्रेतायुगे भगवान् श्रीरामचन्द्रः वनवासकाले इमां रसविद्यां कालनाथः इति महर्षेः सकाशादधीत्य रामराजीयम्, रसेन्द्रचिन्तामणिः इति ग्रन्थद्वयं रचयामास इति च श्रूयते । सप्तमशतके नागार्जुननामा रसाचार्यः 'रसरत्नाकरः' इत्येतस्य महतः ग्रन्थस्य विरचनेन महद् योगदानं कृतवान् । एतदारभ्य सप्तदशशतकपर्यन्तम् एतस्य शास्त्रस्य महान् विकासो जातः । एतन्मध्यकाले बहवः रसाचार्याः भारते जाताः।

[1]र.र.स.1.76


ISSN: 2320-740X

**रसशास्त्रस्य उद्देश्यम्**

रसशास्त्रस्य प्रधानतया उद्देशद्वयम् – देहसिद्धिः लोहसिद्धिश्चेति ।

**I. देहसिद्धिः**

पूर्वं पाशुपतमतावलम्बिनः केचन चिन्तयन्ति स्म यत् स्थिरदेहस्य प्राप्त्या (पिण्डस्थैर्येण अर्थात् जरारोगादिरहितदेहप्राप्त्या) चिरकालं जीवित्वा योगाभ्यासादिना तत्त्वज्ञानेन जीवन्मुक्तिः प्राप्तुम् शक्या इति । तर्हि तादृशस्य स्थिरदेहस्य प्राप्तेः उपायः कः इति चिन्तने कृते सति पारदादिरससेवनमेव तदुपायः इत्यवागच्छन् । तत्स्पष्टीकृतं रसेश्वरदर्शने – "अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोपि पिण्डस्थैर्ये स्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिण्डस्थैर्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते ।" (स.द.स. रसे.द.) इति । विविधैः संस्कारैः परिष्कृतः पारदः जरारोगादिमुक्तये कल्पते स्म । अधोनिर्दिष्टवाक्याभ्याम् इदं स्पष्टं भवति –

**'एकोसौ रसराजः शरीरमजरामरं कुरुते'**[1]

**'दिव्या तनुर्विधेया हरगौरीसृष्टिसंयोगात्'** ।

एवं दिव्यदेहप्राप्तिः एव देहसिद्धिरिति कथ्यते ।

**II. लोहसिद्धिः**

पारदसंस्कारेण/ताम्रवङ्गादीन् धातून् उपयुज्य सुवर्णनिर्माणपद्धतिः लोहसिद्धिः / लोहवेधः इत्युच्यते ।

एतादृश- महदुद्देशेन विकसितमपि इदं शास्त्रं रसप्रक्रियायाः क्लिष्टत्वात् सम्प्रति केवलम् ओषधीयरससायनशास्त्ररूपेण प्रयोगपथे वर्तते ।

**रसाचार्याः**

चन्द्रसेनादयः बहवः प्राचीनाः रसाचार्याः रसरत्नसमुच्चयकारेण वाग्भटाचार्येण स्वीयग्रन्थे निर्दिष्टाः । रसरत्नसमुच्चयस्तु क्रि.श.षष्ठशतकात् बहु प्रागेव रचितः ग्रन्थ इति भाति । ततः परं ये रसाचार्याः आसन् तेषु अधोनिर्दिष्टानां नामानि श्रूयन्ते- रसरत्नाकरकर्ता नागार्जुनः, रसहृदयतन्त्रकर्ता भिक्षुगोविन्दः, रससारकर्ता गोविन्दाचार्यः, काकचण्डेश्वरीमततन्त्रकर्ता काकचण्डेश्वरः इत्यादयः । बहवो ग्रन्थाः अद्यत्त्वे नोपलभ्यन्ते । अद्यत्वे उपलभ्यमानेषु प्राचीन-रसशास्त्रग्रन्थेषु वाग्भटाचार्यस्य रसरत्नसमुच्चयः अन्यतमः प्रामाणिकश्च वर्तते । अतस्तं ग्रन्थमाधृत्य किञ्चिदिह रसशास्त्रमवलोकयामः – त्रिंशदध्यायान्विते अस्मिन् ग्रन्थे प्रथमाध्याये पारदप्रसङ्गो निरूपितः । तत्र हि उपलब्धिस्थानभेदेन पारदस्य पञ्च भेदाः इत्थं निर्दिष्टाः –

[1] र.र.स.1.42

**रसो रसेन्द्रः सूतश्च पारदो मिश्रकस्तथा ।**

**इति पञ्चविधो जातः क्षेत्रभेदेन शम्भुजः ॥**[1]

उपलब्धिस्थानभेदेन पारदस्य वर्णाः चतुर्धा भवन्ति यथा –

**क्षेत्रभेदेन विज्ञेयं शिववीर्यं चतुर्विधम् ।**

**श्वेत रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात्** [2]॥ इति ।

कस्य वर्णस्य पारदः कस्मिन् कार्ये प्रयुज्यते इत्यपि तत्र उल्लेखो वर्तते –

**श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ।**

**धातुवादे तु तत्पीतं खेगतौ कृष्णमेवच ॥**

अत्र शास्त्रे पारदः रसराजरूपेण परिगणितः ।

द्वितीयाध्याये अभ्रकम्, वैक्रान्तम्, माक्षीकम्, विमलः शिलाजतुः, सस्यकम्, चपलः, रसकः इति अष्टौ महारसाः सविस्तरं प्रतिपादिताः ।

तृतीयाध्याये गन्धकम्, गैरिकम्, कासीसम्, तुवरी, तालकः मनःशिला, अञ्जनानि, कङ्कुष्ठम् - इत्येते उपरसाः ; कम्पिल्लः गौरीपाषाणः, नवसारः कपर्दः (वराटिका), अग्निजारः, गिरिसिन्धूरम्, हिङ्गुलं, मृद्दारशृङ्गम् इति अष्ट सधारणरसाः च वर्णिताः । चतुर्थे अध्याये रत्नानि, पञ्चमे शुद्धलोह- पूतीलौह- मिश्रलोहानि तदवान्तरभेदाश्च निरूपिताः । षष्ठे शिष्यस्वीकारविषये वर्णनं प्राप्नुमः।

**प्रयोगशाला**

पारदादिरसानां लोहानां धातूनाम् वा औषधेषु प्रयोगात् पूर्वं शास्त्रोक्तविधिना शुद्धीकरणं, द्रवीकरणं, भस्मकरणं, स्वेदनम् इत्यादीनि कर्माणि सम्पादनीयानि भवन्ति । एतदर्थम् प्रयोगशालायाः आवश्यकता वर्तते । शास्त्रेस्मिन् प्रयोगशाला रसशाला इति कथ्यते । रसरत्नसमुच्चयस्य सप्तमाध्याये रसशाला-निर्माणविषये वर्णनमस्ति ।

अष्टमः परिभाषाध्यायः । नवमे अध्याये रसकर्मोपयोगि-यन्त्राणि वर्णितानि । दोलायन्त्र – स्वेदिनीयन्त्र - पातनयन्त्र - दिपिकायन्त्र - तिर्यक्पातनयन्त्र - प्रभृतीनि षट्त्रिंशद् यन्त्राणि निर्माणविधिसहितं वर्णितानि । उदाहरणार्थं तिर्यक्पातनयन्त्रवर्णनम् अवलोक्यताम् -

---

[1] र.र.स.1.67

[2] र.ज.नि.



ISSN: 2320-740X

**क्षिपेद्रसं घटे दीर्घनताधोनालसंयुते ।**
**तन्नालं निक्षिपेदन्यघटकुक्ष्यन्तरे खलु ॥**
**तत्र रुद्ध्वा मृदा सम्यग्वदने घटयोरथ ।**
**अधस्ताद्रसकुम्भस्य ज्वालयेत्तीव्रपावकम् ॥**
**इतरस्मिन् घटे तोयं प्रक्षिपेत् स्वादुशीतलम् ।**
**तिर्यक्पातनमेतद्धि वार्तिकैरभिधीयते ॥**[1]

दशमे अध्याये रसकर्मोपयोगिमूषाणां वर्णनमस्ति । एकादशे रसशोधनस्य रससंस्काराणां विवरणमुपलभ्यते । रसशास्त्रे पारदस्य अष्टादश संस्काराः प्रोक्ताः । ते च – स्वेदनम्, मर्दनम्, मूर्छनम्, उत्थापनम्, पातनम्, रोधनम्, नियामनम्, सन्दीपनम्, अनुवासनम्, सञ्चारणम्, गर्भदृतिः बाह्यदृतिः, ,रञ्जनम्, सारणा, अनुसारणा, प्रतिसारणा, वेधः इत्येते । अत्र आदिमाः अष्ट संस्काराः चिकित्सार्थं रसानाम् उपयोगयोग्यतां सम्पादयितुम् आवश्यकाः । अन्ये धातुवादसन्दर्भे अपेक्षिताः । (अथदौ स्वेदनं कर्म .... आ. कं. 4. 2 तः 6)

रसरत्नसमुचयस्य द्वादशात् अध्यायात् ग्रन्थान्तं यावत् रोगविशेषाणां चिकित्सा, ओषधीययोगाः, रसायनविधिः – इत्यादयो विषयाः वर्णिताः ।

**रसाचार्याणां प्रयोगशीलता ज्ञानोत्कर्षश्च**

रसशास्त्रस्य ग्रन्थेषु वर्णिताः बहवः विषयाः तेषां विशिष्टज्ञानं, प्रयोगशीलतां, वैज्ञानिकदृष्टिं च ज्ञापयन्ति । तद्विषये किञ्चिदत्र अवलोकयन्तु –

1. विविधरसानां, लोहानां मणीनां च शोधन-मारणादिकं कर्तुं (अत्र मारणं नाम भस्मकरणमित्यर्थः)बहवः उपायाः प्रोक्ताः । लोहभस्मकरणस्य त्रयोदशविधानानि रसरत्नसमुच्चये प्रोक्तानि ।

2. हरतालशोधनस्य भस्मकरणस्य च एकविधः उपायः रसरत्नसमुच्चये वर्णितः । आयुर्वेदप्रकाशे अपरा पद्धतिः, रसजलनिधौ तावदन्या काचित् पद्धतिरपि वर्णिता वर्तते । अनेन ज्ञायते यत् प्राचीनरसाचार्याः न केवलं प्रयोगशीलाः अपि तु स्वतन्त्रचिन्तनशीलाः आसन्निति ।

3. दृतिः - केचन धातवः रत्नानि च सामान्यदशायां घनस्थितौ भवन्ति । धातूनां रत्नानां वा द्रवीकृतस्थितिः दृतिः इत्युच्यते । केषाञ्चित् कठिणधातूनां / मणीनां द्रवीकरणं न तथा सुकरम् । किन्तु अति कठिणधातूनामपि द्रवीकरणोपायाः सन्ति । यथा वज्रद्रावणोपायः –

[1] र.र.स.9.47 तः 49

**वज्रवल्ल्यन्तरस्थं च कृत्वा वज्रं निरोधयेत् ।**

**आम्लभाण्डगतं स्वेद्यं सप्ताहात् द्रवतां व्रजेत् ॥**[1]

वज्रं तु कठिनतमः पदार्थः इति सर्वैः ज्ञातमेव । वज्रवल्ल्याः कल्कस्य मध्ये वज्रचूर्णं / खण्डं निक्षिप्य तत् भूर्जपत्रेण वस्त्रेण च बद्ध्वा आम्लवर्गपदार्थानां स्वरसेन काञ्ज्या च भरिते पात्रे संस्थाप्य दोलायन्त्रे यदि स्वेदनं क्रियते तर्हि सप्ताहात् वज्रद्रावणं सिद्धं भवति ।

4. कदाचित् द्रवीकरणानन्तरमपि दृतयः त्वरितमेव घनीभूताः भवन्ति । किन्तु दीर्घकालं यावत् द्रवीकृतस्थितिं संरक्षितुं कश्चन उपायः इत्थं प्रदर्शितः दृश्यते रसग्रन्थे –

**कुसुम्भतैलमध्ये तु संस्थाप्य दृतयः पृथक् ।**

**तिष्ठन्ति चिरकालं तु प्राप्ते कार्ये नियोजयेत् ॥**[2]

**रसशास्त्रस्य दार्शनिकं स्वरूपम्**

रसशास्त्रस्य भौतिकवैज्ञानिकं स्वरूपमेतावता विवृतम् । अस्य शास्त्रस्य दार्शनिकपक्षोऽप्यस्ति । यद्यपि रसशास्त्रे आधिक्येन चिकित्साविषये लोहवेधविषये च आधिक्येन प्रतिपादनं दृश्यते तथापि केवलं तदर्थं प्रवृत्तं नासीत् एतत् शास्त्रम् ।एतस्य प्रधानोद्देश्यं तवत् जीवन्मुक्तिरेव । पारदादिना निर्मितेन रसायनेन दिव्यदेहं प्राप्य अजरामरो भूत्वा जीवन्मुक्तिः सम्पादनीया इति रसेश्वरदर्शनं बोधयति । उक्तं च – "न च रसशास्त्रं धातुवादार्थमेवेति मन्तव्यम् । देहवेधद्वारा मुक्तेरेव परमप्रयोजनात्" ( स.द.सं. रसे.द.) इति ।

**सन्दर्भग्रन्थाः**

1.रसरत्नसमुच्चयः, वाग्भटाचार्यः,सं. श्री धर्मा. शर्मा, 1962, मो. ला.ब. दा. ,वाराणसी

2. रसरत्नसमुच्चयः, 2012, चौ. सं. प्र. दिल्ली

3.सर्वदर्शनसंग्रहः, B. O. R. I., Pune

4. बृहद्रसराजसुन्दरम्, पं. दत्तरामचौबे,1950, मो. ला. ब. दा., दिल्ली

**********

[1] र.र.स.4.72

[2] र.र.स.4.77



ISSN: 2320-740X

# संस्कृतप्रचारदृष्ट्या संस्कृतशोधकार्याणां क्रियान्वयनोपायाः

**डा. गणेश ति. पण्डितः**
सहायकाचार्यः, शिक्षाविभागः

अथ मानवानां कालानुरूपाः आवश्यकताः एव नानाविधविचाराणां पदार्थानां च गवेषणे सर्जने वा हेतवः सन्तीति विदितचरमेव । प्रत्येकमपि मानवः अनुदिनं जिज्ञासते । तदीयाः जिज्ञासाः समस्याः आवश्यकताश्च कालान्तरे शोधसमस्यारूपेण क्वचित् परिवर्तेरन् । आधुनिकयुगे तु प्रतिक्षणं मानवस्य आचारविचारव्यवहारेषु परिवर्तनं परिदृश्यते । समाजस्य प्रत्येकमपि क्षेत्रम् आधुनिकतायाः प्रभावेण आमूलाग्रं परिवर्तमानं वर्तते । यथा व्यावसायिकक्षेत्रे चिकित्साक्षेत्रे वाणिज्यक्षेत्रे प्रबन्धनक्षेत्रे राजनैतिकक्षेत्रे च आधुनिकतायाः गणकयन्त्रयुगस्य वा प्रभावः परिदृश्यते तथैव शिक्षाक्षेत्रेऽपि अस्य युगस्य सत्परिणामाः दुष्परिणामाश्च परिदृश्यन्ते । एतेषां परिणामानां प्रभावेण जातस्य विकासस्य विकासावरोधस्य वा विषये शोधकार्याणि अत्यन्तम् अनिवार्याणि संवृत्तानि । अतीतवर्तमानकालयोः परिणामान् आश्रित्य संशोधनाभावे भव्यस्य भविष्यस्य कल्पनमपि असम्भवमेव । अतः सामयिकविचारकेन्द्रितस्य शोधकार्यस्य महती आवश्यकता अनुभूयते । सामयिकान् विचारान् आश्रित्य संस्कृतज्ञैरपि शोधकार्यम् अवश्यम् अनुष्ठेयमेव । प्राचीनवाङ्मयस्यापि विभिन्नदृष्ट्या पर्यालोचनं करणीयमेव ।

अद्यत्वे संस्कृतविश्वविद्यालयेषु उच्चाध्ययनकेन्द्रेषु च शोधाध्येतॄणां (Research Scholars) महन्महत्त्वं वर्तते । प्रत्येकमपि संस्कृतोच्चाध्ययनसंस्थायाः शोधकार्याणां शोधाध्येतॄणां शोधविभागानां च गुणवत्तापरीक्षणाय राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषत्प्रभृतयः नानाविधाः परिषदः सन्ति । अतः शोधविभागस्य शोधाध्येतॄणां च विषये सर्वत्र उच्चशिक्षासंस्थासु प्राथम्यं परिकल्प्यते । विशिष्य प्रत्येकमपि शोधकार्यस्य सामयिकोपयोगितां सामाजिकोपयोगितां च परिशील्यैव विद्यावारिधिरित्युपाधिरपि दीयते । परन्तु अद्यावधि संस्कृतक्षेत्रे जातेषु शोधकार्येषु लोकोपयोगितायाः सामाजिकोपयोगितायाः तत्त्वानि अल्पमात्रेण परिदृश्यन्ते इत्यस्त्येव आक्षेपः । विशिष्य सीमितैः सङ्कीर्णैश्च संस्कृतशोधकार्यैः संस्कृतभाषाप्रचारकर्मणि नाधिकः उपयोगः दृश्यते इत्यपरः आक्षेपोऽपि परिदृश्यते । अतः एतद्विषये विहङ्गवीक्षणाय लेखोऽयं प्रवृत्तः ।

स्वतन्त्रोत्तरभारते विशिष्य संस्कृतक्षेत्रे अद्यावधि जातेषु शोधकार्येषु गुणात्मकस्य आहोस्वित् वर्णनात्मकस्य शोधस्यैव आधिक्यं परिदृश्यते । तत्रापि केषुचित् क्षेत्रेषु (वाङ्मयस्य प्रकारेषु) शोधकार्यम् अत्यल्पमात्रेण अजायत । इतरेषु क्षेत्रेषु अत्यधिकमात्रेणापि अनुसन्धानकार्याणि समभवन् ।

प्राचीनटीकाग्रन्थानामेव समीक्षणपरीक्षणतुलनादिभिः (पौराणिकविधिभिः) समयाकर्तुं प्रयतन्ते शोधाध्येतारः इत्यपवादोऽपि वर्तते । कालिदासभारविभवभूतिप्रभृतीन् महाकवीन् पाणिनिपतञ्जलिकपिलजैमिन्यादीन् दार्शनिकान् च पौनःपुन्येन निष्पीड्य कः पुरुषार्थः समासादयितुं शक्यः? इत्यपि अपवादरूपः प्रश्नः तत्र तत्र श्रूयते। संस्कृतशोधकार्येषु एकमुखता (One Way) समागता अस्ति । किञ्च शोधव्यवधानं (Research Gaps) निवारयितुं संस्कृतज्ञैः यत्नः विधेयः इत्यपि आधुनिकैः परामर्शकैः उच्यते । विगतेषु वर्षेषु कृतानि शोधकार्याणि बहूनि एकरूपाणि सन्तीत्यपि बहूनां वादः ।

उदाहरणार्थम् – **“अभिज्ञानशाकुन्तलस्य नाट्यशास्त्रीयमध्ययनम्”, “आधुनिकसंस्कृतसाहित्ये दार्शनिकतत्त्वानां समीक्षणम्”, “काव्यप्रकाशस्य सर्वाङ्गीणम् इतिवृत्तिविवेचनम्”, “संस्कृतभक्तिकाव्यपरम्परायाः साहित्यिकं परिशीलनम्”, “वेदान्तशास्त्रीयग्रन्थेषु आत्मानात्मविवेकयोस्तुलनात्मकमध्ययनम्”, “धर्मशास्त्रग्रन्थेषु राजधर्मस्य समीक्षात्मकमध्ययनम्”, “ब्रह्मामृतवर्षिणीनाम्न्याः ब्रह्मसूत्रवृत्तेः पाठसमीक्षात्मकमध्ययनम्”, “कौमुदीकथाकल्लोलिन्याः समीक्षकात्मकमध्ययनम्”, “मम्मटाचार्यपण्डितराजजगन्नाथयोः काव्यशास्त्रीयम् अध्ययनम्”** इत्यादयः उपसहस्रं शोधप्रबन्धाः एतावत्पर्यन्तं मण्डिताः सन्ति संस्कृतलोके । एते शोधप्रबन्धाः योग्याः श्लाघ्याः च सन्त्येव । परन्तु वर्तमानकाले संस्कृतक्षेत्राय समाजाय च एतादृशैः शोधप्रबन्धैः किं वा प्रयोजनम् ? समसामयिकसमस्यानां निर्मूलनप्रसङ्गे नवाचाराणां ग्रहणप्रसङ्गे च एतादृशानां शोधप्रबन्धानां कार्याणां वा कियता प्रमाणेन योगदानं भवितुमर्हति? संस्कृतभाषायाः प्रचारदृष्ट्या संस्कृतक्षेत्रस्य विकासदृष्ट्या च एते कथम् उपकारकाः सिद्ध्यन्ति? निर्दिष्टविषयशास्त्रकेन्द्रितैः शोधप्रबन्धैः किं वा प्रयोजनम् ? इत्यादयः प्रश्नाः पुङ्खानुपुङ्खरूपेण सुमनसां मनस्सु समुद्भवन्ति प्रसङ्गेऽस्मिन् ।

संस्कृतशोधकार्याणां क्रियान्वयनं कष्टमेव । यतो हि अधिकाधिकानि शोधकार्याणि सैद्धान्तिकानि सन्ति न तु प्रायोगिकानि । अतः प्रयोगात्मकपक्षकेन्द्रितानि शोधकार्याणि आधिक्येन दृश्येरन् इत्युच्यते आधुनिकैः शिक्षाविद्भिः । सैद्धान्तिकशोधप्रबन्धेष्वपि सामयिकाः क्रियापराः प्रयोगार्हाश्च शोधप्रबन्धाः यदि स्युः तर्हि अपवादाः अपि नायान्ति । Cut and Paste एव विद्यावारिधिः (Doctor of Philosophy) इत्युपाधिग्रहणाय विद्यमानः सरलः उपायः इत्यपि केचन अगतिकाः निष्क्रियाः विलपन्ति । परन्तु अनुसन्धानं चातुर्यमूलं सारगर्भितं च कार्यं वर्तते । अतः अस्य गाम्भीर्यस्य उपेक्षा न कार्या । यद्यपि संस्कृतभाषाप्रचाराय नैकानि अनौपचारिकानि संसाधनानि सन्ति तथापि तेषु विश्वसनीयतायाः वैधतायाः वस्तुनिष्ठतायाः प्रयोगार्हतायाः च अभावः तत्र तत्र दृश्यते । विभिन्नसन्दर्भेषु अनुप्रयोगार्हतायाः मात्रा कियती इत्यत्र निर्दिष्टं निर्दुष्टम् उत्तरं नोपलभ्यते । अतः


ISSN: 2320-740X

सांख्यिकीयविधिमाश्रित्य वस्तुनिष्ठं शोधकार्यं संस्कृतक्षेत्रे आधिक्येन कर्तव्यं वर्तते । संस्कृतभाषाप्रचाराय अपेक्षितानां नूतनकौशलानां सर्जनं सम्भवति किम् ? संस्कृतशिक्षणसिद्धान्तेषु विद्ध्युपकरणेषु च आमूलाग्रं परिष्कारं कर्तुं कश्चन प्रविधिविशेषः उपलभ्यते किम् ? इत्यादयः गभीराः विषयाः शोधक्षेत्रे उपलभ्येरन् । अन्यथा **“गतानुगतिको लोकः”** इत्युक्त्यनुसारं कृतानि क्रियमाणानि च शोधकार्याणि चर्वितचर्वणानि सम्भवन्ति ।

राष्ट्रपतिपुरस्कारपुरस्कृतैः कैश्चित् संस्कृतज्ञैः उक्तं यत् – **“संस्कृतवाङ्मयस्य अवलोकनावसरे अध्ययनावसरे शोधाध्येतृभिः अन्यैः संस्कृतसंशोधकैः च विभिन्ना विशिष्टा नव्या च दृष्टिः वाङ्मये निक्षेपणीया”** इति । तैरुच्यते यत् कालिदासीयं वाङ्मयमधिकृत्य इतः परं शोधकार्याणि नैव कर्तव्यानीति अस्माभिः नोच्यते परन्तु कालिदासीयेषु नाटकेषु प्रयुक्तानां क्रियापदानां लोकव्यवहारदृष्ट्या तन्नाम संस्कृतसम्भाषणसंवर्धनदृष्ट्या भाषिकविकासदृष्ट्या च कथम् अनुप्रयोगः कर्तुं शक्यते इत्यनया दृष्ट्या शोधकार्यं करणीयमिति । एवमेव दार्शनिकेषु ग्रन्थेषु प्रयुक्तानां विविधानां दृष्टान्तभूतानां च न्यायानां लौकिकसमस्यानिवारणप्रसङ्गे अथवा सामाजिकन्यायपरिरक्षणसन्दर्भे कथमनुप्रयोगः सम्भवतीति शोधाध्येतृभिः परिशीलनीयमिति । एतानि द्वित्राणि केवलं उदाहरणरूपेणैव तैः उक्तानि । शिष्टानि सुधीभिः स्वयमेव आकलनीयानि । एवमेव ‘शैक्षिकानुसन्धानपद्धतिः’ इत्येतस्य शोधग्रन्थस्य लेखकैः उक्तं यत् अद्यावधि मण्डितेषु शोधप्रबन्धेषु प्रायः दश प्रतिशतमात्रं संस्कृतभाषाप्रचारदृष्ट्या विकासदृष्ट्या च पूरकाः विचाराः उपलभ्यन्ते इति । अतः प्राविधिकसिद्धान्तविद्ध्युपकरणानां साहय्येन संस्कृतवाङ्मये सन्निहितानां सामयिकानां सर्वकालोपयोगिनां विषयविशेषाणां गवेषणं विधाय विशिष्टानि शोधकार्याणि सम्पादनीयानि सन्ति । अन्यथा संस्कृतशोधकार्याणि केवलम् उपाधिग्रहणाय उद्योगग्रहणाय वा सहायकानि सिद्ध्यन्ति इति सामाजिकाः आक्षिपेयुः । अतः एतद्विषये शोधकर्मणि व्यापृताः सर्वे ध्यानं दद्युरिति शिवम् ।

परिशीलितग्रन्थसूची

१. अनुसन्धानसन्दर्शिका – प्रो. एस्. पी. गुप्ता, शारदा पुस्तक भवन, इलाहाबाद
२. शैक्षिकानुसन्धानपद्धतिः – डा. चन्द्रकान्तः, चारुल प्रकाशन , नागपुर
३. विकासोन्मुख भारतीय समाज में शिक्षक और शिक्षा – प्रो. एस्. पी. गुप्ता,
श्री विनोद पुस्तक मन्दिर, आगरा

**********

# विरोधाधिकरणम्

**डा. एस्. वेङ्कटेशताताचार्यः**
सहायकाचार्यः, मीमांसाविभागः

पूर्वमीमांसायाः प्रथमाध्यायस्य तृतीयपादस्य द्वितीयमधिकरणं विरोधाधिकरणम् ।अत्र श्रुतिविरुद्धस्मृतीनामप्रामाण्यं निरूपितम् ।

**विषयसंशयसङ्गतयः** - अत्र एवं संशयः – "औदुम्बरी[1] सर्वा वेष्टयितव्या"[2] इत्यादयः "औदुम्बरीं स्पृष्ट्वा उद्गायेदि"त्यादिश्रुतिविरुद्धाः स्मृतयः प्रमाणं न वेति । प्रथमाध्याये धर्मे प्रमाणं निरूप्यते । इदं च निरूपणमुत्सर्गापवादाभ्यां क्रियते । अपवादो हि "इमान्येन धर्मे प्रमाणानि " इति अवधारणाय आवश्यकः । अत एव विध्यादीनां धर्मे प्रामाण्यं निरूपयद्भिः शास्त्रकारैः प्रत्यक्षादीनामप्रामाण्यमपि निरूपितम् । अतः अस्मिन्नधिकरणे श्रुतिविरुद्धस्मृतीनामप्रामाण्यनिरूपणमपि प्रथमाध्यायप्रतिपाद्यधर्मप्रमाणपरिच्छेदोपयोगि भवतीति सिद्ध्यति प्रथमाध्याये सङ्गतिः । वेदातिरिक्तधर्मप्रमाणनिरूपणम् अस्य पादस्य अर्थः । इदमपि निरूपणमुत्सर्गापवादाभ्यां क्रियते । लोभादिमूलकस्मृतीनां शाक्यादिस्मृतीनां च अप्रामाण्यस्यापि अस्मिन् पादे निरूपितत्वात् । अतः अस्मिन् अधिकरणे तृतीयपादफलीभूतवेदातिरिक्त धर्मप्रमाणपरिच्छेदोपयोगिनः श्रुतिविरुद्धस्मृतीनामप्रामाण्यस्य निरूपणात् पादसङ्गतिर्लभ्यते । अनन्तरसङ्गतिस्तु आपवादिकी । पूर्वाधिकरणे सामान्यतः स्मृतीनां धर्मे प्रामाण्यस्य निरूपणात् , अत्र च कासाञ्चित् स्मृतीनां तदपवादकरणात् ।

**पूर्वपक्षः**- " औदुम्बरी सर्वा वेष्टयितव्ये"त्यादिस्मृतीनामपि मन्वादिशिष्टत्रैवर्णिकप्रणीतत्वाविशेषात् "अष्टकाः कर्तव्या" इत्यादिस्मृतिवत् श्रुतिमूलकत्वमेव । अतो धर्मे प्रामाण्यमेव । न च "औदुम्बरीं स्पृष्ट्वा उद्गायेदि"ति प्रत्यक्षश्रुतिविरुद्धा उक्तस्मृतिमूलभूतश्रुतिः कथं कल्पयितुं शक्यते ? स्मृत्युक्तसर्ववेष्टनानुष्ठाने हि श्रुत्युक्तः स्पर्शः कर्तुं न शक्यत इति स्पष्ट एव श्रुतिस्मृत्योर्विरोधः इति वाच्यम् । "अतिरात्रे षोडशिनं गृह्णाति", "नातिरात्रे षोडशिनं गृह्णाति" इत्येवं परस्परविरुद्धानामपि बह्वीनां श्रुतीनां दर्शनेन स्पर्शनश्रुतिविरुद्धायाः सर्ववेष्टनश्रुतेः कल्पने

[1] ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये काचिदौदुम्बरी शाखा निखन्यते । तस्याश्च वाससा वेष्टनं स्मर्यते– "औदुम्बरी सर्वा वेष्टयितव्ये"ति । जैमिनीयन्यायमालाविस्तरे पृ. सं. २९ .

[2] क्वचिद्भाट्टदीपिकापुस्तके वेष्टितव्येति पाठः । तत्रार्थस्य सङ्गतिः स्पष्टा । वेष्टयितव्येति पाठे "निवृत्तप्रेषणाद्धातोः हेतुमण्णौ शुद्धेन तुल्योर्थः" इति सिद्धान्तकौमुद्यां ण्यन्तप्रक्रियामुक्तरीत्या अर्थो वर्णनीयः ।


ISSN: 2320-740X

बाधकाभावात् । विरोधश्च षोडशिग्रहणाग्रहणयोरिव विकल्पेन परिहरिष्यते । अङ्गताबोधकप्रमाणेषु यथा श्रुत्या लिङ्गस्य बाधः, न तथात्र श्रुत्या स्मृतेर्बाधो वक्तुं शक्यते। तत्र हि “ऐन्द्र्या गार्हपत्यमुपतिष्ठत” इति प्रत्यक्षश्रुत्या ऐन्द्र्या ऋचः गार्हपत्योपस्थानाङ्गत्वेन विनियोगे जाते मन्त्रस्य प्रयोजनाकांक्षाया निवृत्तत्वात् इन्द्रप्रकाशनसामर्थ्येन न विनियोजकश्रुतिः कल्प्यते, कल्पनामूलभूताया आकांक्षायाः प्रत्यक्षश्रुतिविनियोगेन निवृत्तत्वात् । अतः तत्र श्रुत्या लिङ्गस्य बाधो युज्यते। अत्र तु विरुद्धप्रत्यक्षश्रुतिसत्त्वेऽपि सर्ववेष्टनस्मृतेः किं मूलमित्याकांक्षा न निवर्तते । तत्र च भ्रान्त्यादिमूलकत्वकल्पने गौरवात् श्रुतिमूलकत्वमेव कल्पनीयमिति पूर्वाधिकरणन्यायेन सिद्ध्यति। प्रमेयापहारनिबन्धनबाधोऽप्यत्र वक्तुं न शक्यते । वह्नौ औष्ण्यप्रत्यक्षेण शैत्यानुमानस्य बाधो भवितुमर्हति । औष्णस्य शैत्याभावव्याप्यत्वदर्शनेन वह्नौ शैत्यभावानुमानात् ,तेन च शैत्यानुमानविषयस्य शैत्यस्य अपहारात् (अभावनिश्चयात् ) । प्रकृते तु स्पर्शश्रुत्या सर्ववेष्टनस्मृतिप्रमेयस्य अपहारो न संभवति । स्पर्शश्रुत्या हि औदुम्बर्याः स्पर्शः कर्तव्य इति ज्ञायते । सर्ववेष्टनं न कार्यमिति न ज्ञायते । विकल्पेन उभयोरपि संभवात् । शैत्यौष्ण्ययोस्तु न विकल्पः, तयोः कालभेदेनापि सामानाधिकरण्यस्य क्वचिदप्यदर्शनात् । अतः सर्ववेष्टनस्मृतिः प्रमाणमिति पूर्वः पक्षः ।

**सिद्धान्तः -** अत्र भाष्यकाराभिमतः सिद्धान्त एवं वर्तते – अनुमाने अनुमेयजिज्ञासा हेतुः । औदुम्बर्याः प्रत्यक्षया स्पर्शनश्रुत्या अवेष्टितत्वरूपेण परिच्छिन्नत्वात् “औदुम्बरी सर्वा वेष्टयितव्या” वेति जिज्ञासाया अभावेन न सर्ववेष्टनबोधकश्रुतेरनुमानसंभवः । अतः श्रुतिमूलकत्वाभावेन सर्ववेष्टनस्मृतिरप्रमाणम् । एवं प्रत्यक्षश्रुतिविरोधाभावेऽपि यत्र लोभादि मूलं दृश्यते, यथा “वैसर्जनहोमीयं वासोऽध्वर्युः परिगृह्णाति”[1] इत्यादौ, तत्रापि क्लृप्तस्य लोभादेरेव मूलत्वोपपत्तौ श्रुतिमूलकत्वाभावादप्रामाण्यमेवेति ।

अत्र वार्तिककाराभिप्राय एवं वर्तते- अनुमेयजिज्ञासा अनुमितिकारणं न भवति । वह्न्याद्यजिज्ञासायामपि धूमादिदर्शनेन वह्न्याद्यनुमितेरुत्पत्तिदर्शनात् । जिज्ञासाया अनुमित्यङ्गत्वे सत्यपि अत्र अनुमेयजिज्ञासाया अक्षतत्वेन श्रुतिकल्पने न किञ्चिद्बाधकम् । सर्ववेष्टनस्मृतेः मूलं किमिति जिज्ञासा तावत् प्रत्यक्षश्रुतिविहितस्पर्शनज्ञाने सत्यपि नापैत्येव । इयमेव जिज्ञासा श्रुतिकल्पनायां कारणीभूता, न तु “औदुम्बरी सर्वा वेष्टयितव्या न वे”ति जिज्ञासा। यदपि प्रत्यक्षश्रुतिविरोधाभावेऽपि लोभादिमूलदर्शनेन “वैसर्जनहोमीयं

[1] “सन्ति ज्योतिष्टोमे वैसर्जनाख्या होमाः वैसर्जनानि जुहोति” इति । तत्र “अध्वर्युं यजमानोन्वारभते यजमानं पत्नी पत्नीमितरे पुत्रभ्रातरोऽहतेन वाससा सम्प्रच्छन्ना भवन्ति” इति विहितं वासः प्रकृत्य स्मरन्ति – “वैसर्जनीयं वासोऽध्वर्युर्गृह्णाति” इति । अध्वरमीमांसाकुतूहलवृत्तौ प्रथमभागे पृ. सं. ६१

वासोऽध्वर्युः परिगृह्णाति" इत्यादिस्मृतीनामप्रामाण्यमित्युक्तं, तदपि न युज्यते । अष्टकादिस्मृतीनामपि कथञ्चिल्लोभादिमूलकत्वसम्भवेन श्रुतिमूलकत्वाभावप्रसङ्गेन अप्रामाण्यापत्तेः । अतः मन्वादिप्रणीतत्वात् शिष्टत्रैवर्णिकपरिग्रहाच्च अष्टकादिस्मृतिवदेव सर्ववेष्टनादिस्मृतेरपि श्रुतिमूलकत्वमेव । श्रुतिमूलकत्वाच्च धर्मे प्रामाण्यस्य संभावितत्वात् न अप्रामाण्यनिश्चयः । तथापि स्मृतिमूलभूतश्रुतेः प्रत्यक्षोपलब्धिं विना प्रत्यक्षश्रुतिविरुद्धस्मृत्युक्तसर्ववेष्टनादिकं नानुष्ठेयम् । अर्थवादाद्युन्नीतविधिमूलकत्वस्यापि स्मृतिषु दर्शनेन प्रकृतेऽपि तादृशविधिमूलकत्वस्य संभावितत्वात्, अर्थवादादिभ्यः विध्युन्नयनस्य च प्रत्यक्षविधिविरोधे आभासत्वात् । अतश्च यावच्छ्रुतिदर्शनमननुष्ठानलक्षणमप्रामाण्यमित्येव सूत्रकाराभिप्राय इति ।

यद्वा एतदधिकरणसूत्रं शाक्यादिस्मृतीनामप्रामाण्यप्रतिपादनपरम् । तथाहि– शाक्यादीनमपि क्षत्रियत्वप्रसिद्धेः तेषामपि वेददर्शनसंभवात् तत्प्रणीतस्मृतीनामपि (चैत्यवन्दनादि प्रतिपादिकानां ) वेदमूलकत्वमिति पूर्वपक्षे प्राप्ते शिष्टत्रैवर्णिकपरिग्रहरूपस्य स्मृत्यधिकरणोक्तस्य वेदमूलकत्वमुख्यहेतोरभावेन प्रत्युत अप्रमाणत्वेनैव शिष्टैः परिग्रहात् वेदस्य अप्रामाण्यं वदद्भिरेव तत्प्रामाण्यस्य अङ्गीकरणाच्च वेदमूलकत्वासंभवेन अप्रामाण्यं शाक्यादिस्मृतेरिति सिद्धान्त्यते । एवं भाष्यकारमतानुसारेण वर्णकद्वयं, वार्तिककारमतानुसारेण वर्णकद्वयं च प्रतिपादितम् ।

**सूत्रयोजना -** अथ सूत्रयोजना प्रदर्श्यते - अत्राधिकरणे "[1] विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् हेतुदर्शनाच्च"[2] इति द्वे सूत्रे । अनपेक्षमित्यस्य स्थाने अनपेक्ष्यमिति पाठान्तरम् । न विद्यते अपेक्षा मूलभूतप्रमाणे यस्य तदनपेक्षं, श्रुतिरित्यर्थः । न विद्यते अपेक्ष्यं मूलत्वेन अपेक्षणीयं यस्येति व्युत्पत्त्या पाठान्तरेऽपि स एवार्थः । [3]"अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्" इति पूर्वसूत्रात् प्रमाणमिति पदं संबध्यते । तथा च श्रुतिस्मृत्योर्विरोधे तु अनपेक्षं= श्रुतिः प्रमाणं स्यात्, असति हि विरोधे अनुमानं स्मृतिमूलश्रुतिकल्पनं प्रवर्तते । एवञ्च श्रुतिमूलकत्वाभावात् सर्ववेष्टनादिस्मृतिरप्रमाणमिति भावः । वेष्टनादौ लोभादिमूलस्यापि संभवादपि न तादृशस्मृतेः श्रुतिमूलकत्वमिति द्वितीयसूत्रार्थः । इयं योजना भाष्यकारीयप्रथमवर्णकस्य । भाष्यकारीयद्वितीयवर्णके प्रथमसूत्रमेव प्रत्यक्षश्रुतिविरुद्धस्मृतीनामप्रामाण्यं बोधयति । द्वितीयसूत्रं प्रत्यक्षश्रुतिविरोधाभावेऽपि लोभादिहेतुदर्शनमात्रेण " वैसर्जनहोमीयं वासोऽध्वर्युः परिगृह्णाति" इत्यादिस्मृतीनामप्रामाण्यं प्रतिपादयति।

---

[1] पूर्वमीमांसासूत्रम् - १/३/३

[2] पूर्वमीमांसासूत्रम् - १/३/४

[3] पूर्वमीमांसासूत्रम् - १/३/२


ISSN: 2320-740X

वार्तिककारमतेऽपि प्रथमवर्णके विरोधे त्वनपेक्षं स्यादित्यस्य सूत्रांशस्य पूर्ववदेव व्याख्यानम् । तत्र अनुषक्तं प्रमाणपदमनुष्ठापकत्वरूपमर्थं बोधयति, एवञ्च प्रत्यक्षश्रुतेरनुष्ठापकत्वरूपप्रामाण्ये उक्ते तद्विरुद्धस्मृतेरननुष्ठापकत्वरूपमप्रामाण्यमर्थतः सिद्ध्यति । अनुषक्तं प्रमाणपदं लक्षणया प्रमाणकार्यकारीत्यर्थं बोधयति। अनुष्ठापनं हि प्रमाणकार्यं, तथा च प्रमाणमित्यस्य अनुष्ठापकमित्यर्थो लभ्यते । असति ह्यनुमानमिति सूत्रांशस्यायमर्थः – असति हि प्रत्यक्षश्रुतिविरोधे अनु= पश्चात् मानं, स्मृतिरिति यावत् प्रमाणम्= अनुष्ठापकं स्यादिति । हेतुदर्शनाच्चेति सूत्रस्य न्यायाभासादिहेतूनामपि स्मृतिषु दर्शनादित्यर्थः । वार्तिककारीयद्वितीयवर्णके शाक्यादिस्मृतीनामप्रामाण्यप्रतिपादनपरे प्रथमसूत्रस्य "विरोधे= शिष्टत्रैवर्णिकैः धर्मप्रमाणत्वेनानङ्गीकारे तु (स्मृतिः) (शाक्यादिस्मृतिः) अनपेक्षं= न विद्यते अपेक्षा यस्मिन् धर्मं जिज्ञासमानानां= धर्मे अप्रमाणं स्यात्, असति हि विरोधे= शिष्टत्रैवर्णिकविरोधे अनुमानं= मूलश्रुतिकल्पनं स्यात्" इति व्याख्या कार्या । द्वितीयसूत्रं लोभयशोमोहादिहेतूनां शाक्यादिस्मृतिषु दर्शनादिति व्याख्येयम् ।

**परामृष्टा ग्रन्थाः –**


१. भाट्टदीपिका श्रीखण्डदेवरचिता – श्री सद्गुरु पब्लिकेशन्स, देहली -१९८७

२. अध्वरमीमांसाकुतूहलवृत्तिः श्री वासुदेवदीक्षितरचिता, श्री लालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम् , नवदेहली

३. जैमिनीयन्यायमालाविस्तरः श्री सायणाचार्यविरचितः, चौखम्बा प्रकाशनम्, वाराणसी, विक्रमसंवत्सरः

४. सिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिता

५ . मीमांसाकौस्तुभः श्रीखण्डदेवविरचितः , चौखम्बा संस्कृतसिरीज आफीस

६ . पूर्वमीमांसादर्शनम् – सतन्त्रवार्तिकशाबरभाष्यसमेतम् , आनन्दाश्रमः, पुणे ।


**********

# शान्तेः स्रोतांसि

**डा. नारायण वैद्य**
सहायकाचार्यः, शिक्षाविभागः

**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।**
**न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥**[1]

मनसः नियमनम् आवश्यकम् । मनसः नियमनस्य अभावे बुद्धिः अव्यवस्थिता भवति । यदि बुद्धिः अव्यवस्थिता भवति तर्हि आत्मज्ञानाभिनिवेशः भवितुं न शक्यते । तन्नाम भावाना अपि न भवति इत्यभिप्रायः । भावनायाः अभावे शान्तिः न लभ्यते । अत एव उक्तम्

**शान्तिमिच्छन्नदीनात्मा संयमेदिन्द्रियाणि च ।**

शान्तेः निमित्तं सर्वादौ इन्द्रियाणां निग्रहः कर्तव्यः । इन्द्रियाणां निग्रहः अभ्यासेन कर्तुं शक्यते । केचन शान्तिः कुत्र लभ्यते ? इति पृच्छन्ति । शान्तिः आपणेषु विक्रयणार्थं न स्थापिता अस्ति । शान्तिः अस्मासु एव अन्तर्निहिता वर्तते । अतः शान्तिः अनायसेन प्राप्तुं शक्यते । तस्मात् यत्र अस्मभ्यं शान्तिः प्राप्यते तत् स्थानं स्रोतः इत्युच्यते । शान्तेः त्रीणी स्रोतांसि सन्ति । यथा –




**आन्तरिकी शान्तिः**

शान्तेः अन्वेषणम् अस्माभिः अन्यत्र न कर्तव्यं भवति । यतः शान्तिः अस्माकं अन्तः एव वर्तते । यदा मानवः दुःखान्मुक्तः भवति, निराशां न अनुभवति, क्रोधं न प्रकटयति तदा आन्तरिकीं शान्तिम् अनुभवति । अतः

---

1 . भगवद्गीता - 2.66


ISSN: 2320-740X

वक्तुं शक्यते शान्ति: अनुभवयोग्या भवति इति । आन्तरिकभावना: उत विचारा: शान्तिं प्रति प्रेरयति । यथा – उत्तमं स्वास्थ्यम्, आन्तरिक: निर्द्वन्द्व:, सन्तोष:, आन्तरिकी दृष्टि:, आध्यात्मिकी बुद्धि:, दया, सहानुभूति: इत्यादय: ।

एवमेव आन्तरिकशान्त्या आत्मन: विश्वास: वर्धते । नकारात्मका: विचारा: न उत्पद्यन्ते । कठिनपरिस्थितिषु जीवननिर्वहणसामर्थ्यं वर्धयति । एवं रूपेण मानव: सदृढ: भवति । आन्तरिकशान्ते: निमित्तं वास्तविकं तत्त्वं स्वीकर्तव्यम् । स्नेह: सर्वत्र करणीय: । वसुधैव कुटुम्बकम् इति भावना स्यात् । उद्वेग: न कर्तव्य:। व्यासमहर्षे: वाणी परिपालनीया । उक्तं महर्षिणा –

**परोपकार: पुण्याय पापाय परपीडनम् ।**

अपि च

**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।**[1]

**सामाजिकी शान्ति:**

वैयक्तिगत: सामाजिक: चेति धर्म: द्विविध: भवति । तत्र वैयक्तिगत: धर्म: स्वस्य परिवारेण सम्बद्ध: अस्ति । एष: धर्म: सर्वै: अपि पाल्यते । एवमेव सामाजिकधर्म: अपि मानवै: अनुष्ठेय: अस्ति । यत: गृहं समाजस्य लघुभूतं अङ्गं भवति । सर्वं गृहे एव लब्धुं न शक्यते । अस्माकं बह्व्य: आवश्यकता: समाजेन एव प्राप्तुं शक्यन्ते । अत: यथा वयं वैयक्तिगतं धर्मं पालयाम: तथैव सामाजिकधर्मम् अपि पालयाम: । यथा वैयक्तिगतधर्मस्य अनुष्ठानेन आन्तरिकी शान्ति: प्राप्यते तथा एव सामाजिकधर्मस्य पालनेन सामाजिकी शान्ति: लभ्यते ।

साम्प्रतं विभक्त: परिवार: आधिक्येन दृश्यते । विभक्तपरिवारे अत्यल्पा: सदस्या: भवन्ति । अत: आदौ लघुपरिवारस्य शान्तिम् इच्छति व्यक्ति: । एवं सङ्कुचितार्थे चिन्तनेन समाज: सुखं सन्तोषं वा न प्राप्नोति । अपि तु समाजे अशान्ति: उत्पद्यते । अत: समाजस्य सन्तोषार्थं समाजे शान्तिं च संरक्षणं कर्तुं प्रवृत्ति: भवेत् । आदौ जन: मिलित्वा जीवनं कर्तुं प्रयत्नं कुर्यात् । अस्मिन् एव विषये बौद्धधर्मस्य उपदेश: अपि अस्ति– **बुद्धं शरणं गच्छामि** इति । एष: उपदेश: अस्माभि: सामाजिकशान्तिम् उपलक्ष्य व्यापकदृष्ट्या स्वीकर्तव्य: भवति । यदि मानव: पार्थक्येन एक: एव जीवति तर्हि तस्य सर्वाङ्गीण: विकास: न भवति । सर्वाङ्गीणविकासाय परोपकार:, सद्भावना, सहानुभूति:, दया इत्यादि सामाजिकगुणान् आश्रित्य मानवेन जीवनीयम् ।

[1] पञ्चतन्त्रम् - 3.104

समाजे विविधा: भाषा:, विविधा: धर्मा:, विविधा: जातय:, विविधा: संस्कृतय: सन्ति । एवं विद्यमानेऽपि स्वस्य धर्म:, जाति: इत्यादिकम् विस्मृत्य मिलित्वा जीवनं निर्वहणीयम् । विविधतायाम् एकताया: भावनया जीवनीयम् । अपिच मानवाधिकाराणाम् अपि पालनं कर्तव्यम् । अस्माकं सर्वेषाम् एक: एव परिवार: इति भावनया जीवनीयम् । उक्तम् –

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

**प्रकृतिसंरक्षणाय शान्ति:**

मानवप्रकृत्यो: अविनाभाव: सम्बन्ध: अस्ति । प्रकृतिं विना मानव: जीवितुं न शक्नोति । मानवानां संरक्षणे प्रकृते: महत्त्वपूर्णं योगदानं वर्तते । अस्माकं संस्कृते: अनुसारं पृथिवी समेषां माता अस्ति । तदुक्तम् –

**माता भूमि: पुत्रोऽहं पृथिव्या:**[1]

पृथिवी मम माता अस्ति । अहं पृथिव्या: पुत्र: अस्मि । अत: वक्तुं शक्यते पृथिवी अस्माकं जीवनस्य आधार: अस्ति इति । पृथिवी एव अस्मान् रक्षति । अत एव वेद: उपदिशति – **उप सर्प मातरं भूमिम्** [2] इति । मातृभू: मातु: स्थानं निर्वहति । अत: प्रकृते: संरक्षणाय शान्ते: आशय: भवति पृथिव्या: सम्माननं करोतु इति । अत: प्रकृते: पालनं पोषणं च अस्माकं दायित्वं भवति । पर्यावरणस्य शोषणं कदापि न कर्तव्यम् । प्राकृतिकसंसाधनानां नाश: अपि न कर्तव्य: । प्राकृतिकसंसाधनानां नाशेन प्रकृति: क्रुध्यति । प्रकृते: विकोपे सति भूकम्पनम्, भूस्खलम् इत्यादिकं सम्भवति । प्रकृतौ अशान्ति: उत्पद्यते । प्राकृतिकी अशान्ति: मानवस्य कल्याणाय न भवति । सर्वत्र अपि अशान्ति: जायते । अत: प्रकृते: संरक्षणम् अवश्यं कर्तव्यम् ।

शान्तिप्रिय: मानव: शान्तिम् अन्विषति । वस्तुत: विचार्यमाणे शान्ते: अन्वेषणस्य आवश्यकता एव नास्ति । यत: शान्ति: अस्माकं परित: विद्यमानेषु वस्तुषु एव वर्तते । तेन एव शान्ति: लभ्यते । अन्यत्र अन्वेषणं व्यर्थं भवति । अज्ञानकारणेन अन्यत्र अन्वेषणं कुर्म: । शान्ति: अस्माकं अन्त: एव अस्ति । अत एव उक्तम् –

**यत्किञ्चित् वस्तु सम्प्राप्य स्वल्पं च यदि वा बहु ।**
**या तुष्टि: जायते चित्ते सा शान्ति: कथ्यते बुधै: ॥ इति ।**

---

[1] अथर्ववेद: - 12.1.12

[2] ऋग्वेद: - 10.18.10


ISSN: 2320-740X

आपाततः विचार्यमाणे आत्मनः तृप्तिः एव शान्तिः । यत् किमपि वस्तु सम्प्राप्य प्राप्तवस्तुनः परिमाणविषये आधिक्येन चिन्तनं न कर्तव्यम् । यदि आधिक्येन चिन्तनं करोति अशान्तिः उत्पद्यते । अतः आनन्देन स्वीकर्तव्यम् । एवं स्वीकारः एव शान्तिः इति सज्जनाः वदन्ति ।

**सन्दर्भग्रन्थाः**


1. शान्तिशिक्षा एवं सतत विकास – श्रीमती राजकुमारी शर्मा, राधा प्रकाशन मन्दिर, आगरा
2. मूल्य एवं शान्ति शिक्षा – सौरभ सिंह, अग्रवाल पब्लिकेशन्स, आगरा
3. शान्ति के लिए शिक्षा – डा. शिवपाल सिंह, आर. लाल. बुक डिपो, मेरठ
4. मूल्य एवं शान्ति शिक्षा – डा. रवीन्द्र कुमार, अग्रवाल पब्लिकेशन्स, आगरा
5. शान्ति शिक्षा – डा. शोभा गोलवलकर, राधा प्रकाशन मन्दिर, आगरा


**********

# शैक्षिकरूपेण दुर्बलबालकाः

**डा. अरविन्दकुमारसोमदत्तः**
सहायकाचार्यः, शिक्षाविभागः

**परिचयः**

मनोविज्ञानानुसारेण छात्राः विभिन्नाः वर्तन्ते । केचन मन्दबुद्धयः केचन प्रतिभाशालिनः केचन शैक्षिकरूपेण दुर्बलबालकाः । दुर्बलबालकाः इत्युक्ते छात्राः निश्चित समयानुसारेण निश्चितज्ञानसम्पादने असफलाः भवन्ति । येन असफलाः ते सामान्यबालकानां अपेक्षया दुर्बलाः भवन्ति । अतः दुर्बलबालकाः इति नाम्ना व्यवह्रियन्ते । दुर्बलबालकानां शैक्षिकविकासः न्यूनः भवति । मन्दगतिद्वार शिक्षाक्षेत्रे दुर्बलाः, पूर्णतया असफलतां प्रप्नुवन्ति । दुर्बलबालकानां बुद्धिलब्धेः अभिज्ञानार्थं प्रयोगः कर्तुं न शक्यते । किन्तु निष्पत्तिः आधारेण शैक्षिकलब्धिः ज्ञातुं शक्यते ।

**दुर्बल बालकानां परिभाषा**

**बार्टन् हर्ट्** – अनुसारेण ये शैक्षिकारूपेण दुर्बलाः भवन्ति तेषां शैक्षिकोपलब्धिः तेषां स्तरापेक्षया निम्नः भवति । तथापि शनैः योग्यतां सम्पादयन्ति ।

**सिरिल् बर्ट्** – अनुसारेण विद्यालये, जीवने आयुस्तरापेक्षया एकान्यूनकक्ष्यायां उपविश्य कार्यकरणे समर्थाः भवन्ति ।

**टिके ए मेनन्** – अनुसारेण भारते शैक्षिकदुर्बलाः इतुक्ते तेषां कक्ष्यायाः अपेक्षया आयुः अधिकः भवति ।

**सिरिल् बट्** – अनुसारेण शैक्षिकदुर्बलबालकानां बुद्धिलब्धिः ८५ तः न्यूनः भवति ।

**शैक्षिकदुर्बलबालकानां विशेषता -**

१) दुर्बलबालकानां अधिगमस्यगतिः मन्दतया भवति । तुलनायां सामान्यबालकानां गतिः तीव्रतया भवति । दुर्बलबालकानां सामान्यबालकैः सह मेलनं चेत् असफलतां प्रप्नुवन्ति । दुर्बलबालकानां कस्यापि कार्यसम्पादने अधिकारं ददति चेत् तत् असमीचीनानुभवः भवति ।

२) शैक्षिक दुर्बलबालकाः एकस्यां कक्ष्यायां वर्षद्वयं वा वर्षत्रयं वा उपविशन्ति । तेषां वयः अपेक्षया बालकानां तुलनायां एते शैक्षिकक्षेत्रे अधिकतया दुर्बलाः भवन्ति ।


ISSN: 2320-740X

**दुर्बलबालका: प्रकारा: -**

**सामान्यशैक्षिकदुर्बला:** - सामान्यशैक्षिक दुर्बला: सर्वत्र भवन्ति । कक्षायां सामान्यबालकानां अपेक्षया गति: किञ्चित् मन्दमेव भवति । एते पाठ्यक्रमान्तर्गत क्रियाकलापानां किमपि सफलतां न प्राप्नुवन्ति । भागमपि न स्वीकुर्वन्ति ।

**विशिष्टशैक्षिकदुर्बला:** - बालका: एकस्य विशेषपक्षे दुर्बलतां प्रदर्शयन्ति । विशेषविषये किमपि कारणेन सामान्यबालकानां अपेक्षया दुर्बला: भवन्ति ।

**शैक्षिकदुर्बलबालकानां अभिज्ञानम् परीक्षणं च -**

१) समूहिक परीक्षणम् ।
२) उपलब्धिपरीक्षणम् ।
३) व्यक्तिगत बुद्धिपरीक्षणम् ।

**समूहिक परीक्षणम्** – सामूहिक परीक्षणं नाम बुद्धिपरीक्षा, अभिरुचिपरीक्षा, रुचिपरीक्षा, व्यक्तित्वपरीक्षादि सम्मिलिताः सन्ति । आभिः परीक्षाभिः सह बालकस्य दुर्बलत्वं प्रतिभाशालित्वञ्च ज्ञातुं प्रभवति ।

**उपलब्धिपरीक्षणम्** - उपलब्धिपरीक्षणम् नाम परीक्षायाः अङ्काः प्राप्ताः । तदाधारेण दुर्बलस्य ज्ञानं कियद् वर्तते इति ज्ञातुं प्रभवति । तन्निमित्तं दुर्बलेभ्यः अध्यापकेन सावधानतया प्रयोगः करणीयः ।

**व्यक्तिगत बुद्धिपरीक्षणम्** - व्यक्तिगत बुद्धिपरीक्षया बुद्धिलब्धिः ज्ञातुं प्रभवति । तदाधारेण व्यक्तिगतबुद्धिः का भवती तदर्थं किं कुर्याम् इति अभिज्ञायते अध्यापकः ।

**********

# विप्राणां भक्ष्याभक्ष्यविचारः

**डा. दयानिधि शर्मा**
सहायकाचार्यः, शिक्षाविभागः

धर्माचाररताः मानवाः भूमौ सुखमाप्नुवन्ति । धर्माचारविहीनानां तु कुत्रापि गतिर्नास्ति । तत्रापि विप्रः सर्वेषु वर्णेषु श्रेष्ठतां भजते इति धिया सः विप्रः सर्वादौ धर्माचारं परिपालयेत । नित्यं स्वधर्मं परिपालयन् विप्रः समाजे श्लाघनीयो भवति । ये धर्मं (कर्तव्यम्) नैव परिपालयन्ति तेषां कीदृशी गतिः? इत्यस्मिन् विषये महर्षिणा मनुना स्पष्टरीत्या प्रोक्तम्–

**स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः ।**
**श्रूयतां येन दोषेण मृत्युर्विप्राञ्जिघांसति[1] ॥** (मनुस्मृति : ५/३)

धर्मेण हीनः विप्रः श्रेष्ठतां नैव याति । कदाचित् स पथभ्रष्टो अपि भवितुमर्हति । कान् विप्रान् मृत्युः जिघांसति इत्यस्मिन् सन्दर्भे महर्षिः मनुः भणति –

**अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।**
**आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ॥** (मनुस्मृति : ५/४)

उपर्युक्तानां परिपालनं निष्ठापूर्वकं करणीयम् । स्नातकाः सर्वदा संस्कारमयाः भूत्वा आचारं परिपालयेयुः । आचारस्य परिपालनेन बुद्धिरपि शुद्धतामाप्नोति । तत्फलेन सदाचारशीलता विवेकपूर्वकमनुसरणीया । विप्राणां कृते एते विशिष्टाः धर्माः वर्तन्ते ।

अन्नदोषविषये मनुना सत्यमेवोक्तम्-

**लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च ।**
**अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च[2] ॥** (मनुस्मृति : ५/५)

बुद्धौ अन्नस्य प्रभावाः सदा भवन्ति एव । सुविचिन्त्य भोज्यपदार्थानां चयनं करणीयम् । येन सात्विक-भावानां वृद्धिर्भवति तादृशमेव अन्नं भोक्तव्यम् । यतो हि सत्वगुणसम्पन्नः मानवः पृथिव्यां श्रेष्ठत्वमाप्नोति ।

---

[1] वेदों का अभ्यास नहीं करने से , आचार (आचरण) के त्याग से आलस्य से और अन्न (भोज्य पदार्थ) के दोष से मृत्यु ब्राह्मणों को मारने की इच्छा करती है

[2] १.अन्न दोष के संबन्ध मे महर्षि मनु कहते हैं कि लहसुन, सलगम (या लाल मूली, कोई गृञ्जन का गाजर भी अर्थ करते हैं) प्याज, छत्राक (कंद विशेष) और अपवित्र स्थान (श्मशानादि) में उत्पन्न शाक आदि द्विजातियों के अभक्ष्य हैं । )


ISSN: 2320-740X

इतोऽपि मनुः वदति –

**लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा ।**

**शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ॥** (मनुस्मृति : ५/६)

**वृथाकृसरसंयावं पायसापूपमेव च ।**

**अनुपाकृतमांसानि देवान्नानि हवींषि च[1] ॥** (मनुस्मृति : ५/७)

पशूनां दुग्धविषये अपि मनुः महर्षिः बहुसावधानेन सङ्केतयति । कस्य पशोः दुग्धं कदा पातव्यं तेन का हानिर्भवति? इति सर्वं सुस्पष्टं निगदति ।

**अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ।**

**आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः[2] ॥**( मनुस्मृति : ५/८)

(क्षीराणि यान्यभक्षाणि तद्विकारशने बुधः ।

सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः॥ )

प्रायशः बहूनां पशूनां पक्षिणां च मांसमपि विप्रः विवेकपूर्वकं त्यजेत् । मांसभक्षणेन बुद्धिः कलुषिता कुण्ठिता च सञ्जायते । पुराणेष्वपि मांसभक्षणस्य निषेधः कृतो वर्तते । मांसभक्षकः सर्वदा नरकं व्रजति इति प्रसिद्धिः विद्यते । किं भक्षणीयम् ? अस्मिन् विषये मनुः सूचयति –

**चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः ।**

**यवगोधूमजं सर्वं पयसश्चैव विक्रिया[3] ॥** ( मनुस्मृति : ५/२५)

उक्ताः पदार्थाः भोज्यपदार्थाःसन्ति । एतेषां भक्षणं रुचिपूर्वकं करणीयम् । विप्राणां कृते एते पदार्थाः उत्तमाः भवन्ति । अतः सर्वदा उत्तमां बुद्धिं कामयमानः भक्ष्याभक्ष्यविचारं कृत्वा एव स्वजीवनं यापयेदिति धर्मशास्त्रीयं (सामाजशास्त्रीयमपि) चिन्तनं वर्तते ।

**********

---

[1] (२. ३. बिना देवता के निमित्त अपने लिये तैयार किया गया – तिल सहित भात, हलुआ, मोहन भोग, खीरमालुपूआ, हविश्य व देवनिमित्त निकाला अन्न न खावें । दूसरे श्लोक मे ऊपर लालगोंद और लसौड खाने का निषेध किया गया हैं ।)

[2] ब्याने(प्रसव करने) के दिन से जिसको 10 दिन न बीते हो ऐसी गाय (भैंस ,बकरी आदि भी), ऊंटिनी, एक खुरवाली (घोडी, गधी ) आदि, पशु,भेड, गर्भवती होने की इच्छा करने वाली (उठी हुई- गरभाई हुई ) पशु जिसका बच्चा मर गया हो । इन का दूध न पीयें अर्थात् छोड दें । उनका दही ,खोवा, आदि भी त्याज्य है ।

[3] चिरकाल के यव, गेहूं के पदार्थ व दूध के बने सब पदार्थ विप्रों के खाने योग्य हैं ।

# काव्यविशेषोपादानविवेचनम्

**डा. कोम्पेल्लि विनयकुमारः**

सहायकाचार्यः, साहित्यविभागः

व्यक्तिविवेककृन्महिमभट्टः –

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः** ॥

इति आनन्दवर्धनध्वनिलक्षणे दश दोषान् प्रादर्शयत् ध्वनिं खण्डयित्वा काव्यानुमानं प्रत्यस्थापयच्च । ध्वनिलक्षणे दर्शितानां दशानां दोषाणां सारः आभ्यां कारिकाभ्यामुक्तः यत् -

**अर्थस्य विशिष्टत्वं शब्दः सविशेषणस्तदः पुंस्त्वम् ।**

**द्विवचनवाशब्दौ च व्यक्तिर्ध्वनिनाम काव्यवैशिष्ट्यम् ॥**

**वचनं च कथनकर्तुः कथिता ध्वनलक्ष्मणीति दश दोषाः ।**

**ये त्वन्ये तद्भेदप्रभेदलक्षणगता न ते गणिताः** ॥ इति।

अर्थात्

1. 'अर्थः' इति पदस्य उपसर्जनीकृतात्मत्वम् इति विशेषणं न सङ्गच्छते ।
2. 'शब्दः' इति पदस्य प्रयोगः नापेक्षते ।
3. 'शब्दः' इति पदस्य उपसर्जनीकृतात्मत्वम् इति विशेषणम् अनुपादेयम् एव ।
4. 'तमर्थम्' इत्यत्र तच्छब्दस्य पुंलिङ्गः भवितुं नार्हति ।
5. 'व्यङ्क्तः' इत्यत्र द्विवचनम् अनुपपन्नम् ।
6. 'वा शब्दः' विकल्पार्थकः अतः तत्प्रयोगः दुष्टः ।
7. 'व्यक्तिः' इति शब्दस्य आनन्दवर्धनमतानुसारम् अर्थः उच्यते चेत् अव्याप्त्यतिव्याप्त्यसम्भवदोषत्रयं सम्भवति ।
8. 'ध्वनिः' इति काव्यस्य नाम व्यर्थम् (प्रयोजनशून्यम्) ।
9. 'काव्यविशेषः' इति पदम् अनुपादेयमेव ।
10. 'सूरिभिः' इति पदस्य अनावश्यकता ।

इत्येतेषु दशसु दोषेषु 'काव्यविशेषः' इति पदस्य दोषनिरूपणं क्रियतेऽत्र । "**काव्यविशेषः स ध्वनिरिति**



ISSN: 2320-740X

**सूरिभिः कथितः**" इत्यत्र ध्वनिः काव्यस्य वैशिष्ट्यम् इति उक्तम् । किन्तु काव्यस्य विशिष्टत्वम् अनुपपन्नम् । अर्थात् ध्वनियुक्तं काव्यं विशिष्टं न भवति । यतः सर्वाण्यपि काव्यानि ध्वनिकाव्यानि इत्येव अभिमतत्वात्, तस्य काव्यस्य आत्मा रसः इति रीत्या काव्यस्य रसात्मकत्वस्य अङ्गीकृतत्वात् । आनन्दवर्धन एव आह यत् –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वागतः** ॥ इति ।

काव्यस्यात्मा (रसः) रसादिरूपः एव अर्थः । पुरा रामायणकाले आदिकवेः वाल्मीकेः क्रौञ्चद्वन्द्वयोः वियोगेन उद्भूतः शोकः एव श्लोकरूपेण बहिरागतः । तस्य रसस्य विशेषः न सम्भवति, यतः तस्य रसस्य निरतिशयालौकिकसुखास्वादः एव रसस्य लक्षणम् इति हेतोः ।
'काव्यविशेषः सः' इत्यत्र 'विशेष' शब्दः प्रभेदपर्यायः उत अतिशयपर्यायः वा इति प्रश्नः ।

**1. प्रभेदपर्यायः-** 'ध्वनिकाव्य'रूपकाव्यप्रभेदपर्यायः । काव्यप्रभेदेषु उत्तममध्यमाधमप्रभेदेषु मध्यमाधमकाव्याभ्यां सम्पूर्णतया भिन्नमेव ध्वनिकाव्यम्, यत्र ध्वनिरेव सर्वप्राधान्येन भवति, अन्यकाव्यप्रभेदेषु ध्वनेः एतादृशी सर्वोच्चस्थिर्नास्ति इति प्रभेदपर्यायार्थः । किन्तु 'विशेष'शब्दस्य प्रभेदपर्यायार्थस्वीकारे 'काव्यमात्रस्य ध्वनिव्यपदेशेन इष्टत्वात्' इत्यनेन व्यक्तिविवेककारेण महिमभट्टेन अन्यप्रभेदेषु अव्याप्तिर्दर्शिता । काव्यमात्रं गुणीभूतव्यङ्ग्यकाव्याद्यपि । यदि सर्वाण्यपि काव्यानि ध्वनिकाव्यानि एव अभिमतानि, तर्हि मध्यमाधमकाव्येषु 'विशेष'शब्दः न गच्छति इति अव्याप्तिः । एतत्समर्थनाय तेन महिमभट्टेन आनन्दवर्धनस्यैव अभिप्रायः उपन्यस्तः यत् - "काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा । क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वागतः" इत्यादिना । 'काव्यं रसात्कमकम्' इत्यङ्गीकृतं सर्वैः, न तु 'ध्वनिकाव्यं रसात्मकम्' इत्युक्तम् । रसरूपार्थः एव काव्यात्मा, सर्वकाव्यसाधारणश्च । अतः 'विशेष'शब्दस्य ध्वनिकाव्यरूपप्रभेदपरत्वेन स्वीकारे अन्यकाव्यप्रकारेषु अव्याप्तिः ।

2. **अतिशयपर्यायः** – गुणालङ्कारवक्रोक्त्यादिकाव्यतत्त्वानि सर्वाण्यप्यतिक्रम्य तिष्ठति ध्वनिः, तैः अन्यकाव्यतत्त्वैः ध्वनेः समीपेऽपि आगन्तुं न शक्यमिति अतिशयपर्यायार्थः । किन्तु "न च तस्य विशेषः सम्भवति, निरतिशयसुखास्वादलक्षणत्वात् तस्य" इत्यनेन महिमभट्टः 'विशेष'शब्दस्य असम्भवदोषं दर्शितवान् । निरतिशयसुखास्वाद एव सर्वेषामपि काव्यानां सामान्यलक्षणम् । तत्तु गुणीभूतव्यङ्ग्यचित्रकाव्यादिष्वपि अस्तीति तेभ्यः काव्येभ्यः ध्वनिकाव्यस्य कोऽप्यतिशयः नास्तीति असम्भवदोषः । काव्यस्य वैशिष्ट्यं स्वरूपकृतं रसकृतं च इति द्वौ पक्षौ ।

सर्वस्यापि काव्यस्य रसयुक्तत्वलक्षणत्वात् तस्य स्वरूपमेव रसः इति निश्चयाच्च तत्र स्वरूपे कोऽपि

विशेषः कल्पयितुं न शक्यते इति स्वरूपकृतवैशिष्ट्यं न सम्भवति काव्यस्य । रसकृतवैशिष्ट्ये तु इति पञ्च पक्षाः सम्भवन्ति –

अ) चमत्कारातिशयकृतपक्षः - अनयैव (स्वरूपकृतवैशिष्ट्यनिराकरणार्थम् उपयुक्त्यैव) युक्त्या प्रथमः चमत्कारातिशयरूपविशेषपक्षः निराक्रियते ।

आ) भेदान्तरकृतपक्षः - रसस्य शृङ्गारकरुणादिभेदैः काव्ये यदि वैशिष्ट्यमुच्यते तर्हि कैः रसैः वैशिष्ट्यं भवति, कैश्च रसैः न भवति, सर्वैर्वा रसैः वैशिष्ट्यं भवति किमित्यादिप्रश्नाः उद्भवन्ति । एतेषु विकल्पेषु एकस्मिन् विकल्पे अङ्गीकृते अन्यविकल्पैः वैशिष्ट्यं न भवति इति वक्तव्यं भवति । भेदान्तरवतः काव्यस्य ध्वनित्वाभावप्रसङ्गात् अव्याप्तिर्भवति । सर्वेषु अङ्गीकृतेषु वैशिष्ट्यमिति पदं प्रयोक्तुं न शक्यते, अतः भेदान्तरकृतवैशिष्ट्यस्य निरासः ।

इ) रसरहितसुन्दरशब्दार्थापेक्षाकृतपक्षः - रसरहितसुन्दरशब्दार्थयोः आधारेण काव्य-वैशिष्ट्याङ्गीकारे रसरहित सुन्दरशब्दार्थयोः काव्यत्वानङ्गीकारात् न समन्वयः । काव्यत्वस्यैवाभावे वैशिष्ट्यकल्पना कथम् ?

ई) वस्तुमात्रादिव्यङ्ग्यरूपकृतपक्षः - वस्तुमात्रादीनां वैशिष्ट्यं व्यञ्जकत्व- अव्यञ्जकत्वेनैव, न तु व्यङ्ग्यत्वेन । यदि व्यञ्जकवैशिष्ट्येन व्यङ्ग्यवैशिष्ट्यमिति उच्यते, तर्हि यत्र केवलं रसः एव भवति, ध्वनित्वं न भवति तत्र अव्याप्तिः । यत्र च वस्तुमात्रं भवति, रसः न भवति (प्रहिलिकादौ) तत्र अतिव्याप्तिः ।

उ) अङ्गीभावकृतपक्षः - (प्राधान्याधारेण कृतः) इति पक्षोऽपि न साधुः । यतः रसः कदापि अङ्गं न भवति, स्वात्मविश्रान्तत्वात्तस्य । अतस्तत्र विशेषता कदापि न भवितुमर्हति ।

एवंरीत्या रसस्य वैशिष्ट्यं स्वरूपकृतमपि न सम्भवति, रसकृतमपि न इति विशेषपदं ध्वनिलक्षणे न वक्तव्यम् । किञ्च -

**न चोपसर्जनत्वेन तयोर्युक्तं विशेषणम् ।**
**यतः काव्ये गुणीभूतव्यङ्ग्येऽपीष्टैव चारुता ॥**

यत्र शब्दार्थयोः उपसर्जनीकरणेन काव्यविशेषरूपम् अर्थान्तरमवगम्यते, तत्रैव सौन्दर्यमस्तीति नास्ति । यत्र अर्थान्तर एव उपसर्जनीकृतः वाच्यश्च प्रधानभूतः तादृशे गुणीभूतव्यङ्ग्यकाव्येऽपि सौन्दर्यमस्त्येव । अतः शब्दार्थयोः उपसर्जनत्वेन एव काव्ये चारुत्वं भवतीति कथमुच्यते ध्वनिवादिना आनन्दवर्धनेन ?

**अत एव विशेषस्योपादानमपि नार्थवत् ।**
**सञ्ज्ञासम्बन्धमात्रैकफलं तदिति गम्यते ॥**


ISSN: 2320-740X

गुणीभूतव्यङ्ग्ये चारुत्वं वाच्यस्य, न तु अप्रधानस्य व्यङ्ग्यस्य इति हेतोः ध्वनिलक्षणे विशेषपदमपि नोपादेयम्, प्रयोजनाभावात् । केवलं ध्वनवादिना आनन्दवर्धनेन प्रतिपिपादयिषितायाः ध्वनिरूपसञ्ज्ञायाः सम्बन्धः एव तस्य पदस्य फलम् । अर्थाद्विशेषो नाम अस्मिन् काव्ये ध्वनिरेव, नालङ्कारादयः इति सूचनं विशेषशब्दस्य प्रयोजनं, तावदेव ।

**तदा चातिप्रसङ्गः स्यात् सञ्ज्ञायां यस्य कस्यचित् ।**
**यद्वाक्यवर्तिनोऽन्यस्य विशेषस्य तदाप्तितः** ॥

एवं ध्वनिरेव 'काव्यविशेषः' इत्युक्तत्वात् यत्र यत्र वाक्येषु ये ये विशेषाः भवन्ति, तेषु सर्वेष्वपि ध्वनिः अतिव्याप्तो भवति । तेषां सर्वेषामपि ध्वनिनाम्नैव व्यवहारः करणीयो भवति । उदाहरणार्थम् – प्रहेलिकायाम् उत्तररूपेण यद्भवति तत्तु वाच्यं न भवति । यथा –

**वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः ।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च बिभ्रन्न घटो न मेघः ॥**

इत्यत्र **'नारिकेलफलम्'** ध्वन्यते, न तूच्यते । एष एव विशेषोऽत्र । स विशेषोऽपि ध्वनिरित्येव वक्तव्यं भवति । किन्तु प्रहेलिकादयः काव्यपङ्क्तौ एव न गणिताः, ध्वनिसंज्ञा नान्वेतीति वक्तव्यं किम् ? अतः ध्वनिरेव 'काव्यविशेषः' इति न वक्तव्यम् ।

1. ध्वनिः काव्यसामान्यः एव, न तु काव्यविशेषः । काव्यस्य रसात्मकत्वात्, नीरसस्य काव्यत्वाभावात्, ध्वनिव्यपदेशस्य रसात्मकत्वप्रयुक्तत्वात् सर्वस्यापि काव्यस्य ध्वनिव्यपदेशः एव अभिमतः ।

2. रसानां वैशिष्ट्ये तदात्मनः काव्यस्य विशिष्टत्वमित्यपि वक्तुं न शक्यम् । निर्दिष्टरसात्मनः एव ध्वनिकाव्यत्वाभिधानत्वापत्तेः अव्याप्तिः । शृङ्गाररसे सम्भोग-विप्रलम्भरूपेण विशेषः, वीररसे धर्मवीर-युद्धवीरादिः इत्यादिः । तदा अन्यरसात्मनः काव्यस्य ध्वनिव्यपदेशः न भवति । किन्तु काव्यस्य नवरसरुचिरत्वं निर्बाधम् । सर्वरसानामपि तत्र आवश्यकत्वात् न रसे वैशिष्ट्यम्, तेन काव्येऽपि वैशिष्ट्याभावः ।

3. वस्तुमात्रादीनां विभावादिरूपतया तेषां रसाभिव्यक्तिहेतुत्वोपगमात् तेषामाधारेणापि काव्यविशेषव्यपदेशो न शक्यते ।

4. व्यञ्जकानां वैचित्र्यादपि व्यङ्ग्यस्य विशेषः अङ्गीकर्तुं न शक्यः, गोः नानावर्णरूपव्यञ्जकैः गोत्वे कोऽपि विशेषः यथा न सम्भवति, तथैव व्यञ्जकैः काव्ये कोऽपि विशेषो न भवति । विभावादिभिः व्यञ्जकैः विशेषो यदि अङ्गीक्रियते तर्हि विभावादिरूपानां वस्तुमात्रादीनां व्यङ्ग्यत्वात् प्रहेलिका अपि काव्यं स्यात् ।
5. काव्ये रसः अङ्गी, न त्वङ्गम् । अतः अनुमेयार्थः वस्त्वलङ्काररूपः इत्येव वक्तव्यम्, तयोः अङ्गत्वसङ्गतेः । किन्तु तत्र रसः अनुमेयार्थस्य प्रकारत्वेन न कल्पनीयः । आत्मनो रसस्य रस एव प्रकारः कथं भवति?
6. रसात्मकं यदस्ति तत्तु मुख्यवृत्त्यैव काव्यं भवति । 'गौणमुख्ययोर्मुख्ये सम्प्रत्ययः' इति नियमात् मुख्ये सति अमुख्यद्वारा व्यपदेशः न भवति । अतः काव्ये रसस्यैव प्राधान्यात् रसद्वारैव काव्यव्यपदेशः भवेत् । नीरसमपि काव्यत्वेन परिगण्य 'काव्यविशेषः' इति वक्तुं नोचितम् । मेघदूतादिषु काव्यविशेषव्यपदेशः तत्प्रतिपाद्यार्थविशेषसमारोपकृतः, न तु मुख्यः ।

अनुमितिवादिनो महिमभट्टस्य मते सरसकाव्यमेव काव्यम् । 'काव्यस्यात्मा स एवार्थः' इत्यस्यापि स एवाभिप्रायः इति तन्मतम् । तत्तु सम्पूर्णतया मृषात्वेन परिगणयितुं न शक्यते । तथा सति रसयुक्तं काव्यं काव्यसामान्यमेव भवति, न तु विशेषः । सामान्यकाव्ये तदैव विशेषता भवति, यदा विशेषणीभूतरसे विशेषः आधीयते । वर्णैः तदैव पटे विशेषता भवति यदा केचन पटाः रक्ताः, केचन पीताः इत्यादिरीत्या विशेषाः भवन्ति । किन्तु वर्णः यद्येकः एव सर्वस्यापि पटस्य तर्हि कुतो वा विशेषः ? ध्वनिकाव्यापरपर्यायः रसः 'रस'रूपेणैव स्वीकरणीयः, न तु शृङ्गारवीरादिविशेषरूपेण, ध्वनिलक्षणे सामान्यरूपेणैव ध्वनेः निरूपणात् । एतद्रीत्याऽपि विशेषपदस्य अनुपादेयत्वं सिद्ध्यति ।

काव्यं दृश्यं श्रव्यमिति, गद्यम्,पद्यम्,चम्पूरिति रीत्या ये काव्यप्रकाराः उच्यन्ते, तेऽपि काव्य'विशेषाः' भवन्ति। तेषु सर्वेषु अपि सामान्यरूपेण वर्तमानो ध्वनिः कथं विशेषः भवति ?

किञ्च रसः अनेकः । तेषु केषाञ्चन रसानां काश्चन विशेषताः भवन्ति । उदाहरणार्थं शृङ्गररसः रसराजः इति, **'शृङ्गार एव मधुरः परः प्रह्लादनो रसः'** इति च ख्यातः, तस्य भेदौ सम्भोग- विप्रलम्भौ, सम्भोगशृङ्गारापेक्षया अत्यन्तं सूक्ष्मः विप्लम्भशृङ्गारः इति, **'न विना विप्रलम्भेन शृङ्गारो पुष्टिमश्नुते'** इत्यादिरीत्या शृङ्गाररसस्य विशेषताः वक्तुं शक्यन्ते । **'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्'** इत्युक्तं व्यक्तिवादिना आनन्दवर्धनेन । तेन सर्वेऽपि रसाः औचित्येनैव प्रवर्तेरन् । तत्र अनौचित्ये सति रसाभासो भवति, न तु रसः । किन्तु नवरसेषु हास्यरसः अनौचित्यादेव प्रवर्तते इति तस्य रसस्य विशेषता । नवरसेषु शृङ्गार-करुण-वीर-शान्तरसाः एव अङ्गिरसत्वेन अङ्गीकृताः, नान्ये रसाः ।


ISSN: 2320-740X

एवमादिरीत्या रसेषु केषाञ्चन रसानां स्वगतविशेषताः भवन्ति । तदाधारेण काव्येऽपि वैशिष्ट्यं वक्तुं शक्यते इति यदि ध्वनिवादिना आनन्दवर्धनेन उच्यते, तत्तु अनुमितिवादिना महिमभट्टेनापि अङ्गीक्रियते । अभिज्ञानशाकुन्तलं सम्भोगशृङ्गाररसप्रधानं काव्यम्, मेघदूतं विप्रलम्भशृङ्गाररसात्मकमित्यादि काव्येष्वपि विशेषताः भवन्ति । किन्त्वत्र तन्न प्रस्तुतम् । अत्र प्रस्तुतं ध्वनिलक्षणम् । लक्षणं कदापि एकमङ्गमाश्रित्य न भवति, अव्याप्तेः । तत्तु लक्षणं सर्वाङ्गव्यापि भवेत् । अतः रसत्वसामान्ययुक्तं ध्वनिकाव्यमिति वक्तव्यम् । अतः ध्वनिलक्षणे 'काव्यम्' इत्येव वक्तव्यम्, न तु 'काव्यविशेषः' इति ।

'रसात्मकमेव काव्यम्, किन्तु रसमये तस्मिन् वस्त्वाद्यवान्तरव्यङ्ग्यानां समावेशात् काव्ये वैशिष्ट्यमाधीयते' इत्येतत्, 'काव्यविशेषः' इत्यस्य समर्थने ध्वनिवादिनः युक्तिः । सा युक्तिः निराक्रियतेऽनुमितिवादिना महिमभट्टेन एवम् –

वस्त्वादीनाम् अस्तित्वं रसात् पृथक् नैवास्ति । तानि रसस्यैव व्यञ्जकानि विभावादीनि । गोः कपिल-श्वेतादिवैशिष्ट्येन गोत्वे यथा वैशिष्ट्यं नायाति, तथैव वस्त्वलङ्कारादिभी रसे वैशिष्ट्यं तथा नायाति । तथापि यदि तदङ्गीक्रियते तर्हि अव्याप्तिः अतिव्याप्तिश्च दौषौ भवतः । यत्र वस्त्वलङ्कारयोः एकैकस्य उभयोर्वा व्यङ्ग्यत्वं व्यञ्जकत्वं वा नास्ति, शुद्धः रसः एव वर्तते तत्र अव्याप्तिः । प्रहेलिकाप्रायेऽतिव्याप्तिः, यत्र अनेकहेतुकल्पनानन्तरमपि नीरसमेव वस्तु प्रतीयते, न तु रसः । अतः रस- काव्यत्वयोः अन्वयव्यतिरेकेण कार्यकारणभावः । अतः शुद्धकाव्यस्यैव ध्वनिरिति व्यवहारः युक्तः ।

पदानां मुख्य-गौणौ अर्थौ भवतः । मुख्य - गौणयोः मध्ये मुख्यस्यैव ज्ञानं प्रथमं भवति, न तु गौणस्य । 'गामानय' इत्यत्र गोशब्दस्य मुख्यार्थे प्रयोगः, किन्तु 'गौर्वाहीकः' इत्यत्र गौणार्थे । वाहीकस्तत्र मुख्यः । तत्र मुख्यस्य वाहीकस्यैव ज्ञानं प्रथमतया भवति, न तु गोः । मुख्यार्थे सम्भवति सति गौणार्थो न ग्राह्यः । काव्यविषयेऽपि यदि मुख्यवृत्त्या रसात्मनः काव्यस्य नास्ति सम्भवः, तर्हि गौणमाश्रित्य तद्वक्तुं शक्येत, परन्तु तथा नैवास्ति, अर्थात् यत् काव्यं भवति तत्र रसोऽवश्यं भवत्येव, काव्यस्य रसात्मकत्वात्, इति मुख्यवृत्त्या रसात्मकं काव्यं सम्भवतीत्यतः, नीरसस्यापि काव्यपदेन उक्त्वा, रसात्मकं काव्यविशेषः इति वचनं न साधु इत्यभिप्रायः ।

**अनुमितिवादी (महिमभट्टः)** – एतदतिरिच्य काव्यत्वसिद्ध्यर्थम् आश्रयरूपेण उत्कृष्टतमं रसात्मकं वस्तु लभ्यत इत्यतः गौणवस्तुनः आश्रयः न समीचीनः, मुख्यगौणयोः मुख्यस्यैव समादरनियमात् ।

**ध्वनिवादी (आनन्दवर्धनः)**- तर्हि मेघदूतादिकाव्यानि विशिष्टकाव्यानि इति उच्यन्ते खलु ? कस्मिन्नर्थे सः व्यवहारः?

**अनुमितिवादी** – तत्र वर्णितानां पदार्थानामाधारेण तथा व्यवहारः । अचेतनः मेघः चेतनवत् मन्यते । चेतनैः क्रियमाणं दौत्यकार्यं मेघः करोतीति कवेः उच्चकोटिककल्पनं तत्र विशेषः । अतः तत्र विशिष्टत्वं न मुख्यम् (न वास्तवम्), किन्तु औपचारिकमेव ।

एवं काव्यस्य विशिष्टत्वे निरस्ते, अन्यालङ्कारिकैः यदुक्तं तदेवानन्दवर्धनेन 'ध्वनि'रिति नाम एव नूतनम् उक्तम् , न तु तत्त्वम् । यदि ध्वनिः वास्तविक एव भवति चेदपि शब्दतः न वक्तव्यः । यतः काव्यस्य पर्यवसानं तस्मिन्नेव भवतीति काव्यस्य विशिष्टलक्षणकथनेनैव ध्वनिलक्षणमप्युक्तं भवति इति व्यक्तिविवेककारः महिमभट्टः ।

अश्वारूढत्वरूपविशेषलक्षणेनैव बहुषु पुरुषेषु राजा कः इति ज्ञायते । अश्वारूढत्वविशिष्टस्य राज्ञः एव तल्लक्षणं सङ्गच्छते । लक्षणगताश्वारूढत्वरूपवैशिष्ट्यात् पुरुषे 'राजत्व'रूपवैशिष्ट्यं ज्ञायते ।

काव्यमात्रस्य रसमयत्वेन इष्टत्वात् शब्दार्थसहितत्वादिकाव्यमात्रलक्षणादेव विवक्षितविशेषप्रतीतिरिति महिमभट्टस्य आशयः । अतः ध्वनिलक्षणे 'काव्यम्' इत्येव वक्तव्यम्, न तु 'काव्यविशेषः' इति ।

**आनन्दवर्धनमतानुसारं निर्णीतार्थः** - काव्यस्य रसमयत्वमात्रमङ्गीकुर्वतः, वस्त्वलङ्कारध्वनिम्, ध्वनिगुणीभूतव्यङ्ग्यचित्रकाव्यादीनि, रसस्य कदापि अङ्गत्वं च नाङ्गीकुर्वतः महिमभट्टस्य मते काव्यसामान्यलक्षणादेव विवक्षितविशेषस्य प्रतीतिर्भवतीति अङ्गीकर्तुं शक्यते । किन्तु व्यङ्ग्यस्य प्राधान्ये ध्वनिकाव्यम्, तस्य अप्राधान्ये गुणीभूतव्यङ्ग्यम्, सर्वथा तदभावे चित्रमिति काव्यप्रकारान् अङ्गीकुर्वतः व्यक्तिवादिनः आनन्दवर्धनः मते गुणीभूतव्यङ्ग्यादिभिः ध्वनिकाव्यस्य पृथक्करणाय, सर्वेभ्योऽपि काव्यप्रकारेभ्यः ध्वनिकाव्यस्य सर्वोच्चस्थानख्यापनाय च 'विशेष'शब्दस्य प्रयोगः युज्यत एव । अपि च काव्ये रसः अङ्गित्वेनैव इष्टश्चेदपि रसवदलङ्कारादिषु प्रधानम् अन्यद्वाक्यार्थमुद्दिश्य, काव्येष्वपि एकमङ्गीरसमुद्दिश्य अन्यरसानाम् अङ्गत्वं सम्भवतीति सिद्धमेव । आनन्दवर्धनस्तत्र काव्यत्वं न निराकरोति । अत एव वस्तु-अलङ्कारध्वनी अपि तेन अङ्गीकृतौ । यदि सर्वत्र काव्ये रस एव ध्वन्यते तर्हि विशेषः इति वक्तव्यस्य आवश्यकता नास्ति । किन्तु यस्मिन् काव्ये वस्तु ध्वन्यते तत्र वस्तुध्वनेः तस्य काव्यस्य विशेषः, यत्र च अलङ्कारः ध्वन्यते तत्र अलङ्कारध्वनिः, रसध्वनौ तु रसध्वनिरिति तात्पर्येण ध्वनिलक्षणे 'विशेष'शब्दः युज्यते ।

**आधारग्रन्थाः** –

१. व्यक्तिविवेकः		२. ध्वन्यालोकः

३. व्यक्तिविवेकानुशीलनम्		४. व्यक्तिविवेकविमर्शः

**********



ISSN: 2320-740X

# श्राद्धतिथिनिर्णयः

**डा. प्रमोद भट्टः**
सहायकाचार्यः, व्याकरणविभागः

अह्नः पञ्चदश मुहूर्ताः। तत्राष्टमो मुहूर्तः कुतपसंज्ञस्तस्मिञ्श्राद्धारम्भः । कुतपादारभ्य मुहूर्तपञ्चकं श्राद्धकालः । द्वादशो मुहुर्तो रौहिणिसंज्ञः । तं न लङ्घयेत् । तदुक्तं चन्द्रिकायां मात्स्ये -

**सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् ।**
**राक्षसी नाम सा वेला सर्वकर्मसु गर्हिता ॥** इति ।

एवमुक्ते काले श्राद्धतिथेरप्रवृत्तावपि श्राद्धानुष्ठानं कार्यम् ।

**यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।**
**सा तिथिः सकला ज्ञेया पितृकर्मणि सूरिभिः ॥**

इति हेमाद्र्युदाहृतवचनात् । तिथिसमाप्तावप्येवमेव । अथ प्रसङ्गात्तिथिद्वैधे सामान्यतः श्राद्धतिथिनिर्णयः । त्रिपुरुषोद्देश्यकं पार्वणश्राद्धं यस्यां तिथौ विहितं सा चेत् दिनद्वयसम्बन्धिनी तदा या सम्पूर्णापराह्नव्यापिनी सा ग्राह्या । अपराह्नस्तु पञ्चधा विभक्तस्य दिनस्य चतुर्थो भागः । यदा तु दिनद्वयेऽपि सम्पूर्णापराह्नव्यापिनी तदा पूर्वेव । यदा दिनद्वयेऽपि अपराह्नसम्बन्धो नास्ति तदाऽस्तात्पूर्वं त्रिमुहूर्ता चेत्पूर्वा । तदभावे तु परैव । यदा दिनद्वयेऽप्यपराह्नैकदेशव्यापिनी तदा यस्मिन् अहन्यधिकव्यापिनी सैव ग्राह्या । तिथिवृद्धौ तिथिसाम्ये च परेति बहवः । साम्ये पूर्वेति हेमाद्रिः । अस्मिन्नर्थे दीपिकाश्लोकः -

**यत्राहन्यधिकाऽपराह्नसमये सा स्यात्तिथिः पार्वणे ।**
**साम्येन द्व्यपराह्नभागयुगसौ वृद्धौ तिथेरुत्तरा ॥**
**ग्राह्या ह्राससमत्वयोस्तु पुरतोऽथो नापराह्नं स्पृशे-**
**द्यद्वा याऽखिलमश्नुते द्व्यहगता सा सर्वदाऽद्या स्मृता ॥** इति ।

अत्र तिथिसमत्वे पूर्वेति हेमाद्रिमतेनोक्तम् । अत्र क्षयवृद्धी उत्तरतिथिगते ग्राह्ये न ग्राह्यतिथिगते । तत्र क्षयस्योदाहरणम्– त्रिंशद्धटिकापरिमिते दिनमाने प्रतिपद्विंशतिघटिका । तदा द्वितीयाश्राद्धं प्रतिपदि कार्यम् । साम्योदाहरणं यथा– प्रतिपद्द्वितीये यथास्थितते । तृतीया द्वाविंशतिघटिका । वृद्ध्युदाहरणम्– प्रतिपद्द्वितीये यथास्थितते । तृतीया त्रवोविंशतिघटिका । एतदुदाहरणद्वये द्वितीयाश्राद्धं द्वितीयायामेव ।

एवमन्यत्रापि बोध्यम् । केचिद्दिनद्वये सम्पूर्णापराह्नव्यापित्वेऽपि क्षयसाम्यवृद्धिभिः निर्णय इत्याहुः ।

वार्तिके तु दिनद्वये सम्पूर्णापराह्णव्याप्तौ पूर्वतिथिभोगापेक्षया ग्राह्यतिथिभोगस्य क्षयसाम्यवृद्धिभिर्निर्णय इत्युक्तम् ।

तत्रत्योदाहरणानि- यदा दिनमानं षड्विंशति (२६) घटिकापरिमितं तदा पूर्वतिथ्यपेक्षया ग्राह्यतिथिगतक्षयोदाहरणं चतुर्दशी दशघटिका । अमावास्यायां सार्धपञ्चदशी (१५) । ३० घटिका । प्रतिपदष्टाचत्वारिंशत्पलाधिकविंशतिः (२०) । ४८ घटिका । अत्रामाभोगः सार्धपञ्चषष्टिः (६५) । ३० घटिका परिमितः । प्रतिपद्भोगेऽष्टादशपलाधिकपञ्चषष्टि (६५) । १८ घटिका परिमितः ।

एवं सति ग्राह्यायाः प्रतिपत्तिथेर्दिनद्वये सम्पूर्णापराह्णव्याप्तिः । पूर्वतिथ्यपेक्षया ग्राह्यप्रतिपत्तिथिगत एवं च क्षयो द्वादशपलानीति क्षयोदाहरणसम्भवात्तत्र प्रतिपन्निमित्तकं श्राद्धमयुक्तप्रतिपद्येव भवति । वृद्ध्युदाहरणं यथा चतुर्दशे सप्तपलाधिकदश (१०) । ७ घटिका । अमा पञ्चविंशतिपलाधिका पञ्चदश (१५) । २५ घटिका । प्रतिपत्पञ्चपञ्चाशत्पलाधिकविंशतिः (२०) । ४४ घटिका अमाभोगेऽष्टादशपलाधिकपञ्चषष्टिः (६५) । १८ घटिकापरिमितः ।

प्रतिपद्भोगः सार्धपञ्चषष्टिः (६५) । ३० घटिकापरिमितः । एवं सति द्वादशपलानि पूर्वतिथ्यपेक्षया ग्राह्यायाः प्रतिपत्तिथेर्वृद्धिः स्पष्टैव ।

तस्योदाहरणं यथा – चतुर्दशी दश (१०) घटिका । अमा पञ्चविंशतिपलाधिकपञ्चदश (१५) । २५ घटिका । प्रतिपत्पञ्चाशत्पलाधिकविंशति (२०) । ५० घटिका , अत्रामाप्रतिपदोः पञ्चविंशतिपलाधिकपञ्चषष्टिः (६५) । २५ घटिकापरिमितो भाग इति पूर्वतिथ्यपेक्षया ग्राह्यप्रतिपत्तिथेः साम्यमिति । इति पार्वणश्राद्धतिथिनिर्णयः ।

एकोद्दिष्टे तु मध्याह्नव्यापिनी तिथिर्ग्राह्या । अत्र मध्याह्नशब्देन मध्याह्नैकदेशः कुतपरौहिणाख्यो मुहूर्तद्वयात्मको गृह्यते । कुतपपूर्वभाग एवाऽऽरम्भः । अत्रापि तिथिद्वैधे पार्वणतिथिवन्निर्णयो ज्ञेयः। दिनद्वये तुल्यैकदेशव्याप्तौ पूर्वैवेति कमलाकरः । आमश्राद्धे तु पूर्वाह्णव्यापिनी तिथिर्ग्राह्या । आमश्राद्धं तु पूर्वाह्ण इति वचनात् ।

अत्र पूर्वाह्णशब्देन सङ्गमकालो गृह्यते ।

**कालात्प्रातस्तनादूर्ध्वं त्रिमुहूर्ता तु या तिथिः ।**
**आमश्राद्धं तत्र कुर्याद्द्विमुहूर्ताऽपि या भवेत् ॥**

इति व्याघ्रपादवचनात् । हिरण्यश्राद्धस्याप्ययमेव कालः । समानधर्मत्वात् । तिथिद्वैधे तु पूर्ववन्निर्णयः । इति सामान्यश्राद्धतिथिनिर्णयः ।

अथ दर्शश्राद्धेऽमावास्या निर्णीयते तत्र या पञ्चधा विभक्तस्य दिनस्य


ISSN: 2320-740X

चतुर्थभागरूपापराह्णव्यापिन्यमावास्या सा ग्राह्या । दिनद्वये अपराह्णैकदेशव्याप्तौ यस्मिन्नहन्यादिव्यापिनी सैव ग्राह्या । दिनद्वये तुल्यैकदेशव्याप्तौ तिथिक्षय आहिताग्नीनां गृह्याग्निमताम् च पूर्वा ।

निरग्निकब्रह्मचारिविदुरानुपनीतस्त्रीशूद्राणामुत्तरा । तिथिसाम्ये तिथिवृद्धौ च सर्वेषामुत्तरैव । दिनद्वये सम्पूर्णापराह्णव्याप्तौ दिनद्वयेऽपराह्णस्पर्शाभावे वाऽऽहिताग्नेर्गृह्याग्निमतश्च पूर्वा । निरग्निकादीनामुत्तरा । हेमाद्रिस्तु दिनद्वयेऽपराह्णव्याप्त्यभावे निरग्निकानां कुतपकालव्यापिन्यमावास्येत्याह । दिनद्वयेऽपराह्णस्पर्शे कुतपकालव्यापिनीति माधवः । इदमेव युक्तमिति कमलाकरः । अपरे तु द्विधा विभक्तस्य दिनस्य कुतपोत्तरार्धादिरूपा याऽपराह्णव्यापिनी सा निरग्निकैः श्राद्धे ग्राह्येति वदन्ति । दिनद्वयेऽपि कुतपकालव्याप्तौ तिथिक्षये पूर्वा । वृद्धिसाम्ययोः परा । अत्राप्यपराह्णे एव श्राद्धानुष्ठानं युक्तम् । कुतपे प्रारब्धस्य प्रतिपदि समाप्तौ न दोषः इति सामन्यनिर्णयः ।

अथ शाखाभेदेनाऽऽहिताग्नीनां निर्णयः :- साग्निकविषये त्रेधाविभक्तदिनतृतीयांशे योऽपराह्णभागस्तद्व्यापिन्यमावास्येति कमलाकरः । प्रायः साग्निकानामिष्टिदिनात्पूर्वदिने यथा दर्शश्राद्धं भवेत्तदनुकूलवाक्यार्थग्रहणेन निर्णयः कर्तव्यः । तस्मात् पूर्वेद्युः पितृभ्यः क्रियात् “उत्तरमहर्देवान्यजन्त” इति श्रुतेः । तैत्तिरीयाणां तु क्वचिदिष्ट्यनन्तरमपि श्राद्धप्रसक्तिरिति गम्यते । दिनद्वयेऽपराह्णसत्त्वे दिनद्वयेऽपराह्णस्पर्शाभावे वा बह्वृचैः पूर्वाऽमावास्या ग्राह्या । तैत्तिरीयैरुत्तरा । सामगैः पूर्वोत्तरा वा । तदाह हारीतः :-

**त्रिमुहूर्ताऽपि कर्तव्या पूर्वा खर्वाऽपि बह्वृचैः ।**
**कुहूरध्वर्युभिः कार्या यथेष्टं सामगीतिभिः ॥**

त्रिमुहूर्ताभावे तु पूर्वा नेति कमलाकरः । अत्राध्वर्युशब्दस्तैत्तिरीयपरः । अत्रापि यदा तिथिवृद्ध्या कात्स्न्र्येनोभयापराह्णव्यापिन्यमावास्या प्रतिपद्दिन एवेष्टिस्तदा परैव सर्वेषाम् । यदप्रतिपत्क्षयात्सन्धिमद्दिने यागस्तदा हारीतोक्तनिर्णय इति । येषां बोधायनकात्यायनादीनां चन्द्रदर्शनवति प्रतिपद्दिने यागनिषेधस्तैर्निर्णीतस्वस्वान्वाधानदिने पिण्डपितृयज्ञोत्तरं दिनान्तमुहूर्तत्यागेन दर्शश्राद्धं कार्यम् । अत्र चतुर्दश्यामपि श्राद्धानुष्ठाने न दोषः ।

**चतुर्दशी च सम्पूर्णा द्वितीया क्षयकारिणी ।**
**चरुरिष्टिरमायां स्याद्भूते कव्यादिका क्रिया ॥**

इति माधवोदाहृतत्वात् । आश्वलायनानामप्येवमेवेति प्रतिभाति । तत्रोच्यते- आश्वलायनानामिष्टेस्तु द्वेधाऽप्याचारो दृश्यते । केचित् द्वितीयासहितायां प्रतिपदि चतुर्थभागेऽपि यागं कुर्वन्ति । केषांचिदन्यथाकरणमुक्तिरपि तदनुकूलैव । तद्विचारणीयम् । अन्ये तु पूर्वेद्युरपराह्णसन्धावपि परदिने प्रातर्यागपर्याप्तिपरिमितप्रतिपत्तृतीयासत्त्वे एव परदिनेऽन्यथा

पूर्वत्रैव सन्धिमद्दिने यागं कुर्वन्ति । अत एव यदा पर्वण्यस्तमयात्पूर्वं ह्रासवृद्धिवशेन सप्ताष्टघटिकापरिमितः प्रतिपत्तिथिप्रवेशस्तस्मिन्नहनि यागः पूर्वेद्युरन्वाधानमिति प्रायश्चित्तप्रदीपे उक्तम् । युक्तं चैतत् ।

**पर्वणोंऽशे द्वितीये तु कर्तव्येष्टिर्द्विजातिभिः ।**
**द्वितीयासहितं यस्माद्दूष्यन्त्याश्वलायनाः ॥**
**न यष्टव्यं चतुर्थेंऽशे यागैः प्रतिपदि क्वचित् ।**
**रक्षांसि तद्विलपन्ति दूषयन्त्याश्वलायनाः ॥**
**यस्तु न प्रारभेतेष्टिमन्त्यांशे पर्वणो द्विजः ।**
**प्रतिपदश्चतुर्थांशात्प्राग्यश्च न समापयेत् ॥**
**कृतावप्येककृतैवेष्टिस्तयोः स्यान्नात्र संशयः ।**
**पुनरेवाऽचरेदिष्टिं शुभेऽहनि यथाविधि ॥**

इति प्रयोगपारिजात आश्वलायनोक्तेः । पर्वणोंऽशे द्वितीय इति द्वितीयेऽर्ध इत्यर्थः । पार्वणस्थालीपाकस्यापीत्थमेव निर्णयः । अथ पार्वणीस्थालीपाकस्तस्य दर्शपूर्णमासाभ्यामुपवास इत्याश्वलायनगृह्यात् । यैर्बोधायनीयमाध्वर्यवं स्वीकृतं तेषां बोधायनमतानुसारित्वादध्वर्युं प्रतीदं तु व्याख्यानं कामकालदेशदक्षिणानामित्याश्वलायनसूत्र आध्वर्यवोक्तकालग्रहणाभ्यनुज्ञानाच्चन्द्रदर्शनवति प्रतिपद्दिने यागो नैवोचित इति प्रतिभाति । अत एव प्रकृत आश्वलायनाचार्यवचनानां निरवकाशत्वात्तदुक्तकालग्रहणस्यैवोचितत्वात्पौर्णमास्यां मुहूर्तत्रयपरिमित-प्रतिपदीयांशलाभ एव द्वितीयदिने यागोऽन्यथा पूर्वदिने । तथाऽमावास्यायामपराह्णसन्धौ परदिने षण्मुहूर्तप्रतिपत्तृतीयांशसत्त्वे एवं परदिनेऽन्यथाचतुर्दश्यामन्वाधानं कृत्वा बोधायनवत्सन्धिमद्दिन एव यागः कर्तव्य इति पुरुषार्थचिन्तामणिकारेण सिद्धान्तितम् ।

ननु प्रातर्यजध्वमित्यादिश्रुत्या यागस्य प्रातः कालविधानात् ।

**प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते ।**
**पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या यागवित्तमैः ॥**

इति गार्ग्यवचनविरोधात् कथमपराह्णसन्धिमद्दिन इति चेत्तत्रोच्यते– अन्वाधानादिब्राह्मणभोजनान्तकर्मसमुदायरूपयागस्य ब्राह्मणतर्पणरूपान्तिमपदार्थस्य प्रतिपदि समापने न कोऽपि विरोधः । उक्तं च कार्तार्यपरिशिष्टे –

**आवर्तनेऽथवा तत्प्राग्यदि पर्व समाप्यते ।**
**तन्त्रं पूर्वाह्ण एव स्यात्सन्धेरूर्ध्वं द्विजाशनम् ॥** इति ।

इत्यलं प्रसक्तानुप्रसक्त्या ।


ISSN: 2320-740X

अथ पिण्डपितृयज्ञेऽमावास्या निर्णीयते । तत्र कात्यायनानां यागादिना पूर्वेद्युरेव पिण्डपितृयज्ञः । तन्मते यागस्य पूर्वाङ्गमेवासौ । कर्काचार्यव्याख्यानमपि तथैव । आपस्तम्बहिरण्यकेशीयादीनां पूर्वसन्धिमदहोरात्रे मुहूर्तमात्रायामप्यमावास्यायां पिण्डपितृयज्ञः । तत्सूत्रस्य तथैव रुद्रादुत्तरामाण्डारादिव्याख्यानात् । आश्वलायनानां तु यस्मिन्नहोरात्रे प्रतिपत्पञ्चदश्योः सन्धिस्तस्मिन्दिनेऽपराह्णेऽह्नचतुर्थे भाग औपवसथ्येऽहन्यन्वाधानोत्तरं यजनीयेऽहनि यागोत्तरं वा पिण्डपितृयज्ञः।

स चाक्षरद्वयोच्चारणपरिमितः काल इति पुरुषार्थचिन्तामणौ । हेमाद्रौ तु–

**कुह्वेति कोकिलेनोक्ते यावान्कालः समाप्यते ।**

**तत्कालसंज्ञिता चैषा अमावास्या कुहूः स्मृता ॥**

इति मात्स्यात्कोकिलशब्दमात्रः। एतादृशस्य सूक्ष्मसन्धिकालस्य दुर्लक्ष्यत्वाद्गणितेनापि ज्ञातुमशक्यत्वाच्च मध्ये निशाह्नोः पञ्चविंशति चेति ज्योतिःशास्त्रोक्तौ मध्याह्नमध्यरात्रकालौ तद्वदत्रापि विंशतिपलात्मककालो ग्राह्यः । अत एवाऽऽह हेमाद्रौ शौनकः -

**मुहूर्तस्पृगमावास्या प्रतिपद्यपि चेद्भवेत् ।**

**तद्दत्तमक्षयं ज्ञेयं पूर्वशेषं तु पूर्ववत् ॥** इति ।

अत्र मुहूर्तशब्देन क्षणो ग्राह्यः । ज्योतिःशास्त्रे मुहूर्तशब्दस्य क्षणपरत्वदर्शनात् । क्षणस्तु दशपलात्मकोऽमरकोशे प्रसिद्धः । एवं च सूर्योदयोत्तरं दशपलाधिकायाममावास्यायां सत्यां तद्दिनेऽपराह्णे पिण्डपितृयज्ञः कर्तव्यः । तन्न्यूनत्वे पूर्वेद्युरिति गम्यते । कमलाकराशयस्त्वेवमेव । यदत्र युक्तं तद्ग्राह्यम् । अत्र वृत्तिकृदुक्ते पञ्चधा विभक्तस्य दिनस्य चतुर्थभागरूपेऽपराह्णे यथासम्भवं दिनान्तत्रिमुहूर्तत्यागेन पिण्डपितृयज्ञानुष्ठानं कर्तव्यम् । एतन्निर्णायकमूलवाक्यानि न्यायाश्च सर्वत्र प्रसिद्धाः इति नात्र लिखिताः इति ।

**********

# अज्ञानलक्षणम्

**डा. विश्वनाथ हेगडे**

सहायकाचार्यः, अद्वैतवेदान्तविभागः

अद्वये सच्चिदानन्दरूपे ब्रह्मण्याश्रिता या आनाद्यविद्या सैव संसारकारणमिति श्रुतयः स्मृतयश्च ऊचुः । सैव अविद्या माया अज्ञानमिति वा व्यवह्रियते । इदमेव अज्ञानं चैतन्यस्य उपाधिर्भूत्वा तदुपहितचैतन्यस्य ईश्वरत्वं सम्पाद्य जगतः सृष्टौ प्रवर्तकं भवति । अज्ञानस्य नाशं विना मोक्षो न सिद्ध्यतीत्यतः अज्ञानस्य स्वरूपं ज्ञातव्यम् । तथा च किं नाम अज्ञानम् ? किं तस्य लक्षणमिति चेदुक्तं श्रीसदानन्दप्रणीते वेदान्तसारे **'अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्'**[1] इति । अत्र तुशब्दो मतान्तरेभ्यो वैशिष्ट्यद्योतनार्थः । तदेव दर्शितं सदसद्भ्यामित्यादिना ।

सदसदादिरूपभिन्नत्वात् अज्ञानम् अनिर्वचनीयमित्यर्थः । तथा च अज्ञानं ज्ञानेन बाध्यत इत्यतः तस्य सद्रूपत्वं वक्तुं नैव शक्यम् । यतः कालत्रयेऽपि यदबाध्यं तस्यैव सत्त्वात् । अज्ञानस्य सद्रूपत्वे आत्मवत् नित्यत्वप्रसङ्गः । अनिर्मोक्षप्रसङ्गश्च । तर्हि असदेव भवत्विति चेत् तदपि न । असतः बाध्यमानत्वं वा सत्त्वेन प्रतीयमानत्वं वा नास्ति । तदुक्तमसतः लक्षणम् – 'क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वमि'ति[2] । असद्रूपत्वस्वीकारे तस्य वन्ध्यापुत्रादिवदपरोक्षप्रतिभासानुपपत्तेः । नैवम् अज्ञानं सत्त्वेन वा अपरोक्षतया वा न प्रतीयते । तथा च नाप्यसद्रूपमज्ञानम् । तर्हि तदुभयात्मकमस्त्विति चेन्न । परस्परविरुद्धधर्मयोरेकत्र समावेशासम्भवात् । अत एव तदुभयभिन्नं सत्त्वेन वा असत्त्वेन वा निर्वक्तुं नैव शक्यम् अनिर्वचनीयमित्युक्तम् । तथा च अज्ञानस्य मिथ्यात्वं सिद्धम् ।

ननु अज्ञानस्य अनिवर्चनीयत्वे सर्वथा ज्ञातुमशक्यत्वात् तदभावप्रसङ्ग इति चेदुक्तम् **त्रिगुणात्मकम्** इति । गुणाः सत्त्वरजस्तमांसि । तथा च श्रुतिः 'अजामेकां लोहितशुक्लकृष्णां..'[3] 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यकृष्णं तदन्नस्य' इत्यादि । अत्र लोहितशुक्लकृष्णपदवाच्याः त्रिगुणाः अज्ञानकार्येषु तेजोबन्नेषु प्रसिद्धाः । तथा च कार्यगतगुणत्रयेण कारणस्यापि त्रैगुण्यं सिद्ध्यति, 'कारणगुणाः कार्यगुणानारभन्ते' इति

[1] वे.सा.६

[2] अ.सि.

[3] श्वे.उ.४.५



ISSN: 2320-740X

न्यायेन । किं च सूत्रम्– 'ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके'[1] इति । गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकमित्युक्तम् । तथा च गुणस्य गुणवत्त्वानुपपत्तेः न मिथ्याज्ञानमज्ञानमित्यर्थः ।

ननु ईदृशस्य अजस्य अज्ञानस्य श्रुतिसिद्धस्य आकाशवत् व्याप्य वर्तमानस्य नित्यत्वं भवितुमर्हति । तथा चेत् संसारानिवृत्तेः मोक्षाभावप्रसङ्ग इति चेत् उच्यते **'ज्ञानविरोधि'** इति । अजत्वेऽपि आत्मतत्त्वज्ञानेन निवर्त्यमिदमित्यर्थः । तथा च स्मृतिः – 'दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते'[2] इति । ननु प्रपञ्चस्यापि ब्रह्मात्मैक्यज्ञाननिवर्त्यत्वात् प्रपञ्चे अतिव्याप्तिरिति वाच्यम् । प्रपञ्चस्य अज्ञानोपादानकत्वेन तदनतिरेकात् । नापि अज्ञानात्मसम्बन्धेऽतिव्याप्तिः । असङ्गस्वभावस्य चिदात्मनो अज्ञानसम्बन्धस्य अज्ञानाधीनत्वात् तस्याप्यज्ञानात्मत्वोपपत्तेः । अत्र ज्ञानविरोधि इत्येव लक्षणस्वीकारे उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने अतिव्याप्तिः । पूर्वज्ञानस्यापि ज्ञाननिवर्त्यत्वाच्च इति चेत् न । पूर्वज्ञानं केवलं ज्ञानापनोद्यं न । इच्छादिवृत्यन्तरेणापि तस्य निवृत्तिदर्शनात् । आत्मविशेषगुणनिवर्त्यत्वं तस्य । अत्र तु ज्ञानमात्रापनोद्यत्वम् अभ्युपगम्यते । अतो न दोषः ।

एवमपि ज्ञानप्रागभावे लक्षणस्य अतिव्याप्तिः । तस्यापि ज्ञाननिवर्त्यत्वात् । किं च इदमज्ञानं तार्किकादिरीत्या ज्ञानाभाव एव इति स्वीक्रियताम् इति चेत् उच्यते– **'भावरूपमि'**ति । अज्ञानस्य ज्ञानाभावत्वे अभावप्रतियोगि यज्ज्ञानं तत् किं रूपम् ? साक्षिचैतन्यं वा? यतः 'साक्षी चेता'[3] इत्यादिश्रुतेः तस्यापि ज्ञानत्वप्रसिद्धेः । किं वा अन्तःकरणवृत्तिः? 'विज्ञानेन वा ऋग्वेदं विजानाति'[4] इति विज्ञानशब्देन बुद्धेः श्रवणात् । अथवा वैशेषिकप्रसिद्धो आत्मगुणः? नाद्यः, साक्षिचैतन्यस्य अभावप्रतियोगित्वं नास्ति । तस्य नित्यत्वात् । द्वितीये अन्तःकरणवृत्तौ ज्ञानशब्दः औपचारिक इत्यतः तदभावस्य मुख्यतोऽज्ञानत्वायोगात् । आत्मगुण इति पक्षे ज्ञानविशेषाभावः वा ज्ञानसामान्याभावो वा अज्ञानमिति वक्तव्यम् । ज्ञानविशेषाभावो नाज्ञानम् । यतः 'मूढोऽहं न किञ्चिज्जानामि' इति अनुल्लिखितविषयविशेषस्याप्यज्ञानस्य अनुभूयमानत्वात् । तस्यापि विषयविशेषपर्यवसायित्वकल्पने सामान्यबुद्धिविलोपप्रसङ्गः । तथा च नाभावोऽज्ञानं किन्तु तद्विलक्षणमेव । 'देवात्मशक्तिं स्वगुणैर्निगूढाम्', 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिवाक्ययोः अज्ञानस्य गुणवत्वं जगदुपादानत्वं चावगम्यते ।

---

[1] ब्र.सू.१.४.९

[2] भ.गी.७.१४

[3] श्वे.उ.६११

[4] छा.उ.७.७.१

ननु अज्ञानस्य भावत्वे अनादेस्तस्य चिदात्मवत् अनिवृत्तिप्रसङ्ग इत्यत उक्तम् **यत्किञ्चिदिति** । पिण्डीकृत्य प्रदर्शयितुं न शक्यत इत्यर्थः । किं च भावत्वमत्र परमार्थसत्त्वाभिप्रायेण नोच्यते किन्तु अभाववैलक्षण्याभिप्रायेण । वस्तुतस्तु अज्ञानं भावाभावविलक्षणम् । न च भावाभावयोः परस्परविरहरूपत्वात् अन्यतरनिषेधे अन्यतरसत्त्वापातात् भावाभावोभयवैलक्ष्यण्यं न घटत इति चेत् न । भावाभावयोः परस्परविरहरूपत्वाभावात् । किं च यत्र न अभावत्वं तत्र भावत्वम्, यत्र न भावत्वं तत्र अभावत्वमिति भावत्वाभावत्वयोः परस्परविरहव्यापकत्वमपि नास्ति । यत्र अभावत्वं तत्र भावत्वाभावः, यत्र भावत्वं तत्र अभावत्वाभावः इति परस्परविरहव्याप्यत्वरूपविरोधस्तु एकस्य विरहात् अपरस्य सत्त्वं नापादयति । यथा परस्परविरहव्याप्ययोः गोत्वाश्वत्वयोः एकस्मिन् गजे वर्तमानत्वात् गोत्वाभावः गजे अश्वत्वं नापादयति तद्वत् । तदुक्तं विद्वन्मनोरञ्जिन्याम्– 'स्त्रीपुंप्रकृत्योः परस्परप्रतिस्पर्धिनोर्निषेधे तदन्यस्य नपुंसकस्येव भावाभावान्यस्याज्ञानस्योपपत्तेः । अथ तत्र प्रमाणान्तरेण तृतीया प्रकृतिरुपलभ्यत इति मतं तर्हीहाप्यस्ति प्रमाणं प्रतीतिबाधान्यथानुपपत्तिरिति सन्तोष्टव्यम्' इति । तथा च किमप्यघटितघटनापटीय इत्यर्थः ।

अनिर्वचनीयानादिभावरूपाज्ञानसद्भावे 'न जानामि' 'अहमज्ञः' इत्यादयः अनुभवाः प्रमाणम् । 'देवात्मशक्तिं स्वगुणैर्निगूढाम्'[1] 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः[2]', 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः[3]' इत्यादिश्रुतिस्मृतयश्चात्र प्रमाणम् ।

ननु अज्ञानस्य अनादित्वे शुक्तिरजतादिभ्रमे शुक्त्यादेरावरके अज्ञाने अज्ञानलक्षणस्य अव्याप्तिः । शुक्त्यादीनां सादित्वेन तदावरकस्य अज्ञानस्यापि सादित्वात् । तथा च अज्ञानस्य सादित्वम् अनादित्वं चेति द्वैविध्यं स्वीकर्तव्यं स्यात् । स्वीकृतं च वेदान्तिभिः । एकाविद्या अनादिः भावरूपा, सा हि जगत्कारणभूता मूलाविद्या । अन्या तु पूर्वपूर्वविभ्रमसंस्काररूपा सादिः तूलाविद्या । यतः रज्जुसर्पविभ्रमः सादिः अतः तस्य विभ्रमस्य उपादानभूता अविद्यापि सादिः । एवम् अज्ञानलक्षणे अज्ञानस्य अनादित्वमात्रोक्तत्वेन साद्यविद्यायाम् अव्याप्तिः इति चेदुच्यते – वस्तुतः सिद्धान्ते अनादिब्रह्मचैतन्याश्रितम् अज्ञानमेकमेव । तच्च अनादि । शुक्तिरजतादिविभ्रमस्य उपादानभूताज्ञानमपि वस्तुतः अनादिचैतन्याश्रितमेव । अत एव तदपि अनादिस्वरूपमेव । किन्तु अनादिभूतमप्यज्ञानं सादिवस्तुभिः परिच्छिन्नं भवतीति शुक्तिरूप्योपादानभूतमज्ञानं सादीत्युपचर्यते ।

तच्चोक्तमद्वैतसिद्धौ – 'रूप्योपादानमज्ञानमप्यनादिचैतन्याश्रितत्वाद् अनाद्येव, उदीच्यं शुक्त्यादिकं तु

[1] श्वे.उ.१.३

[2] भ.गी.५.१५

[3] भ,गी. ७.२५


ISSN: 2320-740X

तदवच्छेदकम् इति न तत्राव्याप्तिः'[1] इति । तथा च सिद्धान्ते अज्ञानस्य अनादित्वमेव स्वीकृतम् । **भ्रमोपादानत्वम**पि अज्ञानस्य लक्षणमिति अद्वैतसिद्धिकारैः प्रदर्शितम् । अत्र ब्रह्मणि अतिव्याप्तिवारणाय परिणामित्वम् अचेतनत्वं वा विशेषणं देयम् । अभावभ्रमस्यापि प्रमानिवर्तकत्वात् अज्ञानोपादानकत्वं तत्र वर्तत एव इति न दोषः । एवमेव ज्ञानत्वेन रूपेण ज्ञानसाक्षान्निवर्त्यत्वम् इति अज्ञानस्य तृतीयं लक्षणम् । अज्ञानचैतन्यसम्बन्धादेः ज्ञानसाक्षान्निवर्त्यत्वाभावात् नातिव्याप्तिरिति सर्वमवदातम् ।

**<u>सङ्केताक्षरसूची</u>**

छा. उ- छान्दोग्योपनिषत्

श्वे. उ- श्वेताश्वतरोपनिषत्

भ. गी– भगवद्गीता

ब्र. सू- ब्रह्मसूत्रम्

वे. सा- वेदान्तसारः

अ. सि- अद्वैतसिद्धिः

**********

[1] अ.सि.

# बाधास्थानानि

**डा. मुरलिकृष्णः टि.**
प्राध्यापकः, ज्यौतिषविभागः

केरलीयप्रश्नशास्त्रे बाधास्थानानामस्त्यनितरसाधारणं स्थानम् । प्रश्नमार्गे प्रश्नानुष्ठानपद्धतौ च एतद्विषयकं चिन्तनं विस्तरशः निरूपितम् । बाधकस्थानं, बाधा अथवा बाधक इति नामान्तराणि बाधास्थानमेव निर्दिशन्ति । बाधा तथा बाधकः इतीमे पदे बाधृ विलोडने इत्यस्माद्धातोः उत्पन्ने । यस्य च प्रतिबन्धः, पीडा, विरोधः, हिंसा, निषेधः इति नानार्थाः शब्दकोशेषु दृश्यन्ते । फलचिन्तायामपि प्रतिबन्धस्य पीडायाः वा चिन्तनार्थमेव बाधास्थानानामुपयोगः ।

प्रश्नमार्गस्य पञ्चदशे अध्याये बाधासमूहस्य चिन्तनं विहितम् । मुख्यतया देवबाधा, धर्मदेवबाधा, सर्पबाधा, पितृबाधा, गुरुशापः, ब्राह्मणशापः, प्रेतबाधा, भूतगणादिबाधा, वाग्दोषः, दृग्दोषः, विषभोजनं, शत्रुकृताभिचारः इत्येवं द्वादशविधाः बाधाः भवितुमर्हन्ति । अर्थात् एतैः कारणैः जातकाय पीडाः उत्पद्यन्ते । द्वादशविधबाधाः एव बाधासमूह इति नाम्ना अभिहिताः । अत्र प्रमाणं यथा -

**देवैर्वा धर्मदेवैः फणिपितृगुरुभिः ब्राह्मणैः प्रेतभूतैः**
**पीडा या स्यात्कृता सा तदनु भवति या दृग्भवा वाग्भवा वा ।**
**या स्याद्भूयो विषोत्था पुनरिह रिपुभिर्याकृता सा च तासां**
**हेतुश्चापि क्रमेण प्रतिविधिरपि च प्रोच्यते पृच्छकानाम् ॥**[1] इति ।

बाधाविचारः तात्कालिकप्रश्नेषु विचार्यते । अष्टमङ्गलप्रश्नक्रमे अप्यस्त्यस्य महानुपयोगः । जातकफलचिन्तने ग्रहाणां दशान्तर्दशायाः फलसंवादार्थं बाधास्थानानि बाधेशश्च गृह्यन्ते ।

- **प्रश्नमार्गस्य प्रश्नानुष्ठानपद्धतेश्च मतम्**

प्रश्नमार्गस्य पञ्चदशः अध्यायः प्रश्नानुष्ठानपद्धतेः दशमः अध्यायश्च बाधानिरूपणार्थमेव प्रवृत्तः । बाधास्थानानां गणनाक्रमे त्रयः प्रकारास्सन्ति । तत्र प्रथमद्वितीयप्रकारौ कथितौ प्रश्नमार्गे यथा -

**आरूढराशौ चर आयराशौ स्थिरे तु बाधा नवमे विचिन्त्या ।**
**तथोभये कामगृहे त्रयाणां केन्द्रेषु चैषामिति केचिदाहुः ॥**[1]

[1] प्र. मा. – १५ अ. १ श्लो.


ISSN: 2320-740X

चरराशिषु तस्मादेकादशस्थानं, स्थिरराशिषु तस्मान्नवमस्थानम्, उभयराशिषु तस्मात्सप्तमस्थानं बाधास्थानम् इति **प्रथमः प्रकारः** । तदधिपः बाधकेश इति उच्यते । उदाहरणार्थं मेषराशिः चरः । तस्मादेकादशस्थानं कुम्भः । अतः कुम्भराशिः बाधास्थानम् । कुम्भस्याधिपः शनिः बाधकेश इति च व्यपदिश्यते। एवमेव वृषभः स्थिरः । तस्मान्नवमः मकरः । अतस्तद् बाधकस्थानम् । तदीशः शनिः – बाधकेशः । तथैव मिथुनः उभयराशिः । तस्मात्सप्तमः धनुः - बाधकस्थानम् । तदीशः गुरुः बाधकेशस्सञ्जातः । एवमन्येषु राशिषु **चिन्तयेत्** ।

**'केन्द्रेषु चैषामिति केचिदाहुः'**[2] इत्ययं **द्वितीयः प्रकारः** । अर्थात् प्रत्येकस्मात् राशितः केन्द्रगताः राशयः तत्तद्राशेः बाधास्थानानि स्युः । उदाहरणार्थं मेषराशेः कर्क-तुला-मकरराशयः बाधास्थानानि । तदीशाः चन्द्र-शुक्र-शनयः बाधकग्रहाः अथवा बाधकेशाश्च स्युः । एवमेव अन्येषु राशिषु विचारो विधेयः ।

अथ च **तृतीयः प्रकारः महाबाधास्थानानि** इति नाम्ना अभिधीयते । तद्यथा -

**कुम्भश्चराणामलिचापसिंहस्त्रीणामलिर्गोवृषभस्य नक्रः ।**
**कुम्भस्य कर्की मिथुनस्य धन्वी मीनस्य चापं खलु बाधकं स्यात् ॥**[3]

सर्वेषां चरराशीनामर्थात् मेष-कर्क-तुला-मकरराशीनां कुम्भः बाधास्थानम् । वृश्चिक-धनु-सिंह-कन्याराशीनां वृश्चिकः बाधास्थानम् । वृषभस्य मकरः बाधास्थानम् । कुम्भस्य कर्कः बाधाराशिः । मिथुनस्य मीनस्य च धनुः बाधाराशिः । इत्थं महाबाधास्थानानां चिन्तनाक्रमः ।

- **बाधास्थानेषु कतमः ग्राह्यः ? -** एतावता बाधकस्थानानां निरूपणे त्रयः पक्षाः उपस्थापिताः । उक्तेषु कतमस्य ग्रहणं फलचिन्तनोपयोगी इति जिज्ञासा समुदेति । तत्रायं निर्णयः -

**बाधानिरूपणे पक्षास्त्रय इत्येषु गृह्यताम् ।**
**आदिमोऽन्त्यश्च सर्वत्र ग्राह्यो वा मध्यमः क्वचित् ॥**[4]

---

[1] प्र. मा. – १५ अ. १११ श्लो. ; प्रश्नानुष्ठानपद्धतौ -
चरोदये लाभगृहे तु बाधा स्थिरे तु राशौ नवमे विचिन्त्यम् ।
तथोभये कामगृहे त्रयाणां केन्द्रस्थितैरित्यपरे वदन्ति ॥ १०अ. ३१ श्लो.

[2] पूर्वोक्तश्लोकस्यान्तिमः पादः द्रष्टव्यः ।

[3] प्र. मा. – १५ अ. ११२ श्लो. ; प्रश्नानुष्ठानपद्धतौ –
कुम्भस्तुलामेषमृगेन्दुभानां सिंहालिकन्याधनुषामलिः स्यात् ।
कुम्भस्य कर्की वृषभस्य नक्रः चापस्तु बाधा मिथुनान्त्यराश्योः ॥ - १०अ. ३१ श्लो.

[4] प्र. मा. – १५ अ. ११३ श्लो.

ISSN: 2320-740X

प्रथमतृतीयौ पक्षौ सर्वजनादरीणीयौ भवतः । **केन्द्रेषु चैषामिति केचिदाहुः** इत्ययं मध्यमः पक्षः कादाचित्कः । अतस्तत् क्वचिदेव गृह्यते ।

- **जातकपारिजातस्य मतम्**

वैद्यनाथप्रणीते जातकपारिजाते प्रश्नमार्गीयः प्रथमपक्ष एव उपस्थापितः यथा -

**क्रमाच्चरागद्विशरीरभानामुपान्त्यधर्मस्मरगास्तदीशाः ।**
**खरेशमान्दिस्थितराशिनाथा[1] ह्यतीव बाधाकरखेचराः स्युः ॥[2]**

**यस्य भावस्य विचारः क्रियते स यदि चरराशिः तर्हि तस्मादेकादशगतो वा तदीशो ग्रहो** बाधकः । एवमेव विचार्यमाणभावः स्थिरश्चेत् तस्मान्नवमस्थः वा तदीशः, द्विस्वभावश्चेत् तस्मात्सप्तमगः वा तदीशः **ग्रहो बाधको भवति ।**

**बाधास्थानपतद्युतग्रहदशा शोकादिरोगप्रदा**
**तत्केन्द्रस्थदशापहारसमये दुःखं विदेशाटनम् ॥[3]**

**बाधकग्रहदशायां तत्तद्भावस्य हानिरिति वाच्यम् ।** तत्रापि बाधकाधिपतेः ग्रहस्य दशा अथवा बाधकाधिपतिना युक्तस्य ग्रहस्य दशा शोकादिरोगप्रदा भवति । यस्य भावस्य विचारः प्रस्तुतः, तस्य च यद्बाधास्थानं, तत्पतेः अथवा तद्युक्तग्रहस्य दशा तद्भावस्य शोकादिरोगप्रदा इत्यर्थः । बाधास्थानात् केन्द्रे स्थितस्य ग्रहस्य दशान्तर्दशाकाले दुःखं विदेशाटनञ्च भवति ।

- **बाधास्थानतः शत्रुकृताभिचारचिन्तनम्**

बाधास्थानतः नानाविधाः बाधाः चिन्त्यन्ते इति पूर्वमेवोक्तम् । एतासु बाधासु शत्रुकृताभिचारबाधायाः चिन्तनक्रमं प्रश्नमार्गोक्तरीत्या दिङ्मात्रं निरूप्यते । शत्रुस्थानं षष्ठस्थानमिति प्रसिद्धम् । शत्रुस्थानबाधास्थानयोः सम्बन्धेनेयं बाधा विचिन्त्या । उक्तञ्च यथा श्लोके -

**बाधेशस्यारिभे वा रिपुभवनपतेर्बाधकर्क्षे यदि स्यात्**
**योगो वा दर्शनं वा पुनरथ यदि वा तौ मिथः क्षेत्रसंस्थौ ।**
**बाधाधीशारिनाथावपि यदि सहितौ पश्यतोऽन्योन्यतो वा**
**शत्रोस्तत्राभिचारं वदतु बहुतया लक्षणानां स भूयान् ॥[1]**

---

[1] प्रकृतप्रबन्धे **खरेशमान्दिस्थितराशिनाथा** इत्यस्य साक्षात्सम्बन्धाभावात् व्याख्यानं न विहितम् ।

[2] जा. पा. - १८अ. ३०श्लो.

[3] जा. पा. - १८अ. ३०श्लो.


ISSN: 2320-740X

बाधास्थानाधिपः ग्रहः आरूढलग्नात् षष्ठे, आरूढलग्नात् षष्ठाधिपः बाधास्थाने, बाधास्थानाधिप-षष्ठाधिपयोर्युतिः, बाधास्थानषष्ठाधिपयोर्मिथो दृष्टिः, षष्ठस्थाने बाधाधिपस्य दृष्टिः, षष्ठेशस्य बाधास्थाने दृष्टिः, षष्ठेशः बाधेशस्य क्षेत्रे अथवा बाधेशः षष्ठेशस्य क्षेत्रे सति शत्रुकृताभिचारं वदेत् । यदि उक्तेषु सप्तसु योगेषु भूयांसः योगाः युगपत् दृष्टाश्चेत् "अयं प्रबलतरः शत्रुकृताभिचारः" इत्यादिशेत् ।

**महाभिचारो वक्तव्यः शुभश्चेद्बाधकाधिपः ।**
**पापश्चेत् क्षुद्र एष स्यादाभिचार इति द्विधा ॥**

बाधकाधिपः शुभग्रहश्चेत् **महाभिचार** इति नाम्ना तथा पापश्चेत् **क्षुद्राभिचार** इति नाम्ना च व्यवह्रियते । वैरिमारणार्थं दुर्देवतोपासनया क्रियमाणं मारण-विद्वेषणादिकर्म **महाभिचारः** । मन्त्रपुरस्सरं शल्य-कीलक-अस्थि-भस्मादिदुर्वस्तूनां निखननेन क्रियमाणं कर्म **क्षुद्राभिचारः** ।

एवं दैवज्ञाः बाधास्थानानि शास्त्रोक्तदिशा विचिन्तयेयुः । प्रतिकूलतायां सत्यां तन्निवारणतन्त्रं पृच्छकाय समादिशेयुः । सम्प्राप्तानां सकलानां दोषाणां निवृत्तये सन्मार्गमपि प्रदर्शयेयुः ।

**परिशीलितग्रन्थाः सङ्केताक्षराणि च ।**


१. **प्र. मा. – प्रश्नमार्गम् (कन्नडभाषायाम्) -** ज्योतिषरत्नकब्याडिश्रीनिवासआचार्यज्योतिषी, कब्याडिमठम्, पर्कल, उडुपि

२. **प्र. प. – प्रश्नानुष्ठानपद्धतिः –** सि. बि. एच्. पब्लिकेशन्स्, ५१/४, श्रीगणेश, कामराजनगर, वेट्टूर्निमठम्, नागरक्कोयिल्-६२९००३

३. **जा. पा. – जातकपारिजातः -** कपिलेश्वरकृतसंस्कृतव्याख्यानम्, चौखम्बा संस्कृतसंस्थानम्, वाराणासी-२२१००१


**********

[1] प्र. मा. – १५. १३८श्लो. ; प्रश्नानुष्ठानपद्धतौ -

बाधानाथस्य योगेक्षणमरिभवने शत्रुनाथस्य योगो
वीक्षा वा बाधकर्क्षे यदि पुनरुभयोर्व्यत्ययक्षेत्रगत्वम् ।
अन्योन्यं दृष्टियोगौ यदि खलु भवतः शत्रुबाधात्र वाच्या
ज्ञेया दिक्चापि शत्रोः रिपुगृहकथिता वैरिनाथोदिता वा ॥ प्र. प. - १०अ. ४२ श्लो.

# ख्यातिवादः

**डा. श्यामसुन्दरः ए.**
प्राध्यापकः, न्यायविभागः

परमकारुणिकाः तत्त्वदर्शिनो महर्षयः, संसारात्मकदुःखपङ्कनिमग्नानां 'सुखं मे भूयाद् दुःखं मनागपि माभूत्' इति निरन्तरमभिलषमाणान् लोकान् उद्दिधीर्षया मिथ्याज्ञानमेव तेषां दुःखपरम्परां प्रति मूलकारणमिति अधिगम्य तन्निवृत्तिपूर्वकं परमपुरुषार्थभूतस्य आत्यन्तिकदुःखनिवृत्तिरूपस्य नित्यनिरतिशयसुखस्वरूपस्य वा अपवर्गस्याधिगमः परतत्त्वज्ञानैकसाध्य इति तत्प्रतिपादकानि नैकानि शास्त्राणि निर्ममिरे । तान्येव दर्शनानीत्युच्यन्ते । तत्त्वज्ञानं च अनात्मन्यात्मत्वबुद्ध्यादिरूपमिथ्याज्ञाननिवर्तनद्वारा परम्परया निःश्रेयसनिदानं भवति । तदुक्तं दार्शनिकप्रवरैः महर्षिभिः गौतमैः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" (न्या.सू.१-१-१), "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" (न्या.सू.१-१-२) इत्याभ्यां सूत्राभ्याम् ।

नैके दार्शनिकमहर्षयः संसारहेतोः अस्य मिथ्याज्ञानस्य स्वरूपनिर्धारणे स्वीयां विविधां विचारधारां प्रतिपादयामासुः, सैव विचारधारा ख्यातिवादनाम्ना व्यवह्रियते दर्शनप्रपञ्चे । सोऽयं ख्यातिवादः प्राधान्येन आत्मख्यातिवादः, असत्ख्यातिवादः, अख्यातिवादः, अन्यथाख्यातिवादः, अनिर्वचनीयख्यातिवादश्चेति पञ्चधा विभक्तोऽस्ति । तदुक्तम् –

**आत्मख्यातिरसत्ख्यातिः अख्यातिः ख्यातिरन्यथा ।**
**तथानिर्वचनीयख्यातिः इत्येतत्ख्यातिपञ्चकम् ॥** इति ।

तत्र आत्मख्यातिवादः असत्ख्यातिवादश्च बौद्धाभिमतः । तत्रापि वैभाषिक-सौत्रान्तिक-योगाचाराख्याः बौद्धाः आत्मख्यातिवादिनः । बौद्धमते प्रमेयसामान्यस्य विज्ञानस्वरूपत्वात् परमतसिद्धात्मापि विज्ञानस्वरूपमेव । तन्मते विज्ञानमिदं प्रवृत्तिविज्ञानम् आलयविज्ञानञ्चेति द्विविधम् । तत्र 'अयं घटः' इत्यादिज्ञानं प्रवृत्तिविज्ञानम् । 'अहं जानामि' इत्याद्याकारकम् आलयविज्ञानं, तदेवात्मा । तादृशविज्ञानगतस्य रजताद्याकारस्य शुक्त्यादौ आरोपः क्रियते । वैभाषिकबौद्धास्तु बाह्यपदार्थस्य घटपटादेः सत्यत्वं प्रत्यक्षत्वं चाभ्युपगच्छन्ति । सौत्रान्तिकास्तावत् बाह्यस्य सत्यत्वमभ्युपगच्छन्तोऽपि प्रत्यक्षत्वं नाङ्गीकुर्वन्ति । किन्तु अनुमेयत्वमेव । योगाचारबौद्धाः पुनः बाह्यपदार्थस्य सत्यत्वं नैवाङ्गीकुर्वन्ति । अविद्यावासनारोपितं शशशृङ्गादिवत् तुच्छमेव बाह्यं शुक्त्यादिकम् । तत्र


ISSN: 2320-740X

रजताद्याकारस्य आरोपः इत्यभिप्रयन्ति ।

असत्ख्यातिवादिनः माध्यमिकबौद्धाः । तन्मते सर्वं शून्यम् (असत्) एव । असतः एव रजतादेः अन्यत्रारोपः क्रियते । अयमेव निरधिष्ठानभ्रमः इत्युच्यते ।

मीमांसकैकदेशिनः प्राभाकराः (गुरवः) अख्यातिवादिनः । एतेषां मते ज्ञानसामान्यस्यापि प्रमात्मकत्वात् भ्रमात्मकं किञ्चिज्ज्ञानमेव न वर्तते । शुक्त्यादौ 'इदं रजतम्' इति नैयायिकाभिमतभ्रमात्मकविशिष्टज्ञानस्थले गुरुभिः ज्ञानद्वयम् अङ्गीक्रियते । शुक्तौ चक्षुःसन्निकर्षसमनन्तरम् 'इदम्' इत्याकारकं शुक्त्याद्यधिष्ठानस्य प्रत्यक्षात्मकम् एकं ज्ञानम्, अपरं च 'रजतम्' इति रजतस्य स्मरणात्मकं ज्ञानम् । इदं ज्ञानद्वयमपि प्रमात्मकमेव । अत एव 'तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वे सति अनुभवत्वम्' इति नैयायिकाभिमते प्रमालक्षणे भ्रमवारणाय निवेशितस्य सत्यन्तदलस्य वैयर्थ्यमापादयन्ति । तदुक्तं तत्त्वचिन्तामणौ गङ्गेशोपाध्यायैः मीमांसकमतानुवादसन्दर्भे- "ननु सर्वज्ञानानां यथार्थत्वात् प्रमालक्षणे विशेषणव्यावर्त्याप्रसिद्धेः विशेषणवैयर्थ्यम्, अन्यथाख्यातौ मानाभावात्" इति । गुरुमते शुक्तौ रजतार्थिनः प्रवृत्तिस्तावत् शुक्तौ रजतभेदाग्रहात् जायते । तन्मते इष्टभेदाग्रहः प्रवृत्तिं प्रति, अनिष्टभेदाग्रहः निवृत्तिं प्रति च कारणम् । भाट्टमीमांसकास्तु अन्यथाख्यातिमङ्गीकुर्वन्ति । तदुक्तं श्लोकवार्तिके -

**तस्माद् यदन्यथासन्तम् अन्यथा प्रतिपद्यते ।**
**तन्निरालम्बनं ज्ञानम् असदालम्बनं च तत् ॥** इति ।

परन्तु इमे अन्यथाख्यातिं विपरीतख्यातिपदेन व्यवहरन्ति । तदुक्तं शास्त्रदीपिकायां **"सर्वत्र संसर्गमात्रमसदेवावभासते । संसर्गिणस्तु सन्त एव ,सेयं विपरीतख्यातिरित्युच्यते मीमांसकैः"** इति ।

अन्यथाख्यातिवादः नैयायिकाभिमतः । पुरोवर्तिनि रजतत्वाभाववति शुक्त्यादौ 'इदं रजतम्' इत्याकारकं एकं विशिष्टज्ञानम् अन्यथाख्यातिः । सैव भ्रमः, अप्रमा, विपर्ययः, अयथार्थानुभवः इत्यादिशब्देनाप्यभिधीयते । तत्र शुक्त्यंशे समवायेन रजतत्वं, तादात्म्येन रजतं वा आरोप्यते । शुक्तित्वाश्रयस्य शुक्त्यादेः अन्यथा प्रकारान्तरेण रजतत्वेन भानम् अन्यथाख्यातिः । "तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वे सति अनुभवत्वम्" इति तल्लक्षणम् ।

वात्स्यायनमहर्षिस्तु स्वीयभाष्ये मिथ्याज्ञानमनेकप्रकारकं प्रवर्तते । 'आत्मनि तावन्नास्तीति' 'अनात्मन्यात्मेति' 'दुःखे सुखमिति' प्रवदन् तामेव अन्यथाख्यातिं मिथ्याज्ञानपदेन व्यवहरति । जयन्तभट्टस्तु स्वीयन्यायमञ्जर्यां विपरीतख्यातौ त्रयी गतिः रजतं वा अन्यदेशकालमात्रालम्बनं, शुक्तिका वा निगूहितनिजाकारा

सती परिगृहीतरजताकारा च अथवा अन्यदालम्बनमन्यश्च प्रतिभाति..... इत्यादि प्रतिपादयन्तः अन्यथाख्यातिं विपरीतख्यातिपदेन आचष्टे ।

प्राचीननैयायिकाः अयथार्थानुभवे प्रकारविशेष्ययोः सत्वम्, तयोः संसर्गस्यासत्वं चाभ्युपगच्छन्ति । नव्यनैयायिकास्तु भ्रमेऽपि भासमानाः सर्वेऽपि सत्पदार्थाः एव । असत्पदार्थस्य संसर्गतयापि भानं न सम्भवति इत्यामनन्ति । अत गङ्गेशोपाध्यायैः तत्त्वचिन्तामणौ – “सन्मात्रविषयकत्वेऽपि तदभाववति तत्प्रकारकत्वं प्रकारव्यधिकरणविशेष्यताकत्वं वा अयथार्थत्वम्” इत्युक्तम् ।

अनिर्वचनीयख्यातिवादिनो वेदान्तिनः । तन्मते ‘इदं रजतम्’ इत्यादौ पुरोवर्तिरङ्गादौ रजतद्यारोपस्थले आपणस्थव्यावहारिकरजतादेः नारोपः । दूरस्थस्य तस्य इन्द्रियसन्निकर्षाभावात् प्रत्यक्षासम्भवेन आरोपयितुमशक्यत्वात् । किन्तु व्यावहारिकरजतभिन्नम् अविद्यादिवशादुत्पन्नम् अनिर्वचनीयं विलक्षणमेव रजतं रङ्गादौ आरोप्यते । तदेव च तत्र भासते । अत एवेयम् अनिर्वचनीयख्यातिः इत्युच्यते ।

सांख्यास्तु सदसत्ख्यातिवादिनः । तदुक्तं सांख्यसूत्रे कपिलमहर्षिभिः “**सदसत्ख्यातिर्बाधाबाधात्**” इति । पतञ्जलिमहर्षयस्तु स्वीययोगदर्शने “**अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या**” इति सूत्रयन्तः अविद्यापरनाम्नीम् अन्यथाख्यातिमनुमन्यन्ते ।

जैनाः अपि  एतामेव ख्यातिं विपरीतख्यातिपदेन सङ्गिरन्ते । तदुक्तं न्यायकुमुदचन्द्रे जैनग्रन्थे “तदेवं शुक्तिकायां रजतज्ञाने परोपवर्णितख्यात्यन्तराणां विचार्यमाणानाम् उपपत्तेः विपरीतख्यातिरेवात्र प्रतिपत्तव्या” इति ।

**********


ISSN: 2320-740X

# न्यायभाष्यवार्तिकानुसारेण संशयलक्षणविचारः

**डा. नवीनः आर्.**

प्राध्यापकः, न्यायविभागः

अथ पुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् मोक्षस्य संसारदुःखनिवृत्तिरूपत्वात् संसारदुःखानां चाऽसह्यत्वात् मोक्षजनकीभूतं आत्मतत्त्वज्ञानं सम्पादनीयम् । तत्र आत्मानात्मतत्त्वज्ञानविषयत्वेन पदार्थाः महर्षिभिः गौतमैः अनिरूप्यन्त । तदाह स्वीयसूत्रवृन्दे - "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः (१)" इति । इदं च न्यायसूत्रं उद्देशलक्षणपरीक्षाभेदेन प्रणीतम् । तदुक्तं न्यायभाष्ये "त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति" । तत्र प्रमाणप्रमेय...इति सूत्रस्य प्रमाणं प्रमेयमिति नामधेयेन पदार्थमात्राभिधानात् उद्देश्यवचनत्वं याति । उद्देशसूत्रे क्रमेण उद्दिष्टस्य पदार्थस्य तत्त्वव्यवच्छेदको धर्मो लक्षणमित्युच्यते । तत्र प्रमाणप्रमेयेति उद्देशसूत्रे चतुर्थं स्थानं गतो संशयः सूत्रकारैः एवं अलक्ष्यत ।

समानाऽनेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः (२) (१-१-२३) इति। सूत्रेऽस्मिन् सप्त पदानि वर्तन्ते । समानाऽनेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातः च विशेषापेक्षः विमर्शः संशयः इति । तत्र समानानेकधर्मोपपत्तेः इत्यस्य विग्रहः एवम् – समानश्चानेकश्च समानानेकौ , समानानेकौ च तौ धर्मौ च समानानेकधर्मौ तयोः उपपत्तिः (उपलब्धिः) ज्ञानमिति यावत् । समानाऽनेकधर्मोपपत्तिः तस्याः , समानानेकधर्मोपपत्तेः , तथा च समानधर्मज्ञानात् अनेकधर्मज्ञानाच्च इत्यर्थः ।

विप्रतिपत्तेः इत्यस्य विरुद्धप्रतिपत्तितः इत्यर्थः । उपलब्ध्यनुपलब्ध्यव्यवस्थातः इति । विग्रहस्तु इत्थं उपलब्धिश्चानुपलब्धिश्च उपलब्ध्यनुपलब्धी तयोः अव्यवस्था उपलब्ध्यनुपलब्ध्यव्यवस्था तस्याः इति । तथा च उपलब्ध्यववस्थातः, अनुपलब्ध्यव्यवस्थातश्च संशयः इति ।

विशेषापेक्षः इति विशेषस्य अपेक्षा आकाङ्क्षा यस्मिन् सः विशेषापेक्षः इति । विशेषदर्शनं काङ्क्षते संशयः इति यावत् ।

विमर्शः ज्ञानम् इत्यर्थः । तथा च विशेषापेक्षः विमर्शः इति पदद्वयमपि संशयपरिचायकम् । अनेनसूत्रेण समानधर्मोपपत्तिः, अनेकधर्मोपपत्तिः, विप्रतिपत्तिः, उपलब्ध्यव्यवस्था, अनुपलब्ध्यव्यवस्था इति पञ्चानां संशायकत्वं प्रदर्शितम् । तत्र भाष्यवार्तिकानुसारेण विचारः उपस्थाप्यते ।

ISSN: 2320-740X

**१. समानधर्मोपपत्तितः संशयः -**

यथा स्थाणुपुरुषयोः समानं धर्मं आरोहपरिणाहादिरूपं दृष्ट्वा स्थाणुपुरुषयोः विशेषं जिज्ञासमानोऽपि तयोः विशेषं नावधारयति । तादृशं अनवधारणात्मकं ज्ञानं संशयः इति । स च संशयः स्थाणुपुरुषयोः समानधर्मदर्शनजन्य इति सूत्रार्थः । भाष्ये समानधर्मोपपत्तिजन्यसंशयस्य विशेषापेक्षत्वं एवं निरूपितम् । समानयोः धर्ममुपलभे विशेषमन्यतरस्य नोपलभे इत्येषा बुद्धिः अपेक्षा संशयस्य प्रवर्तिका वर्तते, तेन विशेषापेक्षो विमर्शः संशयः" इति । अनेन विशेषदर्शनाभावः संशयजनकः इति प्रकटितम् ।

नव्यास्तु समानधर्मोपपत्तितः इत्यस्य साधारणधर्मज्ञानमित्यर्थः । तथा च स्थाणुपुरुषयोः साधारणधर्मः ऊर्ध्वत्वादिः, तज्ज्ञानेन पुरुषत्वस्थाणुत्वकोट्योः उपस्थितिः, ततः अयं स्थाणुः पुरुषो वा इति संशयः इति ।

**२. अनेकधर्मोपपत्तितः संशयः**

समानजातीयमसमानजातीयं च अनेकं , तस्य धर्माः अनेकधर्माः (अनेकनिष्टधर्माः ) तज्ज्ञानात् संशय इति यावत् । यथा पृथ्वी जलं वा , गुणो वा इति संशयः । अत्र जलं तावत् द्रव्यत्वेन पृथिवी समानजातीयं वर्तते गुणस्तु पृथिवीत्वेन गुणत्वेन वा पृथिव्या असमानजातीय इति जलं गुणश्चेति समानासमानजातीयं च अनेकं जातम् । तद्गतधर्माः द्रव्यत्वगुणत्वादयः । तज्ज्ञानात् पृथ्वी जलं वा गुणो वेति संशयः जायते । यदा तावत् समानासमानजातीयेभ्यः विशेषस्य पृथिवीगतस्य (गन्धवत्वादिरूपस्य) ज्ञानं भवति । तदा निरुक्तसंशयः निवर्तते। निरुक्तसंशयस्य विशेषापेक्षत्वञ्चैवं अन्यतरस्य व्यवस्थापकं धर्मं नोपलभे इति बुद्ध्यपेक्षः संशयः इति ।

**३. विप्रतिपत्तितः संशयः -**

एकस्मिन् अर्थे विरोधिनोः दर्शनम् । विरोधित्वञ्च असहभावः सहनावस्थानमिति यावत् । अस्त्यात्मा इत्येकं दर्शनम्, नास्त्यात्मा इत्यपरं दर्शनम् । न च एकस्मिन् अर्थे आत्मनि सत्त्वं असत्त्वं च सम्भवतः । अत्र च सत्त्वासत्त्वान्यतरसाधकहेतो अदर्शनात्, तत्त्वानवधारणात्मकं ज्ञानं संशयः जायते ।

**४. उपलब्ध्यव्यवस्थातः संशयः**

यथा उपलभ्यमाने जले सत् उत असद् वा इति संशयः । सदप्युदकं तडागादिषु उपलभ्यते, असदपि जलं मरीचिषु (सिकतायां) उपलभ्यते । जलं सदेव प्रतीयते इति नियमो नास्ति इत्याशयः । तथा च क्वचिदुपलभ्यमाने जले सत्त्वासत्त्वयोः अन्यतरस्य साधकप्रमाणानुपलब्धेः जलं सत् असत् वा इति संशयः जायते ।


ISSN: 2320-740X

**५. अनुपलब्ध्यव्यवस्थातः संशयः**

जलं यथा किं सन्नोपलभ्यते उत असन्नोपलभ्यते इति सन्देहः । सदपि अन्तः प्रविष्टं कीलकमूलमुदकं न उपलभ्यते । असदपि अनुत्पन्नं निरुद्धं वा कीलकमूलमुदकं नोपलभ्यते । तथा च सत एव, असत एव वा अनुपलब्धिनियमाभावात् संशयः जायत इत्याशयः । निरुक्तसंशयस्य विशेषापेक्षत्वमेव सत्त्वासत्त्वयोः अन्यतरसाधकप्रमाणं नोपलभे इति बुद्ध्यपेक्षः संशयः इति ।

**समानधर्मोपपत्तेः इत्यत्र न्यायवार्तिककाराणामभिप्रायः**

एतन्मते समानधर्मोपपत्तिजन्यः अनेकधर्मोपपत्तिजन्यः विप्रतिपत्तिजन्यश्च त्रिविध एव संशय भवतीति सूत्रार्थः । तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः समानधर्मादिभ्यः उत्पन्नः विषयस्य विशेषं नावधारयति यः सः संशय इत्युच्यते । न च प्रत्ययस्य अनवधारणात्मकत्वं कथं, यतो हि प्रत्ययस्य एतत्प्रत्ययत्वं यद्विषयावधारणात्मकत्वमिति वाच्यम् । संशयात्मकप्रत्ययस्य विषयस्वरूपानवधारणात्मकत्वविरहेऽपि स्वरूपप्रत्यायनात्मकत्वात् प्रत्ययत्वं सुघटम् ।

समानधर्मोपपत्तिः इत्यत्र समानस्य धर्मस्य उपपत्तिः (ज्ञानम्) इति विग्रहः । समानशब्दः साधारणपरः । स च साधारणः गुणः आहोस्वित् सामान्यमिति । यदि साधारणः गुणः इत्युच्यते तर्हि यत्र तावत् दूरस्थस्थाणुं दृष्ट्वा ऊर्ध्वत्वादिज्ञानेन अयं स्थाणुः न वा इति सन्देहो जायते। तत्र साधारणः ऊर्ध्वत्वमिति वाच्यम्, तन्न सम्भवति । ऊर्ध्वत्वञ्च परिमाणात्मकगुणविशेषः परिमाणस्य एकद्रव्यवृत्तित्वस्वभावात् कथं स्थाणुत्ववद्स्थाणुत्वाभाववदुभयसाधारणः भवतीति । यदि समानशब्दार्थः साधारणं जात्यपरपर्यायं सामान्यमिति उच्यते, तर्हि ऊर्ध्वत्वजातिविशेषस्य परिमाणनिष्ठत्वात् परिमाणे विद्यमानं सामान्यं द्रव्ये संशयं कथमुत्सहते इति। समाधीयते एवम्– साधारणशब्दार्थः न गुणः नापि सामान्यम्, किन्तु सादृश्यम् । यौ अहमर्थौ पूर्वमद्राक्षं तयो: यो धर्म: ऊर्ध्वत्वलक्षण: वर्तते तेन धर्मेण सदृशोऽयं धर्मः उपलभ्यते इति । एतद्विवरणं च न्यायवार्तिक-तात्पर्यटीकायामेवं यादृशं सङ्ख्यापरिमाणप्रचयभेदयोनिपरिमाणं स्थाणुपुरुषयोः तादृशमस्यापि पुरोवर्तिनो द्रव्यस्य परिमाणं तस्मात्सदृशपरिमाणधर्मस्य धर्मिण उत्पत्तिः अध्वसायः इत्यर्थः ।

**********

# मलमासः

**डा. प्रसाद भट्टः**
प्राध्यापकः, ज्यैतिषविभागः

अथ च कालस्य प्राधान्यं मन्वानाः धर्ममर्मज्ञाः मुनयः कालस्य शुभाशुभत्वनिर्देशावसरे निषिद्धकालत्वेन प्राहुः "मलमासः" इति । तत्र मलमासो नाम कः इति चेदुच्यते "असङ्क्रान्तो द्विसङ्क्रान्तो वा चान्द्रो मासः मलमासः" इति । मलो मलिनः, तादृशो मासो मलमासः । स च द्विविधः, अधिमासः क्षयमासश्चेति ।

तन्निरूपणात्पूर्वमेव मासलक्षणं किञ्चिज्ज्ञेयम् । **"पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ"** इत्यमरोक्त्या शुक्लकृष्णपक्षद्वयात्मकः कालविशेषः मासः पौषमाघादिद्वादशसंज्ञकः । मस्यते परिमीयते असावनेन इति, मस्यन्ते परिमीयन्ते तिथयो येन इति वा चान्द्रमासपक्षे व्युत्पत्तिः । किन्तु नवधा प्रोक्तेषु मानेषु चतुर्भिः सौरचान्द्रार्क्षसावनैः व्यवहारः क्रियते इत्यतः तेषु चतुर्षु अपि तत्तन्मानेन मासाः सम्भवन्तीत्यतः व्यवहारः कथमिति पृष्टे **"मासास्तथा च तिथयः तुहिनांशुमानात्"** इत्याह भास्करः । अतः मासगणना चान्द्रेण क्रियते इति सिद्धम् ।

तर्हि चान्द्रमासलक्षणं किमिति जिज्ञासायामाह भास्करः "कालेन येनैति पुनः शशीनं क्रामन् भचक्रं विवरेण भानोः, मासः स चान्द्रः" इति । रविचन्द्रयोः दर्शान्ते युतिः भवति । द्वयोरपि पूर्वा गतिः । तत्र शीघ्रगतिकः चन्द्रः स्वगत्यन्तरेण रवेः अग्रतो याति । एवं गच्छन् यदा चक्रकला (२१६०० षट्शताधिक एकविंशतिसहस्रकलाः) तुल्यमन्तरं याति तदा पुनः रविणा सङ्गमेति । एतयोः कालयोः अन्तराले चान्द्रो मासः । तत्प्रमाणं सावनेन **"अङ्कयमाः कुरामाः पूर्णेषवस्तत्कुदिनप्रमाणम्"** इति । {अर्थात् २९ दिनानि ३१ घटिकाः ५० विघटिकाः} ।

पुनः रविमासे सावनदिनसङ्ख्या ज्ञेया । तदर्थं वर्षमध्ये सावनदिनसङ्ख्या उच्यते - **"पञ्चाङ्गरामास्तिथयः खरामाः सार्धद्विदस्राः कुदिनाद्यमब्दे"** इति । (एकस्मिन् सौरवर्षे ३६५ सावनदिनानि १५ घटिकाः ३० विघटिकाः २२।३० विपलानि भवन्ति ।) अस्य द्वादशभागः एव सावनमानेन एकस्मिन् रविमासे दिनानि भवन्ति । तत्प्रमाणन्तु सावयव-त्रिंशद्दिनानि (३०।२६।१७।३१।५२।३०) ।

अथ तावदधिमासलक्षणमाह भास्करः **"असङ्क्रान्तिमासोऽधिमासः स्फुटः स्यात्"** इति । यस्मिन् चान्द्रे मासे अर्कसङ्क्रान्तिर्नास्ति सः अधिमासः । अर्थादत्र प्रथम-अमान्तात्पूर्वम् एका सङ्क्रान्तिः, द्वितीय-अमान्तात् अनन्तरम् अन्या सङ्क्रान्तिः । मध्यवर्तिनि चान्द्रे मासे सङ्क्रान्तिरेव न भवति । अस्यैव अधिकमासः,


ISSN: 2320-740X

असङ्क्रान्तमासः, मलमासः, मलिम्लुचः, विनामकः, नपुंसकः चेत्यपि नामान्तराणि । अतः रविसङ्क्रान्त्यभावविशिष्टचान्द्रमासत्वं मलमासत्वम् इति स्फुटोभवति ।

एवमधिमासे ज्ञाते तत्सम्भवे कारणं निरूपयामः । सावनमानेन रविचन्द्रमासयोः प्रमाणमुक्तम् । तत्र चान्द्रमासप्रमाणं न्यूनम्, सौरस्य प्रमाणमधिकम् । अत उच्यते "सौरान्मासादैन्दवः स्याल्लघीयान्" । अत एव तेषां चान्द्राणां सङ्ख्या अपि अधिका । इदानीमत्र कियद्भिः सौरैः एकोऽधिमासो जायते इत्यत्र युक्तिरुच्यते । सौरमासकुदिनेभ्यः चान्द्रमासकुदिनानि शोध्यानि । तयोरन्तरं सावयव-चतुःपञ्चाशद्घटिकाः (००।५४।२७।३१।५२।३०) एकस्मिन् सौरमासे रविचन्द्रान्तरं सावनेन भवति । अधुना कल्प्यते । युगादौ प्रथमदर्शान्ते प्रथमचान्द्रमाससमाप्तिः । ततः सावयवाभिः चतुःपञ्चाशद्घटिकाभिः रवेः वृषभसङ्क्रमणम् । तदा प्रथमः सौरमासः सम्पन्नः । ततोऽग्रिमदर्शान्ते द्वितीयचान्द्रमासान्तः । ततः परं सावयवचतुःपञ्चाशद्घटिकाभिः द्विगुणिताभिः रवेः मिथुनसङ्क्रान्तिः । एवमग्रेऽपि त्रिगुणिताभिः चतुर्गुणिताभिः अग्रिमसङ्क्रान्तयः दर्शान्तादूर्ध्वं भवन्ति । एवं सङ्क्रान्तिः अग्रतो गत्वा पुनः दर्शान्तं याति । तदा रविमासाः चान्द्रेभ्यः एकोना भवन्ति । यदा दर्शान्तमतिक्रम्य अग्रतो याति सङ्क्रान्तिः तदा अधिमासस्य सम्भवः । तत्र अनुपातः । यदि अनेन सौरचान्द्रान्तरेण सावनेन सावयवचतुःपञ्चाशद्घटिकारूपेण एकः सौरो मासः तर्हि चान्द्रमासान्तःपातिभिः सावयवैः सावनैः एकोनत्रिंशद्दिनैः कियन्तः इति कृते लब्धिः सौरमासाः सावयव-द्वात्रिंशद्दिनानि (३२।१५।३१।२८।४७) । एतावद्भिः सौरमासैः एकोऽधिमासः लभ्यते इति सिद्धम् ।

**अथ क्षयमासः -**

यस्मिन् चान्द्रमासे रविसङ्क्रमणद्वयं स्यात् असौ मासः क्षयाख्यः स्यात् । तदाह भास्करः "**द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्**" । अर्थात् अमान्तद्वयाभ्यन्तरे रविसङ्क्रान्तिद्वयं सम्भवति यस्मिन् चान्द्रे मासे सः मासः क्षयाख्यः । एकस्मिन् चान्द्रमासे यदि सङ्क्रान्तिद्वयं जातं स मासः क्षयाख्यः कदाचित्कालान्तरे भवति । स च कार्तिकादित्रये (कार्तिक-मार्गशीर्ष-पौषेषु) एव भवति, नान्यत्र । अत्र हेतुरेवं विचारितः । यदा रवेः गतिः एकषष्टिः ६१ कलाः तदा रविः सार्धैकोनत्रिंशता दिनैः राशिं गच्छति । अतः चान्द्रमासादल्पः रविमासः स्यात् । एवं परमाल्पता दिनादिफलरूपेण २९।२०।४० । एतच्च वृश्चिकादित्रये एव । यदा अर्कमासः चान्द्रमासादल्पः चान्द्रमासान्तःपाती भवति तदा एकस्मिन् मासे रविसङ्क्रमणद्वयं जायते । अतः स मासः क्षयाख्यः भवति । अत उक्तं क्षयः कार्तिकादित्रये इति । "क्षयाख्यः कदाचित्" इत्युक्तम् । तर्हि स कालः इत्युक्ते प्राह भास्करः "कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च" इति । क्षयमासः १४१ वर्षैः अथवा १९ वर्षैः एकवारम् आगच्छति । क्षयमासे प्राप्ते पूर्वं परं च मासत्रयान्तरे एकः अधिमासः पतिष्यति । वर्तमाने अत्यासन्नतया क्षयमासः १९६३-६४ तमे इसवीये

वर्षे, १८८६ तमे शालिवाहे शके शोभकृत्संवत्सरे पौषमासः क्षयः आसीत्, पूर्वम् आश्वयुजः अग्रे चैत्रश्च अधिमासः आसीत् ।

क्षये मासे जाते पूर्वं पश्चाच्च अधिमासद्वयं जायते । तत्र प्रथमोऽधिमासः गणितागत एव इति सिद्धान्तसार्वभौमे मुनीश्वर आह । तथा च वचनम् -

**क्षयमासात्पूर्वकालेऽग्रे च मासत्रयावधि ।**
**अधिमासद्वयं तत्र स्यादाद्यो गणितागतः ॥**

अस्य "दर्शान्ततः सङ्क्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्" इति भास्करोक्तिः ज्ञापिका । अमान्तसङ्क्रान्त्योर्मध्ये अधिमासशेषः सदैव तिष्ठति । यदा क्षयमासः जातः तदा प्रथमम् अमान्तः, ततः सङ्क्रान्तिः, ततः परं पुनः सङ्क्रान्तिः, अन्ते पुनः अमान्तः । सत्येवं प्रथम-अमान्तसङ्क्रान्त्योर्मध्ये अत्यल्पः अधिशेषः । सः क्षयमासात्पूर्वमेव आसन्नमासत्रयान्तरे अधिमासः अभूदिति दर्शयति, येन मासोर्वरितः स्वल्पोऽधिशेषो दृश्यते । तथैव प्रथम-अमान्ताद् द्वितीयसङ्क्रान्तिं यावात् मासासन्नः अधिशेषः सूचयति यत् आगामिनि मासत्रयान्तरे एव अधिकमासः पुनरपि पतिष्यति येनायं मासासन्नोऽस्ति । अत एव तस्मिन् वर्षे अधिमासद्वयं सम्भवति ।

"क्षयः कार्तिकादित्रये नान्यतः" इतीदं भास्करवचनं खण्ड्यते कमलाकरेण "क्षयः सर्वचान्द्रेष्वपि" इति । किन्तु वर्तमानरविमन्दोच्चस्थित्या वर्तमाने काले भास्करोक्तिः सर्वथा सङ्गच्छते चेदपि "इदानीन्तनार्थं न शास्त्रं प्रवृत्तम्" इति पुनः आचिक्षेप कमलाकरः । तथापि इतोऽपि बहुकालं यावत् भास्करवचनं न खिलत्वं गच्छतीति वदन् मलमासस्य कृत्याकृत्यविचारः धर्मशास्त्रीयः इति जानन् "प्रतिष्ठादि कर्म त्यजेत् न्यूनाधिमासे" इति रामवचनं स्मरन् "सङ्क्रान्त्युपलक्षितानाम् एव मासत्वम्" इति ज्ञात्वा शुभं कर्म कार्यम् इत्युक्त्वा विरमामि विस्तरात् ।

**********


ISSN: 2320-740X

# समासस्तु चतुर्धेति प्रायोवादः

**विद्वान् अरुणभट्टः**

प्राध्यापकः, व्याकरणविभागः

समसनं समासः, सममासनं समासः इत्यादिव्युत्पत्या अनेकार्थानां पदानामेकार्थीभवनं, पदार्थयोः पदार्थानां वा एकं, समानं, सङ्गतं, संसृष्टं, सम्पृक्तञ्ज भूत्वोपस्थितिर्वा समास इत्युच्यते । एकार्थीभूयोपस्थितिः तस्य विशेषार्थः । एषोऽर्थः प्रथमं पृथक्पृथग्भूत्वा लौकिकविग्रहवाक्ये समुपलभ्यते । पश्चात् यस्य पदस्य येन पदेन सन्निहितत्वं योग्यता च तेन सः तस्य सम्बन्धः सम्प्रयुज्यते, ततः विशिष्टार्थीभूय एकार्थीभावो भवति । अत एव सम्बद्धार्थस्समर्थः, सङ्गतार्थस्समर्थः संसृष्टार्थस्समर्थः[1] इत्यादिभाष्यमपि सम्बद्धार्थस्य सामर्थ्यप्रतिपादकं सङ्गच्छते । अत एव कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्जवृत्तिषु समासोप्यन्तर्भूतः परार्थाभिधायकत्वात् । प्रत्यययार्थान्तर्भाविण परपदार्थान्तर्भाविण वा यो विशिष्टोऽर्थः स परार्थः । स चाभिधीयते एतैः। अत एव तिङन्तस्य न वृत्तित्वम् । तत्रैकार्थीभावानधिकारात् । अन्यथा मृदुपचतीत्यादौ फले मृदुत्वान्वयो न स्यात् । “सविशेषणानां वृत्तिर्न वृत्तस्य विशेषणयोगो न” इति निषेधात् विशेषणाद्यन्वयो न स्यात् । अत एव वृत्तिषु विशिष्टशक्तिस्वीकार आवश्यक एव । विशिष्टशक्तिस्वीकर्तृणामपि प्राचीननवीनानां वैयाकरणानां समासभेदाविषयको मतभेदो वर्तते । स चात्र निरूप्यते ।

**अत्र प्राचीनाः –**

समासोऽव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वभेदेन चर्थुर्विधः । द्विगुकर्मधारययोः तत्पुरुषसमासेऽन्तर्भावः । तत्र पूर्वपदार्थप्रधानोऽव्ययीभावः प्रथमः, उत्तरपदार्थप्रधानस्तत्पुरुषः द्वितीयः, अन्यपदार्थप्रधानो बहुव्रीहिस्तृतीयः, उभयपदार्थप्रधानो द्वन्द्वश्चतुर्थ इति तल्लक्षणमिति च प्राचीनानां मतम् । परं समासचातुर्विध्यमुक्तलक्षणञ्चापि अव्याप्त्यादिदोषग्रस्तमस्तीति कृत्वायं वादस्तु प्रायोवाद एव इति तु नवीनास्सङ्गिरन्ते । तथा हि भूतपूर्वः, दृम्भूः, आयतस्तूः, वागर्थाविव इत्यादिषु सह सुपा[2] इति समासत्वात् अव्ययीभावादिविशेषसंज्ञाभावात् चतुर्विधसमासेषु नान्तर्भवति । पूर्वपदादिलक्षणञ्चापि न निर्दुष्टम् । सूपप्रति, उन्मत्तगङ्गमित्याद्यव्ययीभावसमासे उत्तरपदार्थप्रधान-तत्पुरुषलक्षणस्य अन्यपदार्थप्रधानबहुव्रीहिलक्षणस्य चातिव्याप्तिः । पूर्वपदार्थप्रधानाव्ययीभावलक्षणस्य च

---

[1] समर्थः पदविधिः इति सूत्रभाष्यम् ।

[2] अष्टाध्यायी – २. १. ४

ISSN: 2320-740X

अव्याप्तिः । सुप्रतिनामात्रार्थे[1] इति अन्यपदार्थे च संज्ञायामिति च उत्तरपदार्थे, अन्यपदार्थे च अव्ययीभावसमासविधानात् तत्पुरुषलक्षणबहुव्रीहिलक्षणस्य चातिव्याप्तिः। अतिमालः, अर्धपिप्पली, पूर्वकाय इत्यादौ तत्पुरुषलक्षणमव्याप्तम् । तत्र हि अतिमाल इत्यत्र "अत्यादयः क्रान्ताद्यर्थे[2] इति समासविधानात् पूर्वपदार्थप्राधान्येन तत्पुरुषे लक्षणस्याव्याप्तिः । अव्ययीभावलक्षणस्य चातिव्याप्तिः । अर्धपिप्पलीत्यत्र अर्धं नपुंसकमिति[3] समासविधानेन पूर्वपदार्थप्राधान्यत्वात् अव्ययीभावलक्षणातिव्याप्तिः । तत्पुरुषलक्षणाव्याप्तिश्च । पूर्वकाय इत्यत्रापि पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे[4] इति पूर्वपदार्थे तत्पुरुषविधानादव्याप्त्यतिव्याप्ती भवतः । द्वित्रा इत्यादौ, द्वौ वा त्रयो वेति विग्रहे सङ्ख्याव्ययासन्नेति[5] उभयपदार्थप्राधान्ये बहुव्रीहिविधानात् द्वन्द्वलक्षणस्यातिव्याप्तिः, बहुव्रीहिलक्षणस्याव्याप्तिश्च । द्विदशा इत्यत्रापि द्वन्द्वलक्षणमतिव्याप्तम् । दन्तोष्ठमित्यादिसमाहारद्वन्द्वे समाहारान्यपदार्थप्राधान्यात् बहुव्रीहिलक्षणातिव्याप्तिः, द्वन्द्वलक्षणाव्याप्तिश्च । एवं पूर्वपदार्थप्रधानादिलक्षणानाम्प्रायः उपलभ्यमानत्वेऽति न सर्वत्रान्वेतीति अयं तु प्रायोवाद एव इति नवीनानां सिद्धान्तः । तथापि अव्ययीभावादीनां लक्षणानि कानीति विचार्यमाणे - अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वानि तत्तदधिकारपठितत्वरूपेण दृष्टव्यानि । तथा चाव्ययीभावाधिकारपठितत्वमव्ययीभावत्वं, तत्पुरुषाधिकारपठितत्वात्तत्पुरुषत्वं, बहुव्रीह्यधिकारपठितत्वं बहुव्रीहित्वं, द्वन्द्वशब्दघटितसूत्रविहितत्वं द्वन्द्वमित्येव लक्षणन्द्रष्टव्यमिति भावः । तत्पुरुषाधिकारान्तर्गतत्वादुभयोः द्विगुकर्मधारययोरपि तत्पुरुषत्वं सिद्ध्यति । एवं च चतुर्विधसमासः तल्लक्षणानि च प्रायिकमेविति नवीनानाम्मतम्।

**अत्र नवीनाः –**

अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वभेदेन चर्थुर्विधसमासस्वीकारे दोषमुद्घाटयन्तः दीक्षितप्रभृतिनवीनाः वैयाकरणाः सह सुपा इत्यत्र योगविभागेन भाष्यकारैः व्युप्तादितं षड्विधसमासमामनन्ति । यथा –

**सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।**

**सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः** [6]॥ इति ।

---

[1] अष्टाध्यायी – २. १. ९

[2] वार्तिकम् – १३३५ (अत्यादयः क्रान्ताद्यर्थे द्वितीयता)

[3] अष्टाध्यायी – २. २. २

[4] अष्टाध्यायी – २. २. १

[5] अष्टाध्यायी – २. १. २५

[6] वैयाकरणमतोन्मज्जनकारिका - २८



ISSN: 2320-740X

सुबन्तानां सुबन्तेन, तिङन्तेन, प्रातिपदिकेन, धातुना च सह समासो भवति । तिङन्तं तिङन्तेन सुबन्तेन च समस्यते इति अहत्य षड्भेदाः । सुबन्तानां सुबन्तेन समस्यते, यथा राजपुरुषः इत्यादौ राज्ञः पुरुषः इति पदद्वयमपि सुबन्तम् । सुपां तिङा इति द्वितीयः । पूर्वपदं सुबन्तमुत्तरन्तु तिङन्तम् । यथा पर्यभूषयत्, अनुव्यचलदित्यादौ "गतिमतोदात्तवता तिङापि समासः"[1] इति वार्त्तिकात् समासः । सुबन्तं प्रातिपदिकेन समस्यते इति तृतीयस्समासः । कुम्भकार इत्यादौ "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनादुत्तरपदे सुबुत्पत्तेः पूर्वमेव उपपदमतिङ्[2] इत्यनेन समासः । अन्यथा व्याघ्री इत्यादिर्नसिध्येत् । तथा हि – वि,आङ्पूर्वात् घ्राधातोः "आतश्चोपसर्गे"[3] इति सूत्रेण कप्रत्यये, आतः लोपे निष्पन्नेन घ्रशब्देनाङो गति समासे, तेन वेः समासे च ततो जातेरस्त्रीविषयादिति[4] स्त्रियां ङीषि व्याघ्रीति रूपं सिध्यति । उत्तरपदे सुबुत्पत्तेः परमेव इति चेत् स्वार्थद्रव्यलिङ्गसंख्याकारकाणां क्रमिकोत्पत्त्या सुबुत्पत्तिप्रयोजककारकसंज्ञायाः पूर्वमेव लिङ्गोपस्थित्या घ्रशब्दस्य जातित्वाभावान्ङीषोऽभावेन, अदन्तत्वेन टापि, ततः सुपि तेन समासे, इदानीमदन्तत्वाभावाज्जातिलक्षणङीषोऽप्रवृत्तौ व्याघ्रीत्यादिकमिष्टं न सिध्यन्ति । सुपां धातुना इति चतुर्थः । उत्तरपदं धातुमात्रम् । यथा कटप्रूः, आयतस्तूः इत्यादौ "वचिप्रच्छ्यायतस्तुकटप्रुयुजुश्रीणां दीर्घश्च" इति वार्त्तिकोक्तनिपातनात् सुपां धातुना समासः । तिङां तिङा समासः इति पञ्चमम् । पिबतखादता, पचतभृज्यता इत्यादौ "आख्यातमाख्यातेन क्रियासातत्ये"[5] इति मयूरव्यंसकादित्यात् समासः । तिङां सुबन्तेन समासो यथा जहिस्तम्बः, जहिजोडः इत्यादिः । "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति"[6] इति मयूरव्यंसकाद्यन्तगंणसूत्रात् समासः । एवं समासाः षड्विधाः ।

**उपसंहारः -**

प्राचीनैरव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वभेदेन चतुर्विधोक्तसमासभेदान् तल्लक्षणञ्च दूषयद्भिर्दीक्षितैः सुपां सुपा, तिङा, नाम्ना, धातुना, तथा तिङां तिङा, सुबन्तेन च समास इति भाष्यादिसिद्धषट्प्रकाराः स्वग्रन्थेषु निरूपिताः । युक्तियुक्तपथानुसारिभिः कौण्डभट्टप्रभृतिभिः अयमेव मार्गः आदृतः । एतत्सर्वमाकलय्य

---

[1] वार्तिकम्

[2] अष्टाध्यायी – २. २. १९

[3] अष्टाध्यायी - ३.१.१३६

[4] जातेरस्त्रीविषयादयोपधात् । अष्टाध्यायी - ४.१.६३

[5] मयूरव्यंसकादयश्च इति मयूरव्यंसकाद्यन्तर्गणसूत्रम् ।

[6] मयूरव्यंसकाद्यन्तर्गणसूत्रम् ।

सुखबोधिनीकारेण श्रीनीलकण्ठवाजपेयिना स्वग्रन्थे सुखबोधिन्यां सविस्तरं व्याख्यानं व्यधायि ॥

**यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे नहि ।**

**यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि ॥**

**अनुशीलितग्रन्थाः -**


- अष्टाध्यायी – ईश्वरचन्द्रः, चौखम्बाविद्याभवन २००४
- वैयाकरणसिद्धान्तकौमुदी – मोतीलाल बनारसीदास, नई दिल्ली २००४
- व्याकरणमहाभाष्यम् – चौकाम्बा संस्कृत प्रकाशन, वारानसी  २००७
- परिभाशेन्दुशेखरः - विश्वनाथ मिश्रः, चौखम्बासुरभारती, १९९९
- वैयाकरणभूषणसारः – चन्द्रिकाप्रसादद्विवेदी, चौखम्बा संस्कृत प्रकाशन, २००१
- लघुशब्देन्दुशेखरः - ब्रह्मदत्तद्विवेदी, सुशील प्रकाशन, १९८८


**********



ISSN: 2320-740X

# भूकम्पविज्ञानम्

**डा. प्रदीपशर्मा**

प्राध्यापक:, ज्यौतिषविभाग:

भू: अन्तरिक्षम्, भवतेः इति निघन्टुमतेन । 'भू' इत्यस्मात् क्विप्प्रत्यये कृते सति भवत्यस्मात् वृष्ट्यादिरित्यनेनान्तरिक्षगतपदार्थानां कम्पनं विचलनं स्थानभ्रंशनमेव भूकम्पपदाज्ज्ञायते । अथापि भू: पृथिवी भूसत्तायामिति । भवन्त्यस्मादखिलपदार्थजातानि इत्यनेन 'भू:' । भुव:= पृथिव्या:, कम्प:= आन्दोलनमिति भूकम्प उच्यते, तत्र पौराणिकैः पण्डितैराधारपरम्पराधारणावद्भिः कच्छप- वासुकि- दिग्गजान्यतमभूमिधारक-शरीरपरिवर्तनेन भूकम्प उत्पद्यते, अथवा समुद्रान्तर्गत-बृहज्जलचरजीवसञ्चारोपद्रवेण, अथवा पर्वतविदीर्णेन, कस्यचिन्मतेऽनिलानलेन्द्रवरुणप्रकोपेण, कस्यचित्खगोलविज्ञानघनस्य जनस्य मते ग्रहसंयोगवियोगेन, एवं पदार्थविज्ञानवतः कस्यचिन्मते भूगोलान्तर्गतगन्धक-चुम्बक-लोह-धातुपदार्था-नामाकस्मिकसंयोगजनितविषमयबाष्पनिःसरणात् सहसा भूविदारणम्, ततो महाञ्च्छब्दः, तदुभयतः कम्पश्च जायते ।*[1] कस्यचिन्मते

*[1] आधुनिकभूवैज्ञानिकानां मतानुसारम् - What causes earthquakes and where do they happen? The earth has four major layers: the inner core, outer core, mantle and crust. The crust and the top of the mantle make up a thin skin on the surface of our planet. But this skin is not all in one piece – it is made up of many pieces like a puzzle covering the surface of the earth. Not only that, but these puzzle pieces keep slowly moving around, sliding past one another and bumping into each other. We call these puzzle pieces tectonic plates, and the edges of the plates are called the plate boundaries. The plate boundaries are made up of many faults, and most of the earthquakes around the world occur on these faults. Since the edges of the plates are rough, they get stuck while the rest of the plate keeps moving. Finally, when the plate has moved far enough, the edges unstick on one of the faults and there is an earthquake.




The tectonic plates divide the Earth's crust into distinct "plates" that are always slowly moving. Earthquakes are concentrated along these plate boundaries. (Lisa Wald, U.S. Geological Survey).

ISSN: 2320-740X

भूस्थचराचरजीवदुरदृष्टदोषेण भूकम्पो भवति । तथोक्तं बृहत्संहितायां वराहमिहिरेण –

**क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम् ।**
**भूभारखिन्नदिग्गजविश्रामसमुद्भवञ्चान्ये ॥**
**अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्यन्ये ।**
**केचित्त्वदृष्टकारितनिमिदमन्ये प्राहुराचार्याः ॥**

वसिष्ठादयो महर्षयः कथयन्ति यद् वायूनां परस्परं संघातजन्येनान्येन वायुना भुवि विघातेन भूकम्पो भवति । तत्रोक्तं यत् –

**यदा तु बलवान्वायुरन्तरिक्षानिलाहतः**
**पतत्याशु स निर्घातो भवेदनिलसम्भवः ॥**
**तस्य योगान्निपततश्चलत्यन्याहता क्षितिः**
**सोऽभिघातसमुत्थः स्यात् स निर्घातमहीचलः ॥**

केचिद्वृद्धगर्गादयः आचार्याः वदन्ति यत् – इदं भूकम्पम् अदृष्टकारितम् । अदृष्टशब्देन धर्माधर्मौ बुद्ध्येते, ताभ्यां कारितं कृतम् इत्यर्थः । धर्मेण अभिवृद्धेन प्रजानां शुभसूचनाय शुभं भूमिकम्पः उत्पद्यते । अधर्मेणाभिवृद्धेन प्रजानाम् अशुभसूचनाय अशुभं भूमिकम्पः उत्पद्यते ।

**प्रजा धर्मरता यत्र तत्र कम्पं शुभं वदेत् ।**
**जनानां श्रेयसे नित्यं विसृजन्ति सुरोत्तमाः ॥**
**विपरीतस्थिता यत्र जनास्तत्राशुभं तथा ।**
**विसृजन्ति प्रजानां तु दुःखशोकाभिवृद्धये ॥**

पराशरादयः मुनयः उक्तवन्तः यत् -

**गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च ।**
**आकम्पिता पितामहमहामरसदसि सव्रीडम् ॥**
**भगवन्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा ।**
**क्रियतेऽचलैश्चलद्भिः शक्ताऽहं नास्य खेदस्य ॥**
**तस्याः सगद्गदगिरं किञ्चित् स्फुरिताधरं विनतमीषत् ।**
**साश्रुविलोचनमाननमालोक्य पितामहः प्राह ॥**
**मन्युं हरेन्द्र धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय ।**


ISSN: 2320-740X

**शक्रः कृतमित्युक्त्वा मा भैरिति वसुमतीमाह ॥**

**किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम् ।**

**प्राग् द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति" ॥**

अतः परं वायुदहनेन्द्रवारुणमण्डललक्षणानि तत्फलानि च सन्ति, तानि अग्रे प्रदर्श्यन्ते ।

अथ कमलाकरदैवज्ञेन भूकम्पस्य निदानमुक्तम् । यथा –

**"पाषाणैः कठिना भूमिर्यत्र तत्र कुतो बलात् ।**

**बाष्पनिःसरणात् कम्पः शब्दोऽपि सततं भुवि ॥**

**अत एवान्यभूमौ तु विनाऽऽयासात् कुतः किल ।**

**बाष्पनिःसरणे तत्र कदाचिद्रिष्टदोऽपि सः ॥**

**भूमिकम्पः पर्वतादौ सर्वदैवेति निर्णयः" ॥**

अस्यार्थस्तु– यत्र प्रदेशे भूमिः पाषाणैः प्रस्तरैः कठिना कठोराऽस्ति तत्र कुतः= भूमध्यात्, बलात्= प्रयासबहुल्यवेगात्, बाष्पनिःसरणात्= भूगोलान्तर्गत-विषम-पदार्थ-संयोगजनितोष्मानिलनिर्गमनात्, भूमेः कम्पः= स्पन्दः, तथा शब्दः= यानचालननिनादवद्ध्वनिश्च भुवि सततं भवति ।

अत एव अन्यभूमौ = मृदुमृत्तिकात्मकप्रदेशे, आयासाद्विना, सहजेनैव कुतः= भूबिम्बान्तर्गतप्रदेशात्, बाष्पनिःसरणे कदाचिद्रिष्टदोऽपि भूकम्पो भवति । पर्वतादौ कठिनतरप्रदेशे सर्वदा बहुधा भूकम्पो भवतीति निर्णयो विज्ञेयः ।

अर्थाद्दिनपूर्वार्धभागे वायुर्भूमिं कम्पयिष्यति, दिनस्यापरार्धभागेऽग्निः । रात्रेः पूर्वार्धे इन्द्रः । रात्रेः परार्धेः वरुणो भूमिं कम्पयिष्यतीति वेलामण्डलानि । अथ नक्षत्रमण्डलानि, तल्लक्षणानि, तत्फलानि, तत्फालप्राप्तिसमयावधयश्च चक्रद्वारा प्रदर्श्यन्ते –

| **मण्डल नामानि** | **वायव्यमण्डलम्** | **आग्नेयमण्डलम्** | **ऐन्द्रमण्डलम्** | **वारुणमण्डलम्** |
|---|---|---|---|---|
| नक्षत्राणि | उ.फा. ,ह. चि. स्वा. पुन. मृग. अश्विनी | पुष्य, कृ, वि. भ. मघा पू.फा. पू.भा. | अभि. श्रव. घनिष्ठा रो. ज्येष्ठा, उत्तराषाढा, अनु. | रेव. पूर्वा. आर्द्रा, आश्लेषा, मूल, उत्तरभाद्र. शतभिषा |
| वेला | दिनपूर्वार्धकालः | दिनपरार्धकालः | रात्रिपूर्वार्धम् | रात्रिपरार्धभागः |
| लक्षणानि | आकाशे धूमव्याप्तिः, वृक्षनाशः, प्रचण्डवायुवहनम्, | तारोल्कापातः, दिग्दाहः, प्रचण्डसूर्यः, वेगेनवायुवहनम् | पर्वताकारा घोरराविणो मेघा विद्युद्वन्तः पूर्णं | नीलकमलवर्णा मधुरराविणो |

| | | | | |
|---|---|---|---|---|
| | रविकिरणमान्द्यम् | | वर्षन्ति | मेघाः सूक्ष्मधारां वर्षन्ति |
| फलानि | सौराष्ट्र-कुरु-मगध-दशार्ण-मत्स्यदेशेषु पीडारोगादिः। सस्यजलवनौषधिनाशः,शोफश्वासोन्मादज्वर-कासरोगसम्भवः, वणिग्जातिपीडासम्भवः। | अश्मकाङ्गवाह्लीकतङ्गण-कलिङ्गबङ्गद्रविडशवरदेशेषु पीडासम्भवः, मेघनाशः, जलाशयशोषणम्, राजभयम्, दद्रुकण्डूविचर्चिकापाण्डु-रोगाः। | काशि-युगन्धरपौरव किरातकीराभिसार-हल-मद्रार्बुद-सौराष्ट्रमालवदेशेषु पीडा, प्रसिद्धवंशीयजननाशः, अतिसार-गलग्रहमुखरोगछर्दिप्रचारः। | गोनर्द्द-चेदि-कुकुर-किरात-काश्मीर-सैन्धव-वैदेह-देशेषु पीडासम्भवः, समुद्रसरोवराश्रित-जननाशः, पूर्णवृष्टिः, द्वेषराहित्यम्। |
| फलाप्त्यवधिकालः | मासद्वयावधिफलम्,वा सप्ताहावधिः,वा षण्मासान्तः। | सार्धमासावधिर्वासप्ताहावधिः वा षण्मासान्तः। | सप्ताहावधिर्वा षण्मासान्तः। | षण्मासावधिर्वा सप्ताहावधिः। |

अत्रायं विशेषः – ऐन्द्रमण्डलजनितो भूकम्पो वायुवेलाजनितं फलं नाशयति । एवं वायुमण्डलजो भूकम्पः ऐन्द्रवेलाजनितं फलं नाशयति । तथा च वारुणमण्डलजो भूकम्प आग्नेयवेलाजनितं फलं नाशयति । एवमाग्नेयमण्डलजः कम्पो वारुणवेलाजनितं फलं नाशयति । तथा ऐन्द्रमण्डले इन्द्रवेलायां यो भूकम्पः स ऐन्द्रमण्डलफलं यथार्थं ददाति । एवं वायव्यमण्डले वायव्यवेलायां च यो भूकम्पः स यथार्थवायव्यमण्डलफलं ददाति । एवमाग्नेयमण्डलेऽग्निवेलायां च यो भूकम्पः स यथार्थमाग्नेयमण्डलफलं ददाति । अथाग्नेयमण्डले वायुवेलायां यदि भूकम्पस्तदा प्रख्यातभूपमरणम्, व्यसनम्, दुर्भिक्षम्, मरकम्, अवर्षणम्, लोकोपतापं च करोति । इदमेव फलं वायव्यमण्डले, आग्नेयवेलायां च विज्ञेयम् ।

तथा वारुणमण्डले ऐन्द्रवेलायां च ऐन्द्रमण्डले वारुणवेलायां भूकम्पस्तदा सुभिक्षम्, कल्याणम्, वृष्टिः, चित्ततोषः, गवीनामतिदुग्धम्, राजानो निवृत्तवैरभावाः च भवन्तीति ।

एवं वायव्यमण्डले यदि भूकम्पस्तदा शतद्वययोजनं यावद्भुवं चालयति । यदि आग्नेयमण्डले भूकम्पस्तदा दशाधिकं योजनशतं चालयति । अथ वारुणमण्डले भूकम्पे जातेऽशीत्यधिकयोजशतं प्रदेशं चालयति । तथेन्द्रमण्डले यदि भूकम्पस्तदा षष्टितोऽधिकं योजनाशतं चालयति । **तदुक्तं काश्यपेन** –

**वायव्ये मण्डले नित्यं योजनानां शतद्वयम् ।**
**दशाधिकमथाग्नेय ऐन्द्रे षष्ठ्याधिकं शतम् ॥**
**शतं चाशीतिसंयुक्तं वारुणे मण्डले चलेत् ॥** इति ।


ISSN: 2320-740X

अथैकदा भूकम्पे जाते तद्दिनात् परं पुनर्वक्ष्यमाणसमये भूकम्पः स्यात्तदा प्रधानभूपनाशो भवति । तदुक्तं वराहेण –

**त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च ।**

**यदि भवति भूमिकम्पः प्रधाननृपनाशनो भवति ॥**

अथ यदा षडग्रहयोगस्तदाऽपि भूकम्पसम्भावना भवति, तत्र यस्मिन्नक्षत्रे योगस्तन्नक्षत्रं यन्मण्डलेऽस्ति, तदनुसारेण तद्देशे फलं विज्ञेयम् । क्वचित्फलितग्रन्थे भूकम्पयोग एवं दृश्यते – 'महीसुतात् पञ्चमगो दिनेशः - .........भूकम्पयोगं मुनयो वदन्ति' ॥ योगोऽयं यस्मिन् मण्डले, तदनुसारिदेशे तत्फलं तत्सम्भवश्च बोध्यः ।

**भूकम्पस्य पूर्वाभासाः –**

भूकम्पस्य पूर्वाभासान् सम्यक् परीक्ष्य तस्यादेशं सहजतया दातुं शक्यते । एतदर्थं ज्योतिषे संहिताग्रन्थेषु बहवो विधयो विस्तरेण विवेचिताः सन्ति । यथा -

**पशुपक्षिवनस्पतीनां कलरवक्रियाव्यवहारादिभिः भूकम्पस्य पूर्वाभासः**

पशुपक्षिवनस्पतयः अत्यधिकं संवेदनशीला भवन्ति । अत एव भारतीया मनीषा तदाधारेण भाविफलकथनाय सततं प्रयतमाना विद्यते । वसन्तराजे उक्तमस्ति यत् –

**नैऋत्यभागे च यदि प्रभाते करोति काकः सहसा विरावः ।**

**क्रूरं ततः कर्म किमप्युपैति द्यूतागमे मध्यमिका च सिद्धिः ॥**

भावार्थोऽयं विद्यते यद्यदि प्रातः काले नैऋत्यभागे काकः काकवर्गो वा सहसा उच्चैर्विरावं करोति तदा शीघ्रमेवाकस्मिकघटना भवति ।

अकारणमेव काकाः उच्चैः रुक्षविरावं कुर्वन्ति चेदत्रघनप्रजाया विनाशो भवति । रात्रावेवं विरावेण प्रजानाशो विचार्यते । परस्परं चञ्चुःप्रहारपूर्वकविरावेण संघर्षेण राज्यनाशः कल्प्यते । पक्षानितस्ततः कृत्वा काका विरावं कुर्वन्ति चेत्प्रलयो भूकम्पो वा निश्चयेन भवति । क्रोधेन परस्परं कलहेन विरावं कुर्वन्ति चेद्भूकम्पे बहुसंख्यजनानां मरणं भवति ।

काकमैथुनस्य श्वेतकाकयोर्दर्शनाच्च महदापत्तीनामागमनं भवति । काकस्य विरावः "क्रां क्रां क्रौं क्रौं" इति द्विवारं भवति चेन्मृत्युसूचकः । 'क्रीं क्रीं' सदृशो विरावः इष्टार्थनाशकः । 'का का' विरावो विनाशसूचकः । "क्रिं क्रिं क्रौं कौं" विरावं वारं वारमुच्चैः करोति चेन्मानवसंहारसूचको भवति ।

एवमेव श्वानक्रियाभिरपि भूकम्पाभासाः परिज्ञायन्ते । एकाधिकाः श्वानाः सूर्योदये ग्राममध्ये विलपन्ति

चेद्ग्रामे महदापत्तिरायाति । प्रदोषे अग्निकोणाभिमुखं श्वाना विलपन्ति चेत्प्रचण्डवायुपूर्वकं प्राकृतिकापदः प्रकोपाश्च भवन्ति । ग्रामे विलपन्तो ग्रामाद्बहिर्गत्वोच्चैः श्वाना विलपन्ति चेद्ग्रामे मृत्योस्तावण्डवो भवति । एषः भूकम्पजनितः एव । श्वानाः उच्चस्वरेण 'खं खं' विरावं वारं वारं कुर्वन्ति मण्डले वा धावन्ति चेद्भूकम्पे बहुसंख्यजनानां मरणं कथनीयम् । उक्तमपि बृहत्संहितायाम् –

**खं खेति चोच्चैश्च मुहुर्मुहुर्ये रुदन्ति दण्डैरिव ताड्यमानाः ।**
**श्वानोऽभिधावन्ति च मण्डलेन ते शून्यतां मृत्युभयञ्च कुर्युः ॥**

इतोऽपि शिवायाः रोदनेन श्वानफलवद्विचार्यः ।

सहसा सर्वे हि पशुपक्षिणो व्याकुलाः भवन्ति, रूक्षस्वरेण विरावं कुर्वन्ति रुदन्ति च तर्हि तत्कालासत्रमेव महदापत्तीनां भूकम्पानां प्राकृतिकप्रकोपानाञ्च सम्भावना भवति ।

स्वरसंहितादिग्रन्थेषु कूर्मचक्रवेधाद्भूकम्पस्यानुमानं विधीयते । तत्र कृत्तिकादिनक्षत्रत्रये क्रूरग्रहवेधाद्येषां ग्रामनगरराष्ट्राणां नाम्नः प्रथमाक्षरं स्वरवर्णादिभिर्विद्धं भवति तदानीं तेषां नाशो भवति ।

सूर्यनक्षत्राद्द्वाविंशतितमं नक्षत्रं कम्पसंज्ञकं भवति । अतस्तेन सह क्रूरग्रहवेधेन भूकम्पः सम्भवति । तत्रापि स्वभोगकाल एवैतस्य सम्भावना भवति । कम्पसंज्ञकनक्षत्रस्येश्वरः शनैश्चरो भवति । अतः शनैश्चरस्याप्यत्र योगो निश्चयेन भूकम्पकारको भवति ।

बृहत्संहितायां कूर्मचक्रे कृत्तिकादिनक्षत्रत्रयप्रभेदेन नवभाग-विभागाधारेण मध्यादिदेशानां नामानि विलिख्य तत् तद्देशेषु नक्षत्रादिवेधाधारेण भूकम्पस्य सम्भावना विमर्शिता विद्यते ।

कूर्मचक्रस्य पञ्चभेदाः सन्ति– पृथ्वीकूर्म- देशकूर्म- नगरकूर्म- क्षेत्रकूर्म- गृहकूर्मसंज्ञकाः । एतेषामाधारेण भूकम्पस्य व्यष्टिसमष्टिसंहारकस्वरूपस्य विमर्शो विधीयते । अत्रापि शनैश्चरस्य क्रूरवेधस्थित्या भूकम्पस्य प्रलयतुल्यविघातानां महती सम्भावना सुविज्ञाता भवति ।*[1]

*[1] आधुनिकभूवैज्ञानिकानां मतानुसारम् - How can scientists tell where the earthquake happened?

Seismograms come in handy for locating earthquakes too, and being able to see the P wave and the S wave is important. You learned how P & S waves each shake the ground in different ways as they travel through it. P waves are also faster than S waves, and this fact is what allows us to tell where an earthquake was. To understand how this works, let's compare P and S waves to lightning and thunder. Light travels faster than sound, so during a thunderstorm you will first see the lightning and then you will hear the thunder. If you are close to the lightning, the thunder will boom right after the lightning, but if you are far away from the lightning, you can count several seconds before you hear the thunder. The further you are from the storm, the longer it will take between the lightning and the thunder.


ISSN: 2320-740X

संघट्टचक्रेण युद्धेन सह भूकम्पस्य ज्ञानमपि विधीयते । अश्विन्यादिसप्तविंशतितारकैर्नवभिर्वेधैः तिर्यगाकृतिकमेकं त्रिकोणं विलिख्य तत्र ग्रहान् संस्थाप्य भूकम्पो विमृश्यते । अत्रापि शनैश्चरस्य योगो विधातको विध्वंसकरश्च भवति । नगरस्य राष्ट्रस्य वा नाम्नः नक्षत्रे संघट्टके वेधो भवेत्तदैषा स्थितिः समायाति । सूर्येन्दुमन्दराहूणामेकनक्षत्रगतवेधेन तद्दिनं दुर्दिनं शोककरं भयङ्करञ्च भवति । तद्दिने जनहानिर्निश्चयेन जायते ।

अनेन प्रकारेण ज्योतिषशास्त्रेषु भूकम्पविज्ञानं विस्तरेण विमर्शितमस्ति ।

**********

---

P waves are like the lightning, and S waves are like the thunder. The P waves travel faster and shake the ground where you are first. Then the S waves follow and shake the ground also. If you are close to the earthquake, the P and S wave will come one right after the other, but if you are far away, there will be more time between the two.







P Waves alternately compress and stretch the crustal material parallel to the direction they are propagating. S Waves cause the crustal material to move back and forth perpendicular to the direction they are travelling. (Public domain.)
By looking at the amount of time between the P and S wave on a seismogram recorded on a seismograph, scientists can tell how far away the earthquake was from that location. However, they can't tell in what direction from the seismograph the earthquake was, only how far away it was. If they draw a circle on a map around the station where the radius of the circle is the determined distance to the earthquake, they know the earthquake lies somewhere on the circle. But where?
Scientists then use a method called triangulation to determine exactly where the earthquake was (see image below). It is called triangulation because a triangle has three sides, and it takes three seismographs to locate an earthquake. If you draw a circle on a map around three different seismographs where the radius of each is the distance from that station to the earthquake, the intersection of those three circles is the epicenter! (Lisa Wald, U.S. Geological Survey).

# रघुवंशमहाकाव्ये संस्काराणाम् उल्लेखः

**डा. श्रीकरः वि.**
प्राध्यापकः, साहित्यविभागः

संस्क्रियत इति संस्कारः । महर्षिजैमिनिप्रणीतस्य सूत्रस्य व्याख्यावसरे भाष्ये श्रीशबरस्वामिपादैः संस्कारशब्दस्य निर्वचनं दीयते यथा-**"संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य"** इति । विवाहात् अन्त्येष्टिपर्यन्तं विद्यामानसंस्काराणाम् आवश्यकाता वर्तत एव येन इह लोके परलोके च श्रेयः प्राप्यते । जीवने उन्नत्यै, पवित्रतायै, गुणानां विकासर्थं च संस्काराः परमावश्यकाः भवन्ति । महाकविकालिदासः स्वीयरघुवंशमहाकाव्ये संस्काराणां महत्त्वं बोधयितुमेव संस्काराणां वर्णनं पात्रमुखेन इत्थं करोति । यथा-

**दौहृदसंस्कारः**

गर्भावस्थायां सर्वदा पत्न्याः प्रसन्नाताविषये पत्युः कर्तव्यं वर्णयति कालिदासः रघुवंशे । नारी साधारणतः लज्जाशीला । अतः सुदक्षिणा गर्भावस्थायां लज्जवशात् किमपि अभीष्टं न प्रकटितवती,तस्याः कृते केषु केषु अभिलाषः वर्तत इति प्रतिक्षणं सुदक्षिणायाः सखीं सादरं राजा दिलीपः पृच्छति स्म । यथा दिलीपः कथयति-

**न मे ह्रिया शंसति किञ्चिदीप्सितं स्पृहावती वस्तुषु केषु मागधी ।**
**इति स्म पृच्छँत्यनुवेलमादृतः प्रियासखीरुत्तरकोसलेश्वरः ॥ ३.५ ॥** इति ।

द्विहृदयां नारीं दौहृदिनीमाचक्षते, तदभिलषितं दद्यात्, इति सुश्रुतवचनानुसारेण गर्भावस्थायां सुदक्षिणा यत् किमपि वस्तु अभिलषति तत् सर्वं राजा तस्याः सखीमुखात् ज्ञात्वा स्वर्गमपि तत्पुरः स्थापितवान् । राजा दिलीपः तस्य अन्तसत्त्वां पत्नीं सुदक्षिणाम् अन्तर्गर्भां पृथ्वीमिव, स्वमध्यस्थितवह्नियुतां शमिमिव, गुप्तजलयुक्तां सरस्वतीं नदीमिव अमन्यत । यथा-

**निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम् ।**
**नदीमिवान्तः सलिलां सरस्वतीं नृपः ससत्त्वां महिषीमन्यत ॥ ३.६ ॥**

**पुंसवनसंस्कारः**

राजा दिलीपः स्ववैभवानुसारं स्वप्रियास्नेहानुकूलं दिगन्तेषु सम्पदः धृतेः **"पुत्रो मे भविष्यति"** इति सन्तोषानुरूपं पुंसवनादिगर्भसंस्कारं कृतवान् इति एकेन श्लोकेन ज्ञायते यथा-


ISSN: 2320-740X

**प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगन्तसम्पदाम् ।**
**यथाक्रमं पुंसवनादिकाः क्रिया धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥** इति ।

**जातकर्मसंस्कारः**

राजा दिलीपः पुत्रहीनहेतोः पितृऋणात् मुक्तः भवितुं न शक्यते । अतः रघोः जन्मनः अनन्तरं पितृऋणात् मुक्तः अभवत् । अत्र रघोः जातकर्मसंस्कारस्य सूचना प्राप्यते । यथा तपस्वी वसिष्ठः दिलीपस्य सूनोः वृत्तान्तं श्रुत्वा तपोवनात् आगत्य सः तेजस्वीबालकस्य जातकर्मसंस्कारमकरोत् । यथा-

**स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते । ३.१५ ॥**

**नामकरणसंस्कारः**

जातकर्मानन्तरं नामकरणसंस्कारस्य वर्णना प्राप्यते । अर्थज्ञो राजा दिलीपः बालकः शास्त्रस्य पारं गमिष्यति तथा शत्रूणां विनाशने समर्थः भविष्यतीति विचार्य लंघते इति रघुरिति अन्वर्थं नाम चकार । अतः

**श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।**
**अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम् ॥ ३. २१ ॥**

**चूडाकरणसंस्कारः**

रघोः चूडाकरणसंस्कारः **"काकपक्षः"** इति पदप्रयोगेण ज्ञायते । बालानां तु शिखा प्रोक्ता **"काकपक्षः शिखण्डकः"** इति हलायुधवचनात् । रघोः स्निग्धैः मन्त्रिपुत्रैः सह लिपिशिक्षणमकरोत् दिलीपः । विद्यारम्भसंस्कारेण शब्दसागरे अयं रघुः अन्तः प्रविष्टः अभूत् यथा मकरः सागरस्य अन्तः प्रविशति । अनेन विद्यारम्भासंस्कारस्य महत्त्वं प्रत्यपादि कालिदासेन । यथा-

**स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।**
**लिपेर्यथावद्ग्रहणेन वाङ्ग्मयं नदीमुखेनेव समुद्रमाविशत् ॥२५॥**

एवं उपनयनसंस्कारोऽपि रघोः वर्णितः कविना ।

**उपनयनसंस्कारः**

**अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।**
**अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥ ३.२६ ॥**

अत्र **"क्रिया हि वस्तूपहिता प्रसीदति"** इत्यनेन अस्य रघोः शिक्षाग्रहणयोग्यता प्रदर्शिता ।

**विवाहसंस्कारः**

**“अथास्य गोदानविधेरनन्तरं विवाहदीक्षां निरवर्तयद् गुरुः”** अनेन केशान्तख्यं संस्कारं प्राप्य रघोः विवाहसंस्कारः अभवतिति द्रष्टुं शक्यते । इत्थं महाकविः कालिदासः संस्काराणां महत्त्वं रघुवंशकाव्यमाध्यमेन प्रतिपादयति इति ज्ञायते ।

**********



ISSN: 2320-740X

# श्री गणेशोत्तरतापिन्युपनिषदुक्तं गणेशतत्त्वम्

**विद्वान् निरञ्जनभट्टः**

प्राध्यपकः, वेदान्तविभागः

अनाद्यविद्यासम्बद्धः सर्वोऽपि जीवः स्वस्वरूपाज्ञानेन नित्यशुद्धबुद्धमुक्तसत्यस्वभावे आत्मनि अन्तःकरणाद्यनात्मतद्धर्मान् अध्यस्य कामकर्मसमारब्धसंसारसागरे आवर्तादावर्तान्तरं कीट इव जन्मनो जन्मान्तरं प्राप्नुवन् दुःखसाहस्रमनुभवति । तादृशदुःखसागरनिमग्नान् जीवान् समुद्दिधीर्षयैव प्रवृत्तमिदं वेदान्तशास्त्रं परमकारुणिकीं श्रुतिमवलम्ब्य बोधयति – "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[1]" इति । श्रुतिस्तु श्रीमद्भगवत्पादोक्तानुसारं 'मातापितृसहस्रेभ्यो हितैषिणी[2]' सती योऽयं परमात्मा जगत्सर्गस्थितिध्वंसकारणं नित्यनिरतिशयपरमानन्दस्वरूपः स एव सर्वस्यापि जीवस्य स्वरूपभूतः, श्रवणादिसाधनैः तस्य परमात्मनः साक्षात्कारादेव परब्रह्मस्वरूपमोक्षं प्रति साधनमित्याघोषयति । मन्दमतीनां सौलभ्येन अवगमनाय "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते[3]" इति न्यायमनुसृत्य सर्वप्रपञ्चशून्ये निर्गुणे निराकारे परब्रह्मणि प्रपञ्चधर्मानध्यस्य पुनस्तस्मिन् "नेति नेत्यात्मा[4]" इत्यादिश्रुतिवाक्यैः मिथ्याभूतं प्रपञ्चं निरस्य परमात्मनः निष्प्रपञ्चत्वं संसाध्यते । अधिकारिभेदेन मुमुक्षूणाम् उपासनादिसाधनक्रमा अपि परमात्मनः अद्वितीयतत्त्वाधिगमायैव वेदान्तेषु सम्यग्विशदीकृता दरीदृश्यन्ते ।

यद्यपि शास्त्रस्यास्य आधारभूताः उपनिषदः शाङ्करभाष्यसमन्वितत्वात् प्राधान्येन दशेति प्रसिद्धाः, तथापि शताधिकाः लोके समुपलभ्यन्त एव । तत्र अथर्ववेदसम्बद्धा गणेशोत्तरतापिन्युपनिषदपि अन्यतमा । इयं चोपनिषत् षडध्यायैः उपनिषन्नामभिः विभक्ता । प्रथमोपनिषदि "ओमित्येकाक्षरं ब्रह्मेदं सर्वम्[5]" इति अर्थजातम् इदं सर्वं कालत्रयपरिच्छेद्यम् ओङ्करात्मकं ब्रह्मैव इति उपक्रम्य यदेतत् ओङ्कारमात्रमित्युक्तं तत्सर्वं गणेश एवेति गणेशस्य ब्रह्मरूपत्वमुक्तम् । तस्यैव गणेशस्य प्रत्यगात्मतया निर्देशं कृत्वा चतुष्पात्त्वेन प्रविभागः क्रियते माण्डूक्योपनिषदुक्तप्रकारेणैव । तद्यथा – "ओमित्येकाक्षरं ब्रह्मेदं सर्वम् । तस्योपव्याख्यानम्। सर्वं भूतं भव्यं

---

[1] बृहदारण्यकोपनिषत् २.४.५

[2] कठोपनिषद्भाष्यम् ।२.१.१५

[3] पञ्जीकरणम्. २

[4] बृहदारण्यकोपनिषत् । ३.९.२६

[5] गणेशोत्तरतापिन्युपनिषत् १.

भविष्यदिति सर्वमोङ्कार एव । एतच्चान्यच्च त्रिकालातीतं तदप्योङ्कार एव । सर्वं ह्येतद्गणेशोऽयमात्मा ब्रह्म । सोऽयमात्मा चतुष्पात्" इत्येवमादिना । यथा माण्डूक्योपनिषदि एकस्यैव आत्मनः **"जागरितिस्थानो बहिःप्रज्ञः[1]"** इत्यादिना जाग्रत्स्वप्नसुषुप्तिरूपस्य अवस्थात्रस्य स्वरूपं, तत्रोपहितत्वेन क्रमेण वैश्वानरतैजसप्राज्ञभेदान् कल्पयित्वा तस्यैव च अवस्थात्रयातीतं शुद्धं तुरीयं रूपं ज्ञेयत्वेनोपदिश्यते । तथैव अस्यामपि उपनिषदि गणेशस्य तादृक्त्वं सुष्ठु तेनैव प्रकारेण प्रतिपाद्यते । तत्र गणेशस्य ज्ञेयत्वेन तुरीयात्मत्वं प्रतिपाद्यते यथा – "नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षण-मचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स गणेश आत्मा विज्ञेयः[2]" इति । यः एवं गणेशं सदोज्ज्वलं सर्वदोषरहितम् आनन्दरूपं सर्वाधिष्ठानभूतं सन्मात्रं निरस्ताविद्यातमोमोहं मनसा ब्रह्मणा एकीकृत्य 'विनायकोऽहम्' इति तत्त्वतो विजानाति सः संसारात् मुक्त्वा आनन्द एव भवति इति प्रथमोपनिषदुक्तस्य गणेशतत्त्वस्य फलमुच्यते – "विनायकोऽहमित्येतत्तत्त्वतः प्रवदन्ति ये । न ते संसारिणो नूनं प्रमोदो वै न संशयः[3]" इति ।

द्वितीयोपनिषदि "स विष्णुः स शिवः स ब्रह्मा सेन्द्रः सेन्दुः स सूर्यः स वायुः सोऽग्निः[4]" इत्यादिना गणेशस्य सर्वदेवात्मकत्वमुक्त्वा सर्वात्मकत्वमपि पृथक् निर्दिशति । अत्रैव वाजसनेयिसंहितायामुक्तरीत्यैव[5] गणेशस्य गणानां पतित्वं, प्रियपतित्वं, निधिपतित्वं चापि उल्लिखितं दृश्यते – "ॐ गणानां त्वा गणपतिः । स प्रियाणां त्वा प्रियपतिः । स निधीनां त्वा निधिपतिः[6]" इति । पुनः तस्यैव "स गणेशो महान् भवति । सोऽणुर्भवति" सोऽणुर्भवति" इति महद्रूपत्वम् सूक्ष्मरूपत्वं चोभयमपि 'अणोरणीयान् महतो महीयान्[7]' इति श्रुत्यन्तरप्रसिद्धं समर्थयति । रूपारूपवत्त्वं, द्वैताद्वैतरूपत्वं, ह्रस्वाह्रस्ववत्त्वं, स्थूलास्थूलवत्त्वं नामरूपरहितत्वं चेत्यादिसकलविशेषरहितस्वरूपत्वं गणेशस्य विस्पष्टं प्रतिपाद्यते । तस्य च पारमार्थिकं रूपम् इत्थं निरूप्यते – "स निर्गुणः स निरहङ्कारः स निर्विकल्पः स निरीहः स निराकार आनन्दरूपस्तेजोरूपमनिर्वाच्यमप्रमेयः पुरातनो गणेशो

[1] गणेशोत्तरतापिन्युपनिषत् १.

[2] गणेशोत्तरतापिन्युपनिषत् १

[3] गणेशोत्तरतापिन्युपनिषत् १.

[4] गणेशोत्तरतापिन्युपनिषत् २

[5] वाजसनेयिसंहिता – गणानां त्वा गणपतिं हवामहे । प्रियाणां त्वा प्रियपतिं हवामहे । निधीनां त्वा निधिपतिं हवामहे । (२३.१९)

[6] गणेशोत्तरतापिन्युपनिषत् २

[7] कठोपनिषत् १.२.२०


ISSN: 2320-740X

निगद्यते[1]” इति । अस्मादेव प्रकृतिमहत्तत्त्वादिक्रमेण सम्पूर्णः प्रपञ्चः, देवाश्च जायन्ते । उत्पन्नं सर्वं तस्मादेव जीवति । तादृशः गणेशः ज्ञेयत्वेन उपदिश्यते – “स गणेश आत्मा विज्ञेयः[2]” इति ।

तृतीयोपनिषदि “गणेशो वै ब्रह्म तद्विद्यात्[3]” इति उपक्रम्य भूतं भव्यं जायमानं सर्वं गणेश एव । तस्मात् परं न किञ्चिद्विद्यते । यः एतद्विजानाति स ब्रह्मवित् ब्रह्मैव प्राप्नोतीति उच्यते – “यो वै वेद स वेद ब्रह्म ब्रह्मैवोपाप्नोति[4]” इति । ब्रह्मादिगणानाम् ईशः इति गणेशेति नाम्नः निर्वचनं दर्शयति अत्रत्यमिदं वाक्यं – “ब्रह्मविष्णवादिगणानामीशभूतमित्याह तद्गणेश इति” इति । अयं गणेशः आत्मानो भिन्नं न किञ्चित् दृष्ट्वा एकाकितायाः अयुक्ततां मत्त्वा गुणान्, गुणेभ्यश्च ब्रह्मविष्णुहरान् च उत्पादयति । तदुक्तं यथा – “नाभे रजः स वै ब्रह्मा । मुखात्सत्त्वं स वै विष्णुः । नयनात्तमः स वै हरः[5]” इति । गणेशात् सृष्टिविषयाम् आज्ञां प्राप्य ब्रह्मा इदं पञ्चभूतात्मकं जगत् ससर्ज । विष्णुश्च तेनैव आदिष्टः सत्त्वगुणोपेतः सन् जगत्पालनं करोति । तस्मादेव कारणात् हरः सृष्टिसंहारं करोति । यः एवं गणेशं विस्पष्टं जानाति स गणेश एव भवतीति गणेशस्य सर्वेश्वरत्वं सर्वशक्तित्वं माहात्म्यं च प्रतिपादितम् ।

चतुर्थोपनिषदि च गणेशस्यैव सदात्मकब्रह्मस्वरूपत्वमुक्त्वा तस्य भीत्यैव अग्निसूर्यवाय्वादयः स्वस्वकार्ये नियताः प्रवर्तन्ते इति निगदितम् । ततः तस्य चित्स्वरूपत्वं निर्विकारत्वम् अद्वैतस्वरूपत्वं चोक्त्वा तस्मात् मायशबलं रूपं गजाकारम् उत्पद्यते इत्यपि निरूप्यते । “अनिर्वचनीया सैव माया जगद्बीजमित्याह[6]” इति जगत्कारणस्य मायायाः अनिर्वाच्यत्वमपि स्पष्टमेव प्रकाशितम् । तस्मात् महत्तत्त्वादिक्रमेण अहङ्कारादीनां सृष्टिमुक्त्वा सत्त्वरजस्तमोगुणभेदेन अहङ्कारस्य त्रैविध्यमपि उक्त्वा तस्य सत्त्वादिक्रमेण ज्ञानशक्तिः क्रियाशक्तिः द्रव्यशक्तिश्चेति शक्तित्रयमपि प्रदर्शितम् । तदनन्तरं पञ्च तन्मात्रादिक्रमेण चतुर्दशभुवनात्मकस्य जगतः सृष्टिः निरूप्यते । ततः गणेशस्य महिमानम् आख्यायिकामुखेन प्रदर्श्यते । ब्रह्मविष्णुहराः परस्परम् आत्मानं सर्वेशत्वेन अभिमन्यमानाः विवदन्तः अन्तरिक्षं गताः । एवं दशसु दिक्षु भ्रमन्तः किञ्चिदपि अदृष्ट्वा ध्यानमग्नाः सन्तः हृदयदेशे गणेशस्य विश्वरूपं पश्यन्ति । तद्वर्ण्यते यथा – “ततश्च हृद्देशे महान्तं पुरुषं

[1] गणेशोत्तरतापिन्युपनिषत् २

[2] गणेशोत्तरतापिन्युपनिषत् २

[3] गणेशोत्तरतापिन्युपनिषत् ३

[4] गणेशोत्तरतापिन्युपनिषत् ३

[5] गणेशोत्तरतापिन्युपनिषत् ३

[6] गणेशोत्तरतापिन्युपनिषत् ४

गजवक्त्रमसङ्ख्यशीर्षमसङ्ख्यपादमनन्तकरं तेजसा व्याप्ताखिललोकं ब्रह्ममूर्धानं दिक्श्रवणं ब्रह्माण्डगण्डं चिद्व्योमतालुकम्[1]" इत्यादिना । एतादृशं गणेशं संस्तुत्य तेन सृष्टिस्थितिसंहारकार्येषु नियोजिताः भवन्ति ब्रह्मादयः इति । एवं सर्वात्मानं गणेशं सर्वदा एकं यो विजानाति स गणेश एव भवतीति तत्फलमपि उपसंहारे निरुक्तम् ।

पञ्चमोपनिषदि तावत् आख्यायिकापुरस्सरं गणेशस्य मन्त्रोपासनाक्रमम् उपदिश्य तस्य च मन्त्रस्य माहात्म्यमुक्त्वा मन्त्रानुसन्धानस्य आत्यन्तिकं फलमपि उपवर्ण्यते । देवैः गणेशस्य उपासनक्रमे पृष्टे सति रुद्रः मन्त्रोपासनस्य क्रमं विस्तरेण उपदिशति । ततोऽस्य मन्त्रराजस्य जपस्य माहात्म्यमुक्त्वा लौकिकं फलं वर्णयति यथा – "मन्त्रराजजापकस्य यत्र रविसोमौ न तपतो यत्र वायुर्नक्षत्राणि न वाति भान्ति यत्राग्निर्मृत्युर्न दहति प्रविशति यत्र मोहो न दुःखं सदानन्दं परानन्दं समं शाश्वतम्[2]" इत्यादिना । आत्यन्तिकं फलं च सर्वसंसारदोषरहितं सार्वात्म्यभावमेव दर्शयति – "य एवं गणेशतापनीयोपनिषदं वेद स संसारं तरति घोरं तरति दुःखं तरति तरति विघ्नांस्तरति महोपसर्गं तरति । आनन्दो भवति नित्यो भवति स शुद्धो भवति स मुक्तो भवति स स्वप्रकाशो भवति स ईश्वरो भवति स मुख्यो भवति - - - स सर्वो भवति[3]" इत्यादिना ।

षष्ठोपनिषदि च पूर्वोक्तस्यैव मन्त्रराजस्य अनुष्ठानविधिम् उररीकृत्य गौर्या पृष्टो रुद्रः मानसं बाह्यं च पूजाविधानादिकं विस्तरेण उपदिश्य मन्त्रजपस्यापि क्रमं प्रपञ्चयति । ततश्चान्ते लौकिकम् आत्यन्तिकं च फलम् पृथक् उपदिशति । लौकिकं फलं भवति सर्वभोगप्राप्तिः, वाक्प्राप्तिः, यशःप्राप्तिश्च । आत्यन्तिकं यथा – "इदं रहस्यं यो जानाति स जानाति योऽधीते सोऽधीते स आनन्दो भवति स नित्यो भवति स विशुद्धो भवति स मुक्तो भवति स प्रकाशो भवति स दयावान्भवति ज्ञानवान्भवत्यानन्दवान् भवति विज्ञानवान् भवति विज्ञानानन्दो भवति सोऽमृतत्त्वं भवत्यमृतत्त्वं भवति[4]" इति ।

एवं वेदान्तानां मुख्यं लक्ष्यं परमपुरुषार्थभूतमोक्षप्राप्त्युपायोपदेश एव । ते च मुमुक्षूणां मतिसाहस्र-मनुलक्ष्य अनेकान् उपासनादिमार्गान् एकस्यैव परमात्मनः नानाप्रकारेण उपास्यत्वेन प्रकल्प्य बोधयन्ति। तेषां च फलं - "यो यद्गुणकं ब्रह्मोपास्ते स तद्गुणभाग्भवति[5]" इति श्रीशङ्करभगवत्पादैरुक्तरीत्या उपासकेषु तत्तदुपास्यस्य तत्तदुपास्यस्य गुणभाक्त्वोत्कर्षतया पारमार्थिकस्वरूपप्राप्तिरेव इति तु सर्वेषां वेदान्ततत्त्वज्ञानाम् अभिमतम् ।

**********

---

[1] गणेशोत्तरतापिन्युपनिषत् ४

[2] गणेशोत्तरतापिन्युपनिषत् ५

[3] गणेशोत्तरतापिन्युपनिषत् ५

[4] गणेशोत्तरतापिन्युपनिषत् ६

[5] तैत्तिरियोपनिषद्भाष्म् २.३



ISSN: 2320-740X

# भूभ्रमणम्

**डा. रमानन्द भट्टः एन्.**
प्राध्यापकः, ज्यौतिषवास्तु डिप्लोमा

अथ भुवो भूगोलस्य भ्रमणं नाम परिवर्तनं भूभ्रमणमित्युच्यते । अस्मिन् विषये मतद्वैविध्यं वर्तते, तत्र भूः स्थिरा, तां परितो ग्रहाः नक्षत्राणि च भ्रमन्ति दृश्यन्ते । यथा प्रत्यक्षं भ्रमद्रचक्रं भाति, तथोक्तं यजुर्वेदे -

**'आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।**
**हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्[1]' ॥**

इत्येकं मतम् । एवं रविरेव स्थिरस्तं परितो भूगोलो भ्रमति, तत्र तस्य भ्रमणद्वयम् । रविकेन्द्राद् भूकेन्द्रपर्यन्तसूत्रं भूकर्णः । तत्र रविकेन्द्रं केन्द्रं प्रकल्प्य भूकर्णव्यासार्धेन य एको गोलः सैव भूकक्षा, तस्यां भूगोलस्यैकभ्रमणेनैकसौरवर्षपूर्तिर्भवति । तथा च स्वस्थाने स्वाङ्गभ्रमणेन दिनरात्रिव्यवस्था सिद्ध्यत्यर्थात् नाक्षत्रीयषष्टिघटीभिः भुवः स्वस्थाने एकं स्वाङ्गभ्रमणं भवति । तत्र यद्भागे रविकिरणाः पतन्ति, तद्भागे प्रकाशयुक्तत्वाद् दिनम्, तद्विरुद्धभागे प्रकाशाभावादन्धकाररूपैव रात्रिर्भवति । इदमन्यन्मतमस्ति । इदमपि वर्तते अथर्ववेदे –

**"यस्यां कृष्णमरुणं च संहिते अहोरात्रे विहिते भूम्यामधि ।**
**वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनि धामनि[2]" ॥**

एतन्मतद्वये द्वितीयमतस्य प्रत्यक्षाभावात्पूर्वमतमेव बहुभिरङ्गीकृतम् । अन्यत्किम्, कोषे तु "भूर्भूमिरचलाऽनन्ता' इत्यनेन भूमेः नाम 'अचला' अर्थात् स्थिरा इति संरक्षितम् । एकेनैवार्यभट्टेन स्वसिद्धान्ते भूमिः भ्रमतीति लिखितम्, तद्यथा-

**अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत् ।**
**अचलानि भानि तद्वत् समपश्चिभगानि लङ्कायाम्[3] ॥**

भपञ्जरः स्थिरो भूरेवावृत्यावृत्य प्रतिदैवसिकौ उदयास्तमयौ सम्पादयति ग्रहनक्षत्राणाम् । अस्यार्थस्तु - यद्वत्= येन प्रकारेण, अनुलोमगतिः= क्रमचलनवान् नौस्थः= नौकास्थितो जनः अचलम्= स्थिरमपि वस्तु,

---

[1] ऋक्संहिता – मण्डलादि - ०१-३५.०२ ।

[2] अथर्ववेदः – १२ काण्डम् – १ सूक्तम् – ५२ मन्त्रः ।

[3] आर्यभटीयम् – गोलपादः - ०९ ।

विलोमगं= स्वगतिविरुद्धगमनशीलं पश्यति, अर्थाद्यथा नावा कोऽपि जन: पश्चिमतटात्पूर्वतटाभिमुखं याति, तदा स्वाश्रयरूपाया नौकायाश्चलनं न तस्य भाति, अपि तु पर्वतटप्रदेश एव स्वाभिमुखमुत्तरोत्तरमर्थात् पूर्वतः पश्चिमाभिमुखं भ्रमन् लक्ष्यते । अत्र यथा स्थिरस्यापि पूर्वतटस्य भ्रमणं भाति एवं चलाया अपि नौकायाः स्थिरत्वं लक्ष्यते तथैव चलस्य स्वाश्रयस्य भूगोलस्य भ्रमणं न भाति, ग्रहनक्षत्राणां तु भ्रमणं लक्ष्यते । वस्तुत इदमेव मतमाधुनिकैः सर्वैर्यूरोपदेशीयैर्युक्त्या बहुधा संलक्षितम् । पुनश्च आर्यभटेन कथ्यते "प्राणेनैति कलां भूः[1]" । भूः एकां कलाम् एकेन प्राणपरिमाणकेन कालेन गच्छतीति । तदा एकस्मिन् दिने एकमावर्तनं स्यात् यतः एकस्मिन् वृत्ते २१६०० कलाः भवन्ति । पुनश्च एकस्मिन् दिने २१६०० प्राणाः ।

परन्तु संस्कृतज्यौतिषसिद्धान्ते भूचलनस्य प्रत्यक्षानुभवाभावात् सूर्यस्यैव भ्रमणं सर्वैः स्वीकृतम् । अन्यस्य का कथा? आर्यभटस्य शिष्य एव लल्लाचार्य: स्वरचितसिद्धान्ते शिष्यधीवृद्धिदाख्ये आर्यभटमतविरुद्धमतमुपन्यस्तवान् ।

तद्यथा-

**यदि च भ्रमति क्षमा स्वकुलायं कथमाप्नुयुः खगाः ।**
**इषवोऽभिनभः समुज्झिता निपतन्तः स्युरपाम्पतेर्दिशि ॥**
**पूर्वाभिमुखे भ्रमे भुवो वरुणाशाभिमुखो व्रजेद्घनः ।**
**अथ मन्दगमात्तथा भवेत्कथमेकेन दिवा परिभ्रमः[2] ॥**

अस्यार्थः - यदि च क्षमा= पृथ्वी, स्वाधाराक्षोपरि पूर्वाभिमुखं भ्रमति, तदाऽऽकाशे स्थितानि ग्रहनक्षत्रबिम्बानि पूर्वतः पश्चिमाभिमुखं भ्रमन्ति लक्षितानि भवन्ति । तत्र यदि खगाः= पक्षिणः, पश्चिमस्यां दिशि गतास्तदा ते स्वकुलायम्= निजकोटरं पुन: पूर्वाभिमुखगत्या कथम्= केन प्रकारेण प्राप्नुयुः= लभेयुः? यतः पक्षिण: पश्चिमगत्यपेक्षया भूमेः पूर्वाभिमुखचलनस्याधिकत्वाद् ये पूर्वपश्चिमाभिमुखं गतास्ततः परावृत्त्य ते कथमपि स्वकोटरं न लब्धुं शक्नुवन्ति, भूमेः गतेः महत्वात् । तथा च अभिनभः= स्वोर्वाभिमुखम्, समुज्झिताः= प्रक्षिप्ताः, इषवः= बाणाः, अपांपतेः= वरुणस्य दिशि= पश्चिमायां दिशि, निपतन्तः= पतिताः, स्युः= भवेयुः, अर्थाद्यत्स्थानादूर्वाभिमुखं शरः प्रक्षिप्तः, तत्र यावता कालेन स शरो भूपृष्ठोपरि पतिष्यति, तावता कालेन सा भूर्विशेषगतितया पूर्वदिशं गता, अतो यत्स्थलात् शरः प्रक्षिप्तः, तत्स्थलात् पश्चिमायां दिशि शरस्य भूपृष्ठे पतनमुचितम् । परन्तु तथा न दृश्यते, अत एव भूर्न चलतीति । अथ च भुवः= पृथिव्याः, पूर्वाभिमुखे भ्रमणे सिद्धे

[1] आर्यभटीयम् – गीतिकापादः - ०६ । (प्राणेनैति कलां भम् इत्यपि पाठान्तरम्)

[2] शिष्यधीवृद्धिदम् –मिथ्याज्ञानाख्यः विंशतितमः अध्यायः – ४२ & ४३ ।


ISSN: 2320-740X

आकाशस्था मेघा निर्वातेऽपि समये पूर्वतो हि पश्चिमाभिमुखं सदैव भ्रमन्तो व्रजेयुः । अथ यदि भूमेः मन्दगमात्= पृथिव्याः च स्वल्पगमात्= स्तोकगतितः, तथा न भवतीत्युच्यते, तर्हि, एकेन दिवा अहोरात्रेण, कथं= केन प्रकारेण परिभ्रमः= परिवर्तनं भवतीति ?

एवमेवाह श्रीपतिरपि-

**नौस्थोऽनुलोमगमनादचलं हि यद्वन्नामन्यते चलदिलैवमिलाभ्रमेण ।**
**लंकासमापरगति प्रचलद् भचक्रमाभाति सुस्थिरमपीति वदन्ति केचित् ॥**
**यद्येवमम्बरचरा विहगाः स्वनीडमासादयन्ति न खलु भ्रमणेन धात्र्याः ।**
**किञ्चाम्बुदा अपि न भूरिपयोमुचः स्युर्देशस्य पूर्वगमनेन चिराय हन्त ॥**
**भूगोलवेगजनितेन समीरणेन केत्वादयोऽप्यपरदिग्गतयः सदा स्युः ।**
**प्रासादभूधरशिरांस्यपि सम्पतन्ति तस्माद्भ्रमत्युडुगणस्त्वचलाऽचलैव[1] ॥**

एतत्सर्वं लल्लोक्तश्लोकाशयप्रतिरूपकमेव बोध्यम् ।

**अथैवं सिद्धान्ततत्त्वविवेके मध्यमाधिकारे कमलाकरोऽप्याह -**
**"स्थिरं प्रत्यक् चलं भाति खस्थं प्राग्भूभ्रमान्नृणाम् ।**
**प्रवहो व्यर्थ इत्यार्यभटोक्तेः शृण्विहोत्तरम् ॥**
**यत् सर्वतो निराधारं स्वोर्ध्वदेशगतं गुरु ।**
**स्वस्थान एव तन्नूनं पततीत्यपि निर्णये ॥**
**असद्भूभ्रमणं चैन्द्र्यामनार्षं स्वीकृतं तु यत् ।**
**भूमावपि ध्रुवायोगात्तत्तुच्छं प्रवहे गते[2]" ॥**

अस्यार्थस्तु उच्यते- प्राग्भूभ्रमणात्= पूर्वाभिमुखभूगोलभ्रमणात्, नृणाम्= भूस्थलोकानाम्, खस्थम्= आकाशस्थं स्थिरमपि ग्रहनक्षत्रादिबिम्बं प्रत्यक्चलं= पश्चिमाभिमुखभ्रमणशीलं भाति= लक्ष्यते । अतः प्रवहो व्यर्थः= निरर्थकः, अर्थाद् भूभ्रमणेनैवं लक्ष्यते, न तु प्रवहभ्रमणेनेत्यर्थः । इति आर्यभटोक्तेः, तस्य उत्तरं= खण्डनं शृणु । अहो यत् किमपि वस्तु सर्वतः= परितोऽपि निराधारं= निरवलम्बम्, अथ च स्वोर्ध्वदेशगतं= स्वखमध्यस्थितं गुरु= भारयुक्तं च आकाशे भवति, तद्यथार्थतः स्वस्थाने= स्वभूपृष्ठस्थल एव नूनं= निश्चितं, पतति इति निर्णये= प्रत्यक्षदर्शने सत्यपि अनार्षम्= ऋषिमुनिमतभिन्नम्, ऐन्द्र्याम्= पूर्वस्यां भूभ्रमणं यत् स्वीकृतं तदसत्= अयुक्तमित्यर्थः । अर्थाद्यदि

[1] सिद्धान्तशेखरः – गोलाध्यायः - १५-१७ ।

[2] सिद्धान्ततत्त्वविवेकः – मध्यमाधिकारे गोलपरिचयः १७-१९ ।

भूभ्रमणं पूर्वस्यां भवेत् तदा आकाशस्थो गुरुतरपदार्थः स्वस्थानात् पश्चिमत एव पतेन्नहि स्वस्थानेऽत्र स्वस्थाने तत्पतनावलोकनात्, तन्मतं न युक्तमिति । एवमेवान्यत्रापि भूभ्रमणविषयखण्डनं दृश्यते ।

परन्तु न तद्युक्तं यत उच्यते यथार्थस्थितिः भुवः स्वाङ्गपरिवर्त्तनेन यो भूवायुस्तद्वेगवशाज्जायते, तदन्तर्वर्तिनः पदार्था नहि तं भूवायुमनपेक्ष्य चलन्ति, भूवायोरनुरोधेन भ्रमन्ति । न हि स्वतन्त्रया गत्येति भावः । अनेन पक्षिणामपि स्वनीडप्राप्तिः, लोष्ठखण्डस्यापि स्वस्थाने पतनं च स्वतः सिद्धम् ।

अहो तर्हि किं वेदे 'आकृष्णेन रजसे'त्यादिमन्त्रे रवेश्चलनं प्रतिपादितम्? तदुच्यते- आकाशे स्वापेक्षिकाल्पपरिमाणकबिम्बं स्वपरितो भ्रामयतीति नियमो वर्त्तते अर्थाद् भूबिम्बापेक्षयाऽल्पपरिमाणकं चन्द्रबिम्बं तु भूमिं परितो भ्रमति । कुत एतल्लक्ष्यते । तदुच्यते चन्द्रबिम्बगतकलङ्कस्त्वधुनातनैर्जनैर्वेधेन सदा स्वभूम्यभिमुखमेव दृश्यतेऽतो, भूबिम्बात् परितो हि विधुबिम्बं भ्रमति, तथा च चन्द्रबिम्बं स्वपरितो भ्रामयन्ती भूमिः स्वयमपि सूर्यबिम्बात् परितो भ्रमति । अथ भुवं स्वपरितो भ्रामयन् अयं प्रत्यक्षसूर्योऽपि, स्वापेक्षिकबृहत्परिमाणकं सूर्यं परितो भ्रमति, अहो द्वितीयः सूर्यः क्व वर्तते? उत्तरं तु अस्मात् सौरजगतो बहिरनन्तदूरे, पुराणसमय एव द्वादशादित्या उपलब्धाः । अत एव यजुर्वेदे सूर्यभ्रमणं यदुक्तं तदपि युक्तमेव विज्ञेयम् । भूभ्रमणविषये महामहोपाध्यायपण्डितश्रीसुधाकरद्विवेदिभिः "धराभ्रमे प्राचीननवीनयोर्विवादः" इति नाम्ना लघुपुस्तकमेकं रचितम्, तद्द्रष्टव्यं विज्ञैः इति अलमति लेखनेन ।

**उद्धृतग्रन्थसूची -**

१. अथर्ववेदीय- पृथिवीसूक्त, डा सुरेश नारङ्ग, परिधि प्रकाशन, दिल्ली – १९९२ ।

२. आर्यभटीयम्– डा. सुराकान्त झा, चौखाम्भा कृष्णदास अकाडेमी, वाराणसी – २००८ ।

३. ऋग्वेदसंहिता– चौखाम्बा संस्कृत प्रतिष्ठान, दिल्ली -२००६ ।

४. शिष्यधीवृद्धिदम्– (pdf) ।

५. सिद्धान्ततत्त्वविवेकः – डा. कृष्णचन्द्र द्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी – १९९६ ।

६. सिद्धान्तशेखरः – पं. सत्यदेव शर्मा, चौखाम्भा कृष्णदास अकाडेमी, वाराणसी – २०१५ ।

**********



ISSN: 2320-740X

# प्रश्नशास्त्रोक्तश्वासविचारप्रक्रिया

**डा. सुधांशुकुमारनन्दा**
प्राध्यापकः, ज्यौतिषवास्तु डिप्लोमा

श्वासगतिस्तु निरवच्छिन्नरूपेण प्रचलति । यावत्कालपर्यन्तं प्राणाः शरीराद्भिन्नाः न भवन्ति तावत्पर्यन्तं श्वासगतिः प्रचलिष्यति एव । श्वासस्य अवरोधनेन मानवः (मानवव्यतिरेकान्येषाम् एवं विचाराः न सन्तीति कारणात् मानवः इति प्रयोगः) मृत्युं विन्दति । तदर्थं श्वासस्याऽपरं नाम प्राणाः किल । तस्य गतिमवलोक्य दैवज्ञः पृच्छकेन कृतस्य प्रश्नस्य समाधानमपि दातुं शक्नोति । तस्य श्वासस्य स्वरस्य वा भेदत्रयं वर्तते । तद्यथा चन्द्रस्वरः, सूर्यस्वरः अग्निस्वरश्च । एतेषु चन्दसूर्यस्वरयोः बहुलव्यवहारः, अग्निस्वरस्य योगसाधनाय एव प्रशस्तत्वात् । एतत् नाडीनाम्नाऽपि अभिधीयते । यथा च. ना., सू. ना., अ. ना. । पुनश्च इडा, पिङ्गला, सुषुम्नेति च नामान्तरम् । एतेषां समन्वयः यथा -

वामस्वरः = चन्द्रस्वरः = इडानाडी
दक्षिणस्वरः= सूर्यस्वरः = पिङ्गलानाडी
उभयस्वरः = अग्निस्वरः= सुषुम्नानाडी ।

यथोक्तं प्रश्नमार्गे -

**इडा वामा भवेन्नाडी सोमस्यार्कस्य दक्षिणा ।**
**पिङ्गलाख्या सुषुम्नाख्या मध्यमाग्नेरुदीरिता**[1] ॥

अस्य गतिज्ञानाय दैवज्ञेन सर्वदा प्रातः स्वश्वासगतिः परीक्षणीयेति प्रश्नमार्गकारोक्तिः । तथा चोक्तं - **कार्यं श्वासपरीक्षणं प्रतिदिनं बुध्वा प्रभातागमे**[2] । एतदाधारेण (श्वासगतिवशात्) पुरुषोत्तमेन सरलरीत्या फलविचारक्रमः प्रतिपादितः । प्रथमायनेऽस्मिन् पञ्चमात् द्वादशश्लोकपर्यन्तं स्वराधारेण फलविचारः अधः क्रमेणोपस्थापितः । आदौ **प्रत्यूषे प्रतिवासरं स्वमरुतो......**[3], इत्यादिना उच्यते यत् शुभग्रहाणां वासरेषु वायोः सञ्चारः वामे चेत् शुभः, पापवासरेषु तु दक्षिणवायुसञ्चारः इष्टफलदायकः भवति । विपरीते तु विपरीतम् । अर्थात् वासरेषु वायोः आनुकूल्येन सुखानुभवः प्रातिकूल्येन तु पीडा- विपन्मृत्यु- कार्यनाशादयः सम्भवन्ति । एते विषयाः

1.प्र.मा. २-४०
2.प्र.मा.२-२८
3.प्र.अ.१-५

ISSN: 2320-740X

न केवलं प्रश्नायनेऽपि तु शिवस्वरोदय इति पुस्तकेऽपि दृश्यन्ते । यथा –

**गुरुशुक्रबुधेन्दूनां वासरे वामनाडिका ।**
**सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः ॥**
**अर्काङ्गारकसौरीणां वासरे दक्षनाडिका ।**
**स्मर्तव्या चरकार्येषु कृष्णपक्षे विशेषतः[1]॥**

श्लोकेऽस्मिन् वासरेण साकं पक्षभेदेन किं कार्यं शुभं, तदपि वर्णितं विद्यते । पुनश्च श्वासविषये पश्यामश्चेत् तस्य गतिस्तु सर्वदा समाना न भवति। कदाचिद् वामे तु कदाचिद् दक्षिणे कदाचिच्चोभाभ्यां अस्य गतिः । पुनश्च एकाधिकदिनपर्यन्तमपि गतेः परिवर्तनं न जायते । तस्य गतिः अष्टदिनपर्यन्तं प्रतिकूले स्वरे (शुभवासरे सूर्यस्वरः, पापवासरे चन्द्रस्वरः) चेत् पृच्छकस्य किं फलं तदयनेऽस्मिन् स्पष्टरूपेण प्रतिपादितं विद्यते । तथा चोक्तम्-

**निरन्तरेणाष्टसु सूर्यवासरेष्वनिष्टवायोः पितृरुक् सुतापदः ।**
**परैश्च बन्धः स्वमृतिर्गुरोर्मृतिर्धनक्षयो दारविपत् क्रमात् ततः[2] ॥**

अस्य स्पष्टार्थम् अधः चक्रमेकं प्रदीयते–

| **वासराः** | **प्रतिकूलस्वरः** | **दिनसंख्या** | **फलम्** |
|---|---|---|---|
| आदित्यः | वामः | ८ | गुरुजनानां मृत्युः |
| सोमः | दक्षिणः | ८ | सुतेन कष्टम् |
| भौमः | वामः | ८ | बन्धनम् |
| बुधः | दक्षिणः | ८ | स्वमृत्युः |
| गुरुः | दक्षिणः | ८ | गुरुजनानां मृत्युः |
| शुक्रः | दक्षिणः | ८ | धनक्षयः |
| सौरिः | वामः | ८ | दारानाशः |

पुनश्च अत्र पञ्चतत्त्वेन साकं स्वरस्य समन्वयेन फलविचारस्य प्रक्रिया प्रतिपादिता । विशेषतः रोगप्रश्ने, नष्टप्रश्ने च श्वासस्य पञ्चभूतसम्बन्धवशात् फलं समादिश्यते । स्वरस्य अङ्गुलात्मकमानाधारेण पञ्चतत्त्वानां कथं समन्वयः इति तस्य परिकल्पना अत्र विद्यते । यथा –

1.शि.स्व.६९-७०

2.प्र.अ.१-६


ISSN: 2320-740X

**पृथ्वीतत्त्वम् - श्वासगतिः षोडशाङ्गुलदीर्घा ।**
**जलतत्त्वम् - श्वासगतिः द्वादशाङ्गुलदीर्घा ।**
**अग्नितत्त्वम् - श्वासगतिः अष्टाङ्गुलदीर्घा ।**
**वायुतत्त्वम् – श्वासगतिः षडङ्गुलदीर्घा ।**
**आकाशतत्त्वम् – श्वासगतिः त्र्यङ्गुलदीर्घा ।**

इमानि अङ्गुलात्मकमानानि निरीक्ष्य श्वासगतिः कस्मिन् तत्त्वे वर्तते तज्ज्ञात्वा फलं वक्तव्यम् । अधुना प्रश्नायनरीत्या तत्त्वानुरोधेन फलविवेचनस्य उदाहरणमुपस्थाप्यते –

शुक्लपक्षप्रतिपत्तिथौ इडानाड्यां पृथ्वीतत्त्वं चेद्भूमिभवनादीनां प्राप्तिः, जलतत्त्वं चेत्कूपजलाशयादीनां निर्माणं, अग्नितत्त्वं चेदग्निभयं, वायुतत्त्वे तु शत्रु-चौर्य-शस्त्रादीनां भयं पुनश्चाकाशतत्त्वं चेद्धर्ममन्त्रादीनां प्राप्तिर्भवति । परन्तु एतेषु तत्त्वेषु शरीरे व्याधिपीडादयः परिलक्ष्यन्ते । ग्रन्थकारस्याशयः यत् श्वासः वामे दक्षिणे वा भवतु समफल इत्येव ज्ञेयम् ।

नष्टवस्तुज्ञानावसरे पृथ्वीतत्त्वं चेद्भूमौ (अधोभागे) पूर्वस्यां, जलतत्त्वं चेत् जलस्थाने याम्यायां, अग्नितत्त्वं चेद्भूपृष्ठे पश्चिमायां, वायुतत्त्वं चेद्धूम्रस्थाने उत्तरस्यां एवञ्चाकाशतत्त्वं चेत् मध्येऽथवा वस्तुस्थितस्थानात् स्थानान्तरे ऊर्ध्वदेशे नष्टवस्तुनः स्थितिरिति ज्ञातव्यम्[1] ।

रोगप्रश्नावसरे पृच्छकः (दूतः) पुरुषः स्त्री वेति आदौ द्रष्टव्यम् । दक्षिणस्वरस्य प्रचलनसमये तस्यां दिशि दूतस्य (पुरुष) आगमनं चेत् रोगी शीघ्रमारोग्यं प्राप्नोतीति वाच्यम् । स्त्री चेत् वामस्वरः तस्याः वामभागतः आगमनं चेत् रोगी शीघ्रमारोग्यं प्राप्नोतीति वाच्यम् । विपरीते तु विपरीतमिति ज्ञेयम् । अर्थात् पुरुषाय वामस्वरः वामभागश्च, स्त्रियै दक्षिणस्वरः दक्षिणभागश्च रोगस्य दीर्घत्वं, विलम्बेनारोगस्य च सूचनां
प्रददाति । यथोक्तं प्रश्नायने –

**दक्षस्थौ वायुदूतौ पुरुषगदहरौ योषितश्चान्यथा तौ**
**व्यत्यासे रोगदैर्घ्यं समरुचि नियतस्थेन कुत्रापि पृष्ट्वा ।**
**दूतेनारोग्यमात्मन्यशुभमपि शुभं श्वासतः सर्वमूह्यं**
**गर्भिण्या दर्शने स्त्रीपुरुषमृतशिशून् वामदक्षौ द्विशून्यम्[2] ॥**

1.प्र.मा. – २.३८,५०/ प्र.अ – १.१०

2.प्र.अ.१-११

अस्य श्लोकस्य अन्तिमपंक्तिः गर्भप्रश्नस्य समाधानमुपस्थापयति । तद्यथा प्रश्नसमये दैवज्ञस्य वामस्वरश्चेद्गर्भे कन्या, दक्षिणस्वरश्चेत् पुत्रः, उभयस्वरे तु नपुंसकः अथवा मृतबालक इति वाच्यम् । अस्य प्रामाण्यं प्रश्नमार्गेऽपि दृश्यते ।

**गर्भिणीदर्शने वायुर्दक्षिणे चेत्पुमान् वधूः ।**
**गर्भस्था वामभागे चेद्द्वयोर्नो चेदसत्प्रजा[1] ॥**

पुनश्च वायुसहिते भागे गर्भप्रश्नश्चेत् पुरुषः इति प्रश्नायनस्य व्याख्यायां विद्यते । स्वरानुरोधेन यदा दैवज्ञः फलमादिशति, तस्य नाडीप्रशस्ताप्रशस्तज्ञानमवश्यमेव भविता । प्रश्नमार्गे तु किं कार्यं कस्यां नाड्यां करणीयं तत् स्पष्टरूपेण विदितोऽस्ति । सूर्यनाड्यां वायोः सञ्चारेण अधोलिखितानि कार्याणि शुभानि भवन्ति । तथा चोक्तम्–

**विवादे द्यूतयुद्धे च स्नानभोजनमैथुने ।**
**व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते[2] ॥**

चन्द्रनाड्यां वायोः सञ्चरेण निम्नोक्तकार्याणि प्रशस्तानि भवन्ति। यथा –

**यात्रादानविवाहेषु वस्त्रालङ्कारभूषणे ।**
**शुभे सन्धौ प्रवेशे च वामनाडी प्रशस्यते[3]॥**

संक्षेपेणार्थबहुलं यः प्रतिपादयति सः पण्डितः। पुरुषोत्तमस्य स्वरविचारप्रसङ्गादेव तस्य पाण्डित्यं प्रतिभाति। अत्र दैवज्ञः स्वस्य श्वासपरीक्षणं कथं कुर्यात्**?** शुभाशुभवासरेषु श्वासस्य नाडीगत्यनुरोधेन (वामः, दक्षिणः मध्यं वा) फलविचारः, स्वरस्य अपरिवर्तनेन एकस्मिन् पार्श्वे अष्टदिनं यावत् वायोः प्रचलनं चेत् किं फलम्**?** भूम्यादिपञ्चतत्त्वैः सह अस्य कः सम्बन्धः, रोग- जाया- गर्भ- कार्यसिद्धि- नष्टवस्तुप्रभृतिषु प्रश्नेषु च कथं समाधानं प्रदेयं तत् सारल्येन प्रतिपादितमस्ति ।

**********

1.प्र.मा.२-५७

2.प्र.मा.२-५५

3.प्र.मा.२-५६


ISSN: 2320-740X

# भीष्म श्रीकृष्णयोः व्यक्तित्व समालोचनम्

**डा. एम्. श्रीनिवासमूर्ति**
प्राध्यापकः, साहित्यविभागः

भीष्म कृत प्रतिज्ञया कुरुसाम्राज्यं चित्राङ्गदाविचित्रवीर्याभ्यां सम्प्राप्तम् । यदा तौ अपात्रे भूत्वा अकालमरणं गतौ तदा सत्यवती कुरुराज्यं स्वीकरोतु इति, विवाहं प्राप्य सन्ततिमवाप्नोतु इति भीष्मं प्रार्थयते स्म । किन्तु भीष्मः सत्यवत्या ईप्सितं देशक्षेमं नावगतवान् । प्रजाक्षेमापेक्षया स्वप्रतिज्ञापरिकालनमेव भीष्मः अधिकममन्यत । यदि अयं दोषः भीष्मेण न कृतः तर्हि भीष्मोऽपि श्रीकृष्णवत् पूज्यतामाप्नोति स्म । इतरविषयेषु भीष्मः श्रीकृष्णात् नाल्पः ।

भीष्मकृतैतद्दोषेण सत्यवती प्रजाक्षेममभिलक्ष्य व्यासम् आह्वयति स्म । व्यासः काममतीत्यापि प्रजाक्षेमार्थं धृतराष्ट्रपाण्डुविदुरान् जनयति स्म । अतः भीष्मादपि व्यासः सत्यद्रष्टा वर्तते ।

धृतराष्ट्रः जन्मान्धः इत्यतः अनुजस्य पाण्डुराजस्य कृते राज्याधिकारः प्रदत्तः । पाण्डुराजः धृतराष्ट्रं राज्ये नियुज्य भीष्मं तस्य रक्षणार्थं सम्प्रार्थ्य शतशृङ्गपर्वतं गत्वा तत्रैव सन्ततिमवाप्य पुनः न प्रत्यागत्य तत्रैव मरणमगमत् । अतः मार्गान्तरमविज्ञाय धृतराष्ट्रः एव राजा इति भीष्मः अङ्गीकृतवान् । धृतराष्ट्र एव राजा इत्यतः राज्यम् अस्माकमेव इति दुर्योधनादीनाम् अभिप्रायः । शतशृङ्गे विद्यमानानां ऋषीणाम् अभिप्रायस्तावत् तत् राज्यं पाण्डुराजस्य पुत्राणामेव इति । समस्यामिमां छेत्तुं अशक्तः धृतराष्ट्रः राज्यं विभज्य कञ्चन भागं पाण्डवेभ्यः अदात् । भीष्मः अन्धस्य धृतराष्ट्रस्य रक्षकः भूत्वा तत्रैव धृतराष्ट्रसकाशे एव स्थितवान् ।

श्रीकृष्णः पाण्डवानां विषये कौरवैः अन्याय्यमाचरितम् इति निश्चिनोति स्म । किन्तु धृतराष्ट्रस्य राज्ये पाण्डवान् राज्यार्थं प्रचोदयति चेत् देशद्रोहः भवति इति मत्वा तूष्णीकोऽभूत् । श्रीकृष्णस्य धर्मपक्षस्य बलीकरणमेव लक्ष्यम् । न तु तत्पक्षीयाः पाण्डवाः कौरवाः वा इति ।

भीष्मस्य धृतराष्ट्रसम्बन्धः अनिवार्योऽभूत्। धृतराष्ट्रः प्रथमं यदि दिवङ्गतः अभविष्यत् तर्हि भीष्मः कौरवान् त्यक्त्वा पाण्डवान् स्व्यकरिष्यत् । अज्ञातवासानन्तरं पाण्डवानां राज्यं न प्रत्यर्पयामि इति दुर्योधनः हठमकरोत् । धृतराष्ट्रः तं नीतिं बोधयितुम् अशक्तो जातः । अतः युद्धेऽपि भीष्मेण कौरवपक्षोऽवलम्बितुम् आपतितः । कौरवान् त्यक्त्वा पाण्डवपक्षं वहति चेत् एतावत् कालं यावत् स्वेन संरक्ष्यमाणस्य अन्धस्य द्रोहः

ISSN: 2320-740X

भवति इति तेन चिन्तितम् । धृतराष्ट्रे विद्यमानं भीष्मस्य वात्सल्यमेव अधर्मपक्षे तस्य स्थितेः कारणमभूत् । प्रारम्भात् आरभ्य भीष्मस्य धर्माधर्मयोरपेक्षया स्वप्रतिज्ञापरिपालने एव रुचिरधिका ।

द्रोणाचार्यः जीवनोपाधये भीष्मम् आश्रित्य कौरवाणां गुरुरभूत् । अतः सः भीष्माधीनः एव । धृतराष्ट्रस्य आस्थाने कृपाचार्य आस्थानिको भूत्वा द्रोणाचार्येण साकं धृतराष्ट्रस्यास्थानम् आश्रित्य जीवति स्म । भीष्मस्य एव धृतराष्ट्रे व्यामोहः आसीत् । अतः द्रोणस्य कृपस्य च धर्मपक्षम् अवलम्बितुं सामर्थ्यं नासीत् । अत एव श्रीकृष्णस्य निर्णये त्रयः अपि वध्याः अभूवन् । श्रीकृष्णस्य कस्मिन्नपि व्यामोहः न आसीत् । अतः दुर्बलान् दोषरहितान् अन्याय्यबाधितान् च पाण्डवान् सङ्गृह्य समरक्षीत् । जरासन्धं मारयित्वा राजसूययागं कारयित्वा राजकीयतया कौरवाणाम् अपेक्षया पाण्डवान् बलवतः अकरोत् ।

अत्र भीष्मद्रोणकृपाः यद्यपि ज्ञानिनः भक्ताश्च, व्यामोहेन अपराधिनः सञ्जाताः । श्रीकृष्णः विधिना कालेन कर्मणा च न बद्धः । अत एव स भगवान् पाण्डवान् युद्धार्थं न प्रेरयति स्म । श्रीकृष्णदौत्य समये कौरवाः एव युद्धनिर्णयम् अकार्षुः । युद्धक्षेत्रेऽपि अनुत्साहिनं दुर्योधनं प्रोत्साहयितुं भीष्म एव आदौ शङ्खारवं कृत्वा युद्धं प्राकटीत् । तदनन्तरमेव श्रीकृष्णः गीतोपदेशं कृत्वा अर्जुनं युद्धाय सिद्धम् अकार्षीत् । श्रीकृष्णस्य धर्मराजः चरणागतः आश्रितः । भीष्मस्य धृतराष्ट्रः व्यामोहकारणीभूतः विकलाङ्गः बन्धुः । अयं व्यामोहः एव भीष्मस्य पतनकारणम् ।

लोके के के गुणाः समादरणीयाः त्याज्याः चेति, कस्य कस्य कर्मणः कीदृशं फलं भवतीति च महाभारते सम्यक् निरूपितं भगवता व्यासेन ।

*********


ISSN: 2320-740X

# तस्य द्वादशशतं दक्षिणा इति वाक्यविचारः

**श्री जगदीशः एस्. एम्.**

मीमांसाविभागीयशोधच्छात्रः

ज्योतिष्टोमे गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्चव्रीह्यश्च यवाश्च तिलाश्च मासाश्च तस्य द्वादशशतं दक्षिणा इति श्रुतम् । तत्र श्रूयमाणा द्वादशशतसंख्या कुत्र निविशते इति चिन्तायाम् - **"ऋत्विग्भ्यो दक्षिणां ददाति"** इत्यनेन ऋत्विग्भ्य: दक्षिणादानं विहितम् । तादृशदानमनूद्य तस्य "द्वादशशतम्" इत्यनेन सर्वनाम्ना तच्छब्देन उपस्थितगवादिः सर्वद्रव्योद्देशेन द्वादशशतं विधीयते । तत्र गवादीनाम् उद्देश्यत्वात् उद्देश्यविशेषणस्य अविवक्षितत्वात् प्रत्येकं गवादिसर्वद्रव्येषु द्वादशशतस्य निवेश: इति । गवादिसर्वद्रव्याणां दक्षिणात्वं तु गौश्चाश्वश्च इति वाक्ये दक्षिणापदानुषङ्गेण बोध्यम् । तन्त्ररत्नकारास्तावत् छान्दोग्यस्य गौश्चाश्वश्च इत्यादि वाक्यं "तस्य नवतिशतं स्तोत्रीया:" इत्यर्थवादान्तर्गततया अस्य वाक्यस्य अन्यपरत्वावगमात् नानेन गवादीनां दक्षिणात्वं बोध्यते इति निरुपितवन्त: । तथापि आध्वर्यवे अनन्यशेषतया श्रुतेन ईदृशेनैव वाक्येन गावादीनां दक्षिणात्वम् इति ।

अथवा – दक्षिणादानानुवादेनैव द्वादशशतसंख्या विधीयते । संख्यायाश्च वारणो यज्ञावचर: इतिवत् सर्वेषु दक्षिणाद्रव्येषु निवेश:। तत्र तस्य इति पदं प्रकरणप्राप्तक्रतुसम्बन्धानुवादकमिति प्रथम: पक्ष:।

न तावत् दक्षिणानुवादेन द्वादशशतसंख्याया: विधि: । वाक्ये 'तस्य' इति पदवैयर्थ्यापत्ते: । नापि संख्याया: द्रव्योद्देशेन विधानम् । गवादिद्रव्याणां बहुत्वात् बहुवचनापत्ति: स्यात् । एवं दक्षिणोद्देशेन द्वादशशतविधानपक्षे, द्रव्योद्देशेन संख्याविधानपक्षे च गौश्चाश्वश्च इत्यादिवाक्येन दक्षिणापदानुषङ्गेन गवदीनां दक्षिणात्वाविधाने वाक्यभेदः । अतः गौश्चाश्वश्च इत्यादिवाक्येन एकवाक्यत्वमभ्युपगम्य गवादिद्रव्याणि द्वादशशतसंख्यया इत्युभयविशिष्टदक्षिणादानमेव विधीयते । अनेन प्राप्तस्य दानस्य 'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यनेन ऋत्विग्भ्यो दक्षिणां ददाति इत्यनेन ऋत्विगुद्देशेन विनियोग: क्रियते । तत्र संख्याया: पार्ष्ठिकबोधवेलायां द्रव्यवृत्तित्वावगमात् वाक्ये च शब्दश्रवणात् सर्वेषां द्रव्याणां समुच्चयावगमात् समुच्चितानामेव गवादिद्रव्याणां दक्षिणादाने करणत्वं प्रतीयते इत्यत: द्वादशशतसंख्याया: समुच्चितद्रव्यवृत्तित्वावसायात् सर्वसम्पाद्याः द्वादशशतसंख्याया: इति द्वितीय: पक्ष: ।

एवं सति तस्य इति एकवचनान्तपदस्य वैयर्थ्यापति: । अत: गौश्चाश्वश्चेत्यादिवाक्येन एकद्रव्यवृत्तित्वविशिष्टा संख्या गवादिसमुच्चितद्रव्याणि इत्युभयविशिष्टदानामेव विधीयते । तथा च द्वादशशतस्य एकद्रव्यवृत्तित्वमेव । एतेन


ISSN: 2320-740X

तस्य इत्येकवचनं गवादिद्रव्यसमाहाराभिप्रायमित्यपास्तम्, समाहारस्य न्यायादेव प्राप्तत्वात् तस्येत्यस्य वैयर्थापत्ति: स्यात् । किञ्च समाहारस्य अशाब्दत्वात् तस्य इति सर्वनाम्ना परामर्शानुपपत्ति: स्यात् । प्राचीनानां मते षष्ठ्यन्तरस्य सुबन्तेन सह अन्वय: व्युत्पन्न: इत्यत: तत्र न संख्यान्वय विरोध: । स्वमते संख्यान्वय: पार्ष्ठिक: । तत्र पदद्वयलक्षणया संख्यान्वय: इति । तथा च एकद्रव्यवृत्तिः द्वादशशतसंख्या इति । तच्चैकम् आनन्तर्यात् । माषा इति तृतीय: पक्ष: ।

माषादिधान्यानां लोके आढकादिपरिमाणान्तरापेक्षया संख्याव्यवहारदर्शनात् माषदानेनापि भृतित्वसम्पादनाभावाच्च पशुरूपद्रव्यस्यैव तस्य इत्यनेन परामर्शात्, तत्रापि मौल्याधिक्यात् अश्वस्यैव ग्रहणम् । तत्रैव द्वादशशतसंख्याया: अन्वय: इति चतुर्थ: पक्ष: ।

सिद्धान्तस्तु – 'न केसरिणो ददाति' इत्यनेन लौकिकाश्वदानस्य निषेध: क्रियते । एवं सामान्यतः विहितदाने यत्र इच्छात: अश्वविषये प्रवृत्ति: तत्रापि न केसरिणो ददाति इति निषेधस्य प्रवृत्ति: । अत: प्रकृतं दानं गोविषयकमेव । तथा च महोपकारमुख्यगोमात्रविषयम् । द्वादशशतस्यापि तत्रैव निवेश: । अश्व: एक: देय: । कपिञ्जलाधिकरणन्यायेन अजाः त्रय: । माषादीनां परिमाणं स्वेच्छया अवधेयम् । सर्वथा गवामेव द्वादशशतम् । अत: विकृतौ द्वादशशतसंख्याबाधनिर्देश: "यावत्सहस्रस्य गौ:" इति सङ्गच्छते । अत: सहस्रादीनां गोवृत्तिसंख्याबाधकत्वस्यैव सिद्धे: अध्यायसङ्गतिरपि सङ्गच्छते ।

**********

# वाचोयुक्तीनां शब्दार्थविषयिणी जिज्ञासा

**श्रीउमामहेश्वरः एन्.**

व्याकरणविभागीयशोधच्छात्रः

**इदमन्धं तमःकृत्स्नं जायेत भुवनत्रयं ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥**

इत्याह कविनागो दण्डी । सत्यं विदितमेव समेषां नः शब्दार्थप्रपञ्चाभावे प्रपञ्चः शून्यायत एवेति । किन्तु परंतोपि वक्तव्यं नाम किमियं केवलं पदपदार्थैकनिष्ठेन अभिधाव्यापारेण तुष्यताम् आमन्दबुद्धिवेद्यानां पर्यन्तावसायिनी महाकवेरुक्तिरिति चेन्नेति निश्चयेन ब्रूमः । अभिधातिक्रान्तलक्षणाव्यञ्जनादिव्यापारैः

मोमुद्यमानानां सहृदयहृदयानां हृदयपर्यन्तावसायिनी साधूक्तिरिति चेन्नैवातिशयोक्तिः । तर्हि कास्ताः उक्तयः सहृदयहृदयतोषिण्यः इति जिज्ञासायां वक्रोक्ति- सूक्ति- चाटूक्ति- तन्त्रोक्ति- लोकोक्ति- तन्त्रयुक्ति- वचोविच्छित्ति- समासव्यासपदपद्धति- गमक- आभाणक- सुभाषित- शास्त्रलोकोभयन्याय-प्रहेलिका- निपातनादीनीति विवेक्तुमलम् । तत्रैव अन्यतमा वाचोयुक्तिरिति (ನುಡಿಗಟ್ಟು Idioms) वाग्रत्नं लालसीति सर्वास्वपि भाषासु । अभिधाव्यापारसहकृतबोधवती, लक्षणालक्ष्या, व्यङ्ग्यस्वारस्यसर्वस्वा, बह्वर्थगर्भा, नानाप्रसङ्गप्रयोज्या अनितरसाधारणसम्पद्वाचोयुक्तिः । संस्कृतशोधे सूर्यप्रभायितं जायमानं क्षेत्रं वाचोयुक्तिरिति सद्यःश्वसिति जीवो निरायासम् । तत्र हेतुःमहामहोपाध्यायः डा. रङ्गनाथशर्मवर्यः । तदीयमेव तद्विषयकमेव पद्यं किञ्चन-

**जीवातुः सर्वभाषाणां वाचोयुक्तिरियं पुनः ।**
**संस्कृते चापि विद्यन्ते वाग्विशेषाःपरश्शताः ॥**

साम्प्रतम् इह वाचोयुक्तिविषयकाः जिज्ञासाः विचार्यन्ते ।

**१) Idioms, ನುಡಿಗಟ್ಟು इति वक्तुं वाचोयुक्तिः इति शब्दः प्रशस्तः किम् ?**

गमकम्, निपातनम्, प्रौढिः, वचोविच्छित्तिः इत्येवं बहवः सन्ति शब्दाः परन्त्वेते एकदेशिनः सकलार्थाभिदायिनो न । महामहोपाध्यायैः डा. रङ्गनाथशर्मवर्यैः **भाषाजीवातुः वाचोयुक्तिः** इति शीर्षकोपेते लेखे प्रकृताभिप्राये वाचोयुक्तिः इति शब्दः प्रयुक्तः ।

यद्यपि पुरा वाचोयुक्तिशब्दः नानार्थेषु प्रायोजि । आधुनिकशोधार्थं नवज्ञानशाखात्वेन एतदाकारकशब्दानाम् अध्ययनार्थं च वाचोयुक्तिः इति शब्दः समीचीनतमः ।

**२) किं वाचोयुक्तिः निन्दाक्षेपभर्त्सनाद्येष्वेवार्थेषूपयुज्यते ?**

नेतीह समाधानम् । विषयेऽस्मिन् विद्वांसोपि भ्राम्यन्ति । अभिप्रेतार्थं स्वारस्येन पदसंक्षेपतो वाभिव्यक्तुं वर्वर्ति वाचोयुक्तिः । निन्दाद्यर्थेषु एव न तदितरेषु नानाभिप्रायेषु वाचोयुक्तयः लालसितीति विशेषः । तद्यथा पाणावामलकम्, रामबाणः, सुग्रीवाज्ञा, भगीरथयत्नः, भीष्मप्रतिज्ञा... इत्येवं वाचोयुक्तयः प्रशंसाप्रकर्षाय प्रयुज्यन्ते ।

**३) वाचोयुक्तिः शब्दमूला आहोस्विद् अर्थमूला ?**

या काचिदपि स्याद्भाषा तस्याः सौन्दर्यम् अर्थाश्रितं शब्दाश्रितं भवत्येव । वाचोयुक्तिषु वर्णनियमः, अक्षरसंख्या, विकल्पः, अनुप्रासः, यमकम् इत्यादिशब्दगताः गुणा अकिञ्चित्कराः । पुनश्च एतादृशान् अभिव्यक्तुं वर्तते वचोविच्छित्तिरिति संज्ञान्तरम् ।


ISSN: 2320-740X

युक्तिविच्छित्तिशब्दयोः वर्तते भेदः । विच्छित्तिः केवलं वक्रताम् उत सौन्दर्यमाह । युक्तिस्तु विच्छित्तिप्रतिपाद्यमप्यन्तर्भाव्य व्याकरणस्वारस्यतः अर्थालङ्कारपर्यन्तगामिनी, वक्तुः मुखतः प्रसृता बोद्धुः बुद्धिभावान्तव्यापिनी, इयं न केवलं अभिप्रेतार्थबोधिनी अपि तु श्रोतृचित्तस्पन्दयित्री अतः तत्तादृशी वाचं श्रिता युक्तिः वाचोयुक्तिः । इयञ्च अर्थमूला परमार्थमूलेति च विदितमेव ।

**४) वाचोयुक्तीनां निर्माणं शक्यं किम् ?**

शब्दरचना इत्येव शब्दो लोके प्रयुज्यते न तु अर्थरचनेति तस्याश्च अशक्यत्वात् । **अर्थं बुद्ध्वा शब्दरचना** इत्यादिसिद्धान्ता अस्मत्पदशास्त्रे प्रतिपादितपूर्वाः । वाचोयुक्तिर्न केवलं कञ्चन पदार्थमाश्रित्य प्रवर्तते । सन्दर्भं प्रसङ्गं स्वभावं वा श्रित्वा प्रवर्तते । किञ्च तत्तद्वाचोयुक्तीनां मूलानि येऽर्थाः सन्ति ते लोके रूढाः परम्परागताः, स्वरससन्दर्भसन्दृब्धाः, संस्कृतिसम्पुष्टा, जनमानससिंहासनारूढाः च विद्योतन्ते । अतः अर्थदृष्ट्या अमूनां निर्माणं दुस्साध्यं कष्टसाध्यं वा तदपि प्रतिभावताम् । वाचोयुक्तिरचना न समान्यवाक्यरचनायितम् ।

किञ्च पदेन पदान्तरेण समाना वाचोयुक्तिः प्रयोक्तुं शक्या । नूत्ना वा निर्मातुं शक्या न तु अर्थदृशा । तद्यथा वैयर्थ्यबोधिकाः वाचोयुक्तयः - चर्वितचर्वणं, पिष्टपेषणम्, अरण्यरोदनम्, आकाशालिङ्गनम् इत्यादयः । एवमेव तदभिप्राय एव प्रकृतलेखकेन **जीर्णवृक्षपरिष्वङ्गः** इति वाचोयुक्तिः निर्मिता पददृशा नवीनं न त्वर्थदृशा । परन्तु लोका यथा यथा एधन्ते वर्धन्ते तत्र च नूत्ना अभिप्रायाः सृष्टा भवन्ति तथैव वाचोयुक्तिः स्वयमेव सृज्यते तेनैव लोकेन । किञ्च व्याकरणबलं नैव वाचोयुक्तीः निर्मापयतीत्यप्यवितथं सत्यम् ।

**५) उपमानपूर्वपदबहुव्रीहिशब्दाः सर्वेऽपि किं वाचोयुक्तयः ?**

सर्वेऽपि न वाचोयुक्तयः परन्तु बह्वधिकाः तत्र वाचोयुक्तय एव । तद्यथा भगीरथयत्नः, भीष्मप्रतिज्ञा, रामबाणः, सुग्रीवाज्ञा... इत्यादयः । वृकोदरा इत्यादयो यद्यपि तत्समसमासजाता एव परन्तु न ते वाचोयुक्तयः ।

**६) वाचोयुक्तीनां किम् भाषान्तरं शक्यम् ?**

क्वचित्साध्यं परन्तु प्रत्येकमपि भाषायाः स्वीयाः स्वाभावाः, गुणधर्माः, शैली, परम्परा, संस्कृतिः, भाषासंस्कृतिः लेखनरीतिः इत्यादयो गुणधर्मा भवन्ति भिद्यन्ते च अतो भाषान्तरं न सुलभम्।परन्तु सर्वभाषास्वपि वाचोयुक्तयो भवन्तीति कारणतः नानाभाषाभिज्ञाःविभिन्नभाषासु स्थितानां

समानार्थकानां वाचोयुक्तीनां कोषं निर्मान्ति चेदुत्तमम् ।

**७) वाचोयुक्तिबोधने किं संस्कृतिरपि हेतुः?**

ओम् इति समाधीयतेऽत्र । पादाभिवन्दनम्, देवदर्शनं, प्रदक्षिणं इत्यादयः धार्मिकसांस्कृतिकाः शब्दाः वैदेशिकैः परम्परान्तरपरैः यथा न मनसा बुद्ध्यन्ते तद्वदेव वाचोयुक्तयोपि न बुद्ध्यन्ते । वस्तुतः देश- भाषा- संस्कृतीनां परमं घनिष्ठं बान्धव्यं ता एव निरूपयन्ति।अस्मद्देशे भाषा नाना स्युः परन्तु संस्कृतिःसमाना एव । अतः सामानार्थकवाचोयुक्तयः प्राप्यन्ते भारातीयभाषास्वेव ।

**८) किं संस्कृतभाषायां वाचोयुक्तयो विरलाः किं सद्यः लोकव्यवहारे नोपयुज्यन्ते ?**

वेदोपवेद- वेदाङ्ग- पुराणेतिहास- शास्त्र- आस्तिकनास्तिकदर्शन- काव्य- कोश- गद्य- पद्य- चम्पू-नाटकात्मकवाङ्मयब्रह्मापरम् अभिव्याप्य आ सहस्राधिकवर्षेभ्यः सनातनभारातीयां संस्कृतिं प्राणयन्त्यां संस्कृतभाषायां सहस्रशः सन्ति वाचोयुक्तयः । तासां सद्यः प्रयोगाय यत्नो विधेयः कश्चन ।

**यदि नाम पुरेवेदं रोचयेत्संस्कृतं जनः ।**
**शर्करामिव गोक्षीरे वाचोयुक्तिं निवेशय ॥**

***************

# गृहदेवालयादिनिर्माणे चत्वारः शिल्पिनः

**श्री गणेशकृष्णभट्टः**
ज्योतिषविभागीयशोधच्छात्रः

वेदस्याङ्गभूते ज्योतिश्शास्त्रे विद्यमानेषु सिद्धान्त-संहिता-होरेति त्रिषु स्कन्धेषु संहितास्कन्धान्तर्गतोऽयं वास्तुशास्त्रविचारः । अस्माभिः भारतीयैः वास्तुशास्त्रोक्तभवननिर्माणविधिः प्रधानतया प्रकारत्रयेण स्वीकृतः । देवभवनम्, राजभवनम्, सामान्यभवनम् चेति प्रकारत्रयम् । तत्र साधारणभवनेऽपि पुनः वैविध्यं वर्तते । मया सम्प्रत्यत्र सामान्यभवननिर्माणे अपेक्षितानां स्थपत्यादीनां विषये निरूप्यते । **“वास्तु ब्रह्मा ससर्जादौ विश्वमप्यखिलं तथा, चतुःप्रकारं स्थापत्यमष्टधा च चिकित्सितम्, धनुर्वेदश्च सप्ताङ्गो ज्योतिषं कमलालयात्”** इत्युक्तरीत्या स्थापत्यं चतुर्विधात्मकं भवति । ग्रन्थातरेषूक्तरीत्या मया अपि शिल्पिनः इति नाम्ना स्थपत्यादीनां ग्रहणं कृतम् ।


ISSN: 2320-740X

एवमादौ चतुर्णां शिल्पिनां कथनं मनुष्यालयचन्द्रिकायां यथा –

**स्थपतिः सूत्रग्राही तक्षकसंज्ञश्च वर्धकिः क्रमशः ।**

**स्वोचितकर्मणि दक्षा ग्राह्यास्ते कारवश्चतुर्धेति ॥**[1]

एतेषां चतुर्णां लक्षणं निरूप्यते -

1. **स्थपतेः गुणाः, लक्षणं प्रयोजनञ्च –** तत्रादौ स्थपतिलक्षणं वास्तुविद्यायां यथा- **स्थपतिः स्थापनार्हः स्यात् सर्वशास्त्रविशारदः**[2] इति । तथैव हीनाङ्गः, अतिरिक्ताङ्गो वा न स्यात्, तथा धार्मिकः, दयापरः, मात्सर्यरहितः, अनसूयः, तान्त्रिकः, अभिजातः च स्यात् । एवमेव गणितज्ञः, पुराणज्ञः, आनन्दात्मा, अलुब्धकः, चित्रज्ञः, सर्वदेशज्ञः, सत्यवादी, जितेन्द्रियश्च भवेत् । पुनश्च स्थपतिः अरोगी, अप्रमादी, सप्तव्यसनवर्जितः, सुनामा, दृढबुद्धिरथवा दृढबन्धुः, वास्तुविद्याख्याब्धेः पारगश्च स्यात् । मनुष्यालयचन्द्रिकायां तु स्थपतिलक्षणम् एवं गदितम् – स्थपतिः सर्वशास्त्रविहितक्रियापटुः, सर्वदा अवहितमानसः, शुचियुक्तः, धार्मिकः, विगतमत्सरः, सत्यवादी, एवमीदृशः भवेदिति ।

2. **सूत्रग्राहिलक्षणम् –** सूत्रग्राहिणः प्रमुखलक्षणं तु सः स्थपतेः पुत्रः शिष्यो वा भवेत् । एवं स च सर्वकर्मविशारदो भूत्वा स्थपत्याज्ञानुसारी अपि स्यात् । एवं सूत्रदण्डप्रमाणज्ञः मानोन्मानप्रमाणवित् च भवेत् । चन्द्रिकायां **सूत्रग्राही सुतो वा स्थपतिमतिगतिप्रेक्षकः शिष्यको वा**[3] इत्युक्तत्वात् वैषम्यं न दृश्यते ।

3. **वर्धकिः -** वर्धकिलक्षणमुच्यते वास्तुविद्यायां **वृद्धिकृद् वर्धकिः प्रोक्तः सूत्रग्राह्यनुगः सदा**[4] इत्यादिना । तक्षकेण तक्षितानां दार्वादीनां परस्परसंयोजनं येन क्रियते सः वर्धकिरित्युच्यते । स च सूत्रग्राह्यनुगः भवेदिति । मनुष्यालये **दार्वाद्यन्योन्यसम्मेलनपटुरुदितो वर्धकिः सावधानः**[5] इति ।

4. **तक्षकलक्षणम् – तक्षणात् स्थूलसूक्ष्माणां तक्षकः स तु कीर्तितः**[6] इत्यादिना स्थूलसूक्ष्माणां दार्वादीनां तक्षणं करोति यः सः तक्षक इत्युक्तम् । पुनः सः मृत्कर्मज्ञः, गुणी, शक्तः, सर्वकर्मस्वतन्त्रगः, गुरुभक्तः,

---

[1] म.च – १/११

[2] वा.वि – १/१२

[3] म.च- १/१३

[4] वा.वि - १/१७

[5] म.च - १/१३

[6] वा.वि - १/१८

सर्वदा हृष्टः, सर्वदा स्थपत्याद्यनुगः च भवेत् ।

मनुष्यालये तावत् – **स्थूलानां तक्षणात्तक्षक इति कथितस्सन्ततं हृष्टचित्त**[1] इत्युक्तम् । तेन च लक्षणं समानमेव वर्तते ।

अन्ते च स्थपत्यादीनां सर्वेषामपि समूहस्य महत्त्वं कथयति वास्तुविद्याकारो यथा – **एभिर्विनापि सर्वेषां कर्म कर्तुं न शक्यते । तस्मादेतत् सदा पूज्यं स्थपत्यादिचतुष्टयम्** [2] इत्यादिना । अर्थात् स्थपतिः, सूत्रग्राही, वर्धकिः, तक्षकः इति चतुर्भिर्विना लोके गृहनिर्माणकार्यम्, सुकृतं ग्रहीतुं न शक्यते, यत्किमपि वास्तुकार्यं च न सम्भवत्येव । तस्मात् ते सर्वेऽपि पूज्या एव । गृहनिर्मात्रा यजमानेन स्वगुरुणा सहैव स्थपत्यादीन् चतुरः अपि आहूय गृहनिर्माणे तेषां मार्गदर्शनं साहाय्यं च स्वीकार्यम् । तेन सः नूतनतया निर्मितगृहे सुखेन वासं कर्तुं शक्नुयात् ।

मनुष्यालयेऽपि **विना स्थपत्यादिचतुष्टयेन गृहादि कर्तुं न च शक्यतेऽस्मात्, प्रसादितैस्तैरथविप्रवर्यः सुसूक्ष्मधीः कारयतां गृहाणि**[3] इत्यनेन स्थपत्यादिभिर्विना किमपि साधयितुं न शक्यते । तस्मात् गुरुणा ते सर्वे सार्धं नेतव्या इति प्रोक्तम् ।

समराङ्गणसूत्रधाराख्ये ग्रन्थे स्थपतिलक्षणं बहुभिः श्लोकैः प्रतिपादितम् । तेषु च प्रधानभूताः –

**शास्त्रं कर्म तथा प्रज्ञा शीलं च क्रिययान्वितम् ।**
**लक्ष्यलक्षणयुक्तार्थशास्त्रनिष्ठो नरो भवेत् ॥**
**प्रसिद्धशास्त्रदृष्टान्तैर्वास्तुज्ञानं प्रसाधयेत् ।**
**वास्तुनः ससिरावंशैर्मर्मवेधैः सुनिश्चितैः ॥**
**ज्ञानवांश्च तथा वाग्मी कर्मस्वपि च निष्ठितः ।**
**एवं युक्तोऽपि न श्रेयान् यदि शीलविवर्जितः ॥**[4]

मयमताख्ये ग्रन्थे तावच्छिल्पिलक्षणं पञ्चमेऽध्याये द्वादशभिः श्लोकैः प्रोक्तं वर्तते । तेषु केचन यथा-

स्थपतिः -

---

[1] म.च – १/१३

[2] वा.वि – १/२०

[3] म.च - १/१४

[4] स.सू. – ४४/२,५,१६


ISSN: 2320-740X

**स्थपतिः स्थापनार्हः स्यात् सर्वशास्त्रविशारदः ।**
**न हीनाङ्गोऽतिरिक्ताङ्गो धार्मिकस्तु दयापरः ॥**

सूत्रग्राही –

**सुनामा दृढबुद्धिश्च वास्तुविद्याब्धिपारगः ।**
**स्थपतेस्तस्य शिष्यो वा सूत्रग्राही सुतोऽथवा ॥**

तक्षकः –

**शैलदार्विष्टकादीनां सूत्रग्राहिवशानुगः ।**
**तक्षणात्स्थूलसूक्ष्माणां तक्षकः स तु कीर्तितः ॥**

वर्धकिः –

**मृत्कर्मज्ञो गुणी शक्तः सर्वकर्मस्वतन्त्रकः ।**
**तक्षितानां तक्षकाणामुपर्युपरि युक्तितः ॥**[1]

**एतोषामुपयोगः -** पुनः विशेषतया एतेषां चतुर्णामुपयोगः निरूप्यते । गृहस्य अथवा देवालयस्य निर्माणे मार्गदर्शनं कृत्वा निर्माणापेक्षितयोजनायाः निर्माणं स्थपतिना कार्यम् । भवननिर्माणस्य विचारणं कुर्वन् लोपदोषाः यथा न भवेयुः तथा जागरणं सूत्रग्राहिणः कार्यम् । निर्माणार्थमपेक्षितानां काष्ठानां शिलानाम् इष्टिकानां च भवनानुगुणं विन्यासं करोति तक्षकः । तक्षकेण साधितानां विविधवस्तूनां शास्त्रोक्तरीत्या संयोजनं कृत्वा आलयस्य रूपवर्धनं करोति वर्धकिः । इत्थमेते चत्वारः कार्याङ्गभूताः भवन्ति । एषां कार्याङ्गभूतानां सहयोगेनैव गृह-देवालयादीनां निर्माणं भवतीत्यतः महानुपयोगः वर्तत एव । तस्मात् तेभ्यः स्थपत्यादीनि नामानि तेषां कर्मानुगुणम् अन्वर्थकान्येव भवन्ति इति तु ज्ञातव्यमेव ।

*************

[1] म.म. – ५/१५,१८,२०,२१

# रसमूलतावादस्य विविधानां पक्षाणां पर्यवेक्षणम्

**श्री ब्रजेशकश्यपः**
साहित्यविभागीयशोधच्छात्रः

**सारांशः**

भारतीयकाव्यशास्त्रे रसवादिभिः विद्वद्भिः काव्यविश्लेषणे रसः परमप्रयोजनत्वेन स्वीकृतः। तस्य च भरतमुनिप्रतिपादितदिशा विभावानुभावादिभिः निष्पत्तिः व्याख्यायते । किन्तु कैश्चिद्विद्वद्भिः साक्षादेव विभावादिभिः सर्वेषां रसानां निष्पत्तिमनादृत्य ब्रह्ममूलता, अहङ्कारमूलता, चमत्कृतिमूलता किञ्च रसमूलता अपि सिद्धान्तत्वेन प्रतिपादिता । तत्रापि रसमूलतायां कस्यचिदभिमतं तावत् करुण एव सर्वेषां रसानां मूलमिति, अपरस्य तावत् शृङ्गार एव, अन्यस्य पुनरद्भुत एव, तदितरस्य पुनः शान्त एव इतीमे एकरसमूलतापक्षाः । अथापि अन्तरा इमान् पक्षान् रसचतुष्टयमूलतापक्षस्याप्यपरः दृश्यते कश्चन पन्थाः । स च नैकस्माद्रसादपि तु रसचतुष्टयात् रसान्तराणामुत्पत्तिः इति व्याख्यानात् प्रसिद्ध्यति ।

**कूटशब्दाः** – रसः, रसमूलतावादः, शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः, शान्तः, ब्रह्म, अभिमानः, अहङ्कारः, चमत्कृतिः, विभावः, अनुभावः, विभावादिमूलतावादः, ब्रह्ममूलतावादः, अहङ्कारमूलतावादः, चमत्कृतिमूलतावादः, रसमूलतावादः, एकरसमूलतावादः, करुणैकमूलतावादः, शृङ्गारैकमूलतावादः, अद्भुतमूलतावादः, शान्तैकमूलतावादः, रसचतुष्टयमूलतावादः इत्यादयः ।

**परिचयः**

काव्यानां मीमांसायै यच्छास्त्रं तत्काव्यशास्त्रमित्युच्यते । तत्र तावत् बहवः विषयाः भवन्ति विवेच्याः । तथाहि - काव्यशरीरघटकौ शब्दार्थौ, शब्दादर्थबोधजनकाः अभिधालक्षणाव्यञ्जनाप्रभृतयः शब्दार्थसम्बन्धाः, शब्दार्थानां सौन्दर्याधायकाः सौन्दर्याभिवर्द्धकाश्च रीतिगुणालङ्कारप्रभृतयः अपकर्षकाश्च दोषप्रभृतयः धर्माः, काव्यस्य भेदाः प्रभेदाश्च, वृत्तं तन्निबन्धनप्रकाराः, कविशिक्षाविषयाश्च भूयांसः, प्रयोजनानि, कारणानि च, अन्यानि च बहूनि अङ्गजातानि तत्त्वान्येषामुक्तानां प्रमेयाणाम् । तत्र तावत् सत्स्वपि बहुषु प्रयोजनेषु काव्यस्य परमं प्रयोजनं तु रस एव[1] इति भूयोविदुषां मतम् ।

---

[1] सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादसमुद्भूतं वगलितवेद्यान्तरमानन्दम् ॥ काव्यप्रकाशः, पृ. – ५-६ ॥ इत्यादयः ।


ISSN: 2320-740X

स च रसः महान् रसस्कन्धविचारसमुपस्थापनाविषयः काव्यशास्त्रिणाम् । तत्र हि – किं स्वरूपं रसस्य, क्व चावस्थितिरस्य, कति च प्रकाराः, का च बोधप्रक्रिया, कथं च निबध्यते प्रबन्धेषु, कान्यस्य बाधकतत्त्वानि, प्रबन्धवैचित्र्ये किम्प्रकृतिके प्रबन्धे कः रसः अनुकूलतां भजते कश्चाननुकूलतां, क्व च प्रबन्धे कस्य निबन्धनं कर्त्तव्यं क्व च परिहर्त्तव्यं, कीदृशः रसानामङ्गाङ्गिभावः इत्येवम्प्रभृतयः अन्ये चानेके विषयाः ।

तत्र तावत् रसस्य मूलं किमित्यपि एकः विकीर्णः रसमीमांसाविषयः । स च क्वचित् काव्यशास्त्रीयप्रबन्धेषु निबद्धः, उद्धृतः वा, क्वचिच्च काव्यशास्त्रीयप्रबन्धान्तरेषु काव्यादिष्वपि विद्वद्भिः तत्र तत्र सङ्केतितः । ते तावत् समाहृत्यात्र विवेच्यन्ते ।

**भरतमुनेः रससूत्रम्**

नाट्यशास्त्रन्तावत् विद्वत्सु प्रथिता कृतिर्मुनेः भरतस्य । तत्र षट्त्रिंशदध्यायेषु नाट्यस्य साङ्गोपाङ्गं विवेचनं कृतमाचार्येण मुनिना । तत्रैव षष्ठसप्तमाध्याययोः प्रमुखत्वेन रसविषयः प्रस्तुतः । तत्र सारभूतं भवति तावत् रससूत्रं[1] यच्च उत्तरवर्त्तिभिः सर्वैरपि काव्यशास्त्रिभिः समादृतः, अद्यत्वेऽपि प्रामाणिकवाक्यत्वेन प्रमाणत्वेन सर्वैः विद्वद्भिः तत्र तत्रावसरे उद्ध्रियते उद्घुष्यते च ।

**रसमूलस्य शास्त्रीया मीमांसा विकीर्णाः पक्षाश्च**

रसमीमांसायाः शास्त्रीया विचारधारा अतीवायता वर्तते । तत्र रसमूलतामधिकृत्य तावत् ये पक्षास्सन्ति ते संक्षिप्यैवं प्रदर्शयितुं शक्यन्ते -

- **विभावादिमूलतावादः**
- **ब्रह्ममूलतावादः, अहङ्कारमूलतावादः, अभिमानमूलतावादश्च**[2]
- **चमत्कृतिमूलतावादः**
- **रसमूलतावादः**
    - **एकरसमूलतावादः**
        - ✓ **करुणैकमूलतावादः**
        - ✓ **शृङ्गारैकमूलतावादः**
        - ✓ **अद्भुतमूलतावादः**

---

[1] तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ॥ अध्यायः – ६, नाट्यशास्त्रम्, पृ. - २७२ ॥

[2] अत्र अहङ्कारः अभिमानञ्च पृथक् वस्तुनी इति ज्ञातव्या ।

✓ **शान्तैकमूलतावादः**

➢ **रसचतुष्टयमूलतावादः**

**१. रसमूलतायाः विविधाः पक्षाः ।**

**विभावादिमूलतावादः**

अयं पक्षस्तावत् न कस्याप्यनभिमतः । पक्षान्तरमपि मन्वाना आचार्याः यद्यपि आपाततः अमुं पक्षं तिरस्कुर्वाणाः प्रतीयन्ते किन्तु न तथा अपितु पक्षमेनं समाद्रियन्ते एव यतो हि नहि अनेन पक्षेण साकं प्रायेण कस्यचिद्विरोधः भवति । अस्य पक्षस्य बीजं तावत् मुनेः भरतस्य नाट्यशास्त्रे प्रस्तुतं सूत्रमेव[1] । अन्ये तु प्रायस्तस्य अनुकरणमेव कुर्वन्ति ।

**ब्रह्ममूलतावादः, अहङ्कारमूलतावादः, अभिमानमूलतावादश्च**

अमी त्रयोऽपि पक्षाः अग्निपुराणे उल्लिखिताः[2] । एतदनुसारेण च सनातनात् अक्षरात् अजात् विभोः चैतन्यपदवाच्यात् ज्योतिषः परब्रह्मणः आनन्दस्य व्यक्तिर्भवति स एव रस इत्युच्यते । तस्य परब्रह्मणः आद्यः विकारः अहंकारः भवति, ततः अभिमानः जायते, ततः रत्यादिक्रमेण प्रथमं चतुर्णां रसानामुत्पत्तिः ततोऽन्येषां रसानामुत्पत्तिः[3] । ततश्च भोजराजस्य शृङ्गारप्रकाशे अत एव अनुकृत्य शृङ्गारस्य अहङ्कारमूलतावादः प्रतिष्ठापितः ।

**चमत्कृतिमूलतावादः**

अत्र मते तावत् सर्वेषु रसेषु चमत्कार एव प्राणभूत इति कृत्वा चमत्कृतेरेव रसमूलत्वं स्वीक्रियते । अस्य विशेषः एकरसमूलतावादस्य अद्भुतमात्रमूलतापक्षे द्रष्टव्यः ।

---

[1] रससूत्रमित्यभिप्रायः ।

[2] अक्षरं परमं ब्रह्म सनातनमजं विभुम् । वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम् ॥१॥
आनन्दः सहजस्तस्य व्यज्यते स कदाचन । व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वया ॥२॥
आद्यस्तस्य विकारो यः सोऽहंकार इति स्मृतः । ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम् ॥३॥
अभिमानाद्रतिः सा च परिपोषमुपेयुषी । व्यभिचार्यादिसामान्याच्छृङ्गार इति गीयते ॥४॥
तद्भेदाः काममितरे हास्याद्या अप्यनेकशः । स्वस्वस्थायिविशेषोऽथ परिघोषस्वलक्षणाः ॥५ ॥ अग्निपुराणम्, पृ. – ३७-३८ ॥

[3] अस्य च विशेषतः विविच्य प्रतिपादनं '*अग्निपुराणे रसमीमांसा*' इत्याख्ये शोधपत्रे मया कृतं यत् रा.सं.सं. शृंगेरीतः शारदापत्रिकायां २०१९ वर्षे प्रकाशितञ्च ।


ISSN: 2320-740X

**रसमूलतावादः**

इदं मतं तावत् अतीव विलक्षणम् । यतो हि रसस्य मूलत्वेन रसः एव अन्विष्यते अथवा रसा एव अन्विष्यन्ते । अत्र मते तावत् केचन रसाः प्रारम्भिकाः अथ केचन तन्मूलाश्च भवन्तीति व्याख्यायते । तत्रापीदं वैलक्षण्यं दृश्यते यत् केचन विद्वांसः एकरसमूलतावादमथ केचन च रसचतुष्टयमूलतावादं ब्रुवते इत्येवं द्विधा गतिरत्र पर्यालोचयितुं शक्यते । एकरसमूलतावादेऽपि पुनः करुणैकमूलतावादः, शृङ्गारैकमूलतावादः, अद्भुतमूलतावादः, शान्तैकमूलतावादः इतीमे विविधाः पक्षाः दृश्यन्ते ।

**रसचतुष्टयमूलतावादः**

अयमपि पक्षस्तावत् अग्निपुराणे द्रष्टुं शक्यते । तथाहि परमात्मनः चतसृभ्यो वृत्तिभ्यः चत्वारः प्राथमिकाः रसाः जायन्ते । ते च सन्ति शृङ्गार–रौद्र-वीर-बीभत्साः[1] । तथाहि -

१) रागात् – शृङ्गारः

२) तैक्ष्ण्यात् – रौद्रः

३) अवष्टम्भात् – वीरः

४) सङ्कोचात् – बीभत्सः

**२. अग्निपुराणदिशा परमात्मवृत्तिभ्यः प्रारम्भिकाणां चतुर्णां रसानामुत्पत्तिक्रमप्रदर्शनम् ।**

अथ एतेभ्यो रसेभ्योऽन्ये चत्वारः रसाः उत्पद्यन्ते हास-करुण-अद्भुत-भयानकाः2 । तथाहि –

१) शृङ्गारात् – हासः

२) रौद्रात् – करुणः

३) वीरात् – अद्भुतः

४) बीभत्सात् – भयानकः

**३. अग्निपुराणदिशा प्रारम्भिकेभ्यः चतुर्भ्यः रसेभ्यः चतुर्णां रसान्तराणामुत्पत्तिक्रम -प्रदर्शनम् ।**

एवं चतुर्भ्यो रसेभ्यः चत्वारोऽन्ये रसाः जायन्ते इति आग्नेयपुराणानुरूपः रसस्य रसमूलतासिद्धान्तः । तत्रापि शान्तस्य स्थितिः न प्रदर्शिता वर्तते इदं विशिष्टतया ध्येयम् ।

---

[1] सत्त्वादिगुणसंतानाज्जायन्ते परमात्मनः । रागाद्भवति शृङ्गारो रौद्रस्तैक्ष्ण्यात्प्रजायते ॥६॥

वीरोऽवष्टम्भजः सङ्कोचभूर्बीभत्स इष्यते ।७-१/२॥अग्निपुराणम्, पृ.-३८॥

[2] शृङ्गाराज्जायते हासो रौद्रात्तु करुणो रसः ॥७॥

वीराच्चद्भुतनिष्पत्तिः स्याद् बीभत्साद् भयानकः ।८-१/२॥अग्निपुराणम्, पृ.- ३८ ॥

अथ भारतीये नाट्यशास्त्रेऽपि रसचतुष्टयवादस्य पक्षः अनुसृतः दृश्यते[1] । अत्रापि अग्निपुराणवत् तावत् प्राथमिकाः चत्वारः रसाः स्वीकृताः ते च त एव ये अग्निपुराणे उक्ताः । ततश्च तेभ्योऽन्येषां चतुर्णां रसानामुत्पत्तिः व्याख्याता तेऽपि तेनैव क्रमेण त एव च ये अग्निपुराणे उक्ताः । तथाहि – प्रथमं शृङ्गार-रौद्र-वीर-बीभत्सानामुत्पत्तिः ततस्तेभ्यः हास्य-करुण-अद्भुत-भयानकानां रसानामुत्पत्तिः ।

**अनयोस्तुलना –**

यद्यपि अग्निपुराणे नाट्यशास्त्रे च रसचतुष्टयमूलतायां समानता वर्तते तथापि प्राथमिकानां रसानां परमात्मवृत्तिचतुष्टयोत्पन्नत्वं न नाट्यशास्त्रे प्रतिपादितं वर्तते इति नाट्यशास्त्रापेक्षया अग्निपुराणे वैलक्षण्यमथ अग्निपुराणापेक्षया नाट्यशास्त्रे तावदयं विशेषः यत् शृङ्गारादीनां प्राथमिकानां चतुर्णाम् अनन्तरभाविनां हास्यादीनां प्रति कीदृशी कारणता इति न व्याख्यातम् अग्निपुराणे किन्तु नाट्यशास्त्रे तदपि व्याख्यातम् । तथाहि –

१) शृङ्गारस्य अनुकृतिः हास्यः ।

२) रौद्रस्य कर्म करुणः ।

३) वीरस्य कर्म अद्भुतः ।

४) बीभत्सदर्शनं भयानकः ।

**४. नाट्यशास्त्रदिशा प्राथमिकरसेभ्यो रसान्तरोत्पत्तौ विशेषनिरूपणम् ।**

**एकरसमूलतावादे करुणमात्रमूलतापक्षः**

अयं पक्षस्तावत् कस्मिँश्चित् काव्यशास्त्रीये प्रबन्धे न प्रतिपादितः । अपितु उत्तररामचरिताख्ये रूपके संवादत्वेनोपनिबद्धः[2] । इत्येवं क्वचित् लक्ष्यग्रन्थे कस्यचित्संवादत्वेनोपनिबद्धस्य वाक्यस्य शास्त्रीयसिद्धान्तत्वेन ख्यापनं कियदुचितमित्यत्र स्यात् विद्वत्सु विवादः, किन्तु राजशेखरेण तावत् प्रतिभाविषये कालिदासस्य

---

[1] तेषामुत्पत्तिहेतवश्चत्वारो रसाः । तद्यथा – शृङ्गारो रौद्रो वीरो बीभत्स इति । अत्र –

शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः । वीराच्चेवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥३९॥

शृङ्गारानुकृतिर्या तु स हास्यस्तु प्रकीर्तितः । रौद्रस्यैव यत्कर्म स ज्ञेयः करुणो रसः ॥४०॥

वीरस्यापि च यत्कर्म सोऽद्भुतः परिकीर्त्तितः । बीभत्सदर्शनं यच्च ज्ञेयः स तु भयानकः ॥४१॥ नाट्यशास्त्रम्, पृ. – २९५-२९८ ॥

[2] एको रसः करुण एव निमित्तभेदाद्भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान् । आवर्त्तबुद्बुदतरङ्गमयान् विकारानम्भो यथा सलिलमेव तु तत् समग्रम् ॥ उत्तररामचरितम्, पृ. – १२२ ॥ अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः । पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥ उत्तररामचरितम्, पृ. – ७३ ॥



ISSN: 2320-740X

काव्यस्थमपि पद्यमुद्धृत्य शास्त्रीयसिद्धान्तत्वेन ख्यापनं कृतम्[1] । अतः काव्यशास्त्रिणामाचार्याणां तथा अभिमतमेव स्यात् यत् क्वचित् कवयोऽपि स्वीयशास्त्रीयानभिमतान् काव्यकृतिष्वपि निबध्नन्ति । करुणमात्रमूलतापक्षस्य तु तावदेष अभिप्रायः – यद्यथा जले बुद्बुदविकाराः (फेन इव किञ्चित्) जायन्ते तस्य तु बहुत्वं, किन्तु वस्तुतस्तु सर्वम् एकमेव जलमेव तथा यद्यपि भिन्नान् आधारान् आश्रित्य निमित्तभेदात् करुण एव रसः नानारसत्वमाप्नोति तथापि वस्तुतः रसस्तु करुण एव, एक एव च ।

**एकरसमूलतावादे शृङ्गारैकमूलतावादः**

अयं पक्षः भोजराजस्य वर्तते । तस्य शृङ्गारप्रकाशाख्ये ग्रन्थे आदावेव तावत् शृङ्गारमात्रस्य रसत्वप्रतिज्ञा[2], अन्याचार्याभिमतरसान्तरस्य रसत्वनिवर्त्तनप्रतिज्ञा[3] च दृश्यते । अस्याभिमतम् आत्मनि अहङ्कृतस्य गुणविशेषः स्थितः भवति स एव शृङ्गार उच्यते न तु रत्यादिः भावः । अथ शृङ्गार एवैकः रसः[4] न तु अन्यः कश्चनापि । अयमेव च शृङ्गारः मानवतो जनस्य स्वदते । रत्यादिषु च या रसोक्तिर्वर्तते सा वितथा उक्तिः वर्तते । एकोनपञ्चाशद्भावाः शृङ्गारमेव परिपोषयन्ति ।

**अद्भुतमूलतावादः, चमत्कृतिमूलतावादश्च**

इमौ पक्षौ यद्यपि भिन्नौ प्रतीयेते तथापि अस्य उद्धरणम् एकस्यैव विदुषः मतव्याख्यानमिषेण प्रस्तुतमथ अद्भुतमूलतावादपक्षः चमत्कृतिमूलतावादस्य पल्लवितमिति प्रतीयते । इमौ पक्षौ यद्यपि काव्यशास्त्रीये ग्रन्थे उपलभ्येते तथाप्यनयोः विस्तृतं विवेचनं न प्राप्यते अपितु चमत्कृतिमात्रमूलतावादः किञ्च अद्भुतमात्रमूलतावादः अपि रसमूलतायां कौचन पक्षौ आस्तामिति वर्णितं केनचिदित्येतावन्मात्रमुद्धृतं वर्तते साहित्यदर्पणे । इदञ्च मतं

[1] कः पुनरनयोर्भेदो यत्कविर्भावयति भावकश्च कविः इत्याचार्याः । तदाहुः – प्रतिभा तारतम्येन प्रतिष्ठा भुवि भूरिधा । भावकस्तु कविः प्रायो न भजन्त्यधमां दशाम् ॥
न इति कालिदासः । पृथगेव हि कवित्वाद्भावकत्वं, भावकत्वाच्च कवित्वम् । स्वरूपभेदाद्विषयभेदाच्च । यदाहुः – कश्चिद्वाचं रचयितुमलं श्रोतुमेवापरस्तां कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति । न ह्येकस्मिन्नतिशयवतां सन्निपातो गुणानामेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः ॥ काव्यमीमांसा, पृ. – १३-१४ ॥

[2] शृङ्गार-वीर-करुणाद्भुत-रौद्र-हास्य-बीभत्स-वत्सल-भयानक-शान्त-नाम्नः । आम्नासिषुर्दश रसान् सुधियो वयं तु शृङ्गारमेव रसनाद् रसमामनामः ॥ १/६ प्रकाशः, शृङ्गारप्रकाशः, पृ.- २ ॥

[3] वीराद्भुतादिषु च येह रसप्रसिद्धिः सिद्धा कुतोऽपि वटयक्षवदाविभाति । लोके गतानुगतिकत्ववशादुपेतामेतां निवर्त्तयितुमेष परिश्रमो नः ॥ १/७ प्रकशः, प्रकाशः, शृङ्गारप्रकाशः, पृ.- २ ॥

[4] अतः सिद्धमेतत् । ... । शृङ्गार एवैकश्चतुर्वर्गैककारणं रस इति । शृङ्गारप्रकाशः, पृ.- २ ॥

विश्वनाथस्य वृद्धप्रपितामहस्य इति तदुल्लेखेन ज्ञायते[1] । साहित्यदर्पणे च उद्धृतं वाक्यं धर्मदत्तनामकस्य कस्यचिद्विदुषः ग्रन्थात् स्वीकृतं वर्तते ।

अस्याभिप्रायस्तावद् सर्वत्र रसे चमत्कृतेरेव प्राधान्यमतः चमत्कारः एव सारभूतं तत्त्वं सर्वेषु रसेषु । अथ च चमत्कारस्यैव सर्वत्र प्रधानत्वाद् सर्वत्रापि अद्भुत एव रसः[2] । इत्यनेन इदं ज्ञायते यत् नारायणस्य मते चमत्कृतेः पर्यवसानम् अद्भुते एव स्वीक्रियते ।

**एकरसमूलतावादे शान्तैकमूलतावादः**

अयं पक्षस्तावत् भरतमुनेरपि प्राचीनः वर्तते । किन्तु कस्य आचार्यस्येदं मतमिति न ज्ञायते । तथाहि नाट्यशास्त्रे मुनिना अष्टानां रसानां प्रतिपादनानन्तरं शान्तरसस्य प्रतिपादनावसरे केचन अनुवंश्याः श्लोका उद्धृताः तत्र सर्वेषु भूतेषु विस्तृतत्वं प्रतिपादितं शान्तरसस्य । अन्ये ये रत्यादयो भावाः ते शान्तस्य विकाराः शान्तस्तु प्रकृतिः अभिमता । यतो हि विकाराः प्रकृतेः समुद्भवन्ति अथ निमित्तापाये पुनस्तत्रैव लीयन्ते अतः प्रकृतेः शान्ताज्जाताः रत्यादयो भावाः विकृतिभूताः स्वं स्वं निमित्तमासाद्य जायन्ते कारणवैकल्ये पुनः शान्ते एव लयं प्राप्नुवन्ति[3] । इत्येवं शान्त एव एकः रसः इति सिद्ध्यति । किन्तु अत्र तावद् अयं ध्यातव्यः यदयं पक्षः केवलं प्राचीनानामिति कृत्वा उपस्थापितः मुनिना नाट्यशास्त्रे किन्तु कस्य अभिमतः इति तावत्तत्राप्यनुल्लिखितत्वात् न ज्ञायते ।

**शोधनिष्कर्षाः –**

- यद्यपि विभावानुभावव्यभिचारिभिसंयोगाद्रसनिष्पत्तिरिति मुनिमतं तथापि कैश्चिदालोचकैः ब्रह्मणः, अहङ्कारात्, अभिमानात्, रसाच्च रसनिष्पत्तिः स्वीक्रियते ।
- तत्र तावत् – ब्रह्मणः, अहङ्कारात्, अभिमानाच्च सर्वेषां रसानामुत्पत्तिरिति अग्निपुराणं, करुणादेवेति भवभूतिः, शृङ्गारादेवेति भोजदेवः, अद्भुतादेवेति किञ्च चमत्कारादेवेति नारायणः, शान्तादेवेति केचन प्राचीनतमाः मन्वते ।

---

[1] तत्प्राणत्वञ्च अस्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणचरणपादैरुक्तमिति । साहित्यदर्पणम्, पृ. – २३ ॥

[2] रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते । तच्चमत्कारसारत्वे सर्व्वत्राप्यद्भुतो रसः ॥ तस्मादद्भुतमेवाह कृती नारायणो रसम् ॥ इति ॥ साहित्यदर्पणम्, पृ.- २३ ॥

[3] समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥

भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः । विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ॥

स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते । पुनर्निमित्तापाये च शान्त एवोपलीयते ॥ नाट्यशास्त्रम्, पृ. – ३३४-३३५ ॥


ISSN: 2320-740X

- रसैकमूलतावादमन्तरा अपि रसचतुष्टयमूलतावादस्य प्रतिपादनं नाट्यशास्त्रे अग्निपुराणे च वर्तते ।

**सन्दर्भग्रन्थाः -**


१) भरतमुनिः, नाट्यशास्त्रम् - वोल्यूम - १, सम्पादकः – एम्. रामकृष्णकविः, बडौदा, ओरिएन्टल इन्स्टीट्यूट्, गायकवाड- ओरिएन्टल- सिरीज़, द्वितीयसंस्करणम् – १९९६ ई.

२) अभिनवगुप्तः, नाट्यशास्त्रव्याख्या - अभिनवभारती, सम्पादकः – एम. रामकृष्णकविः, बडौदा, ओरिएन्टल इन्स्टीट्यूट्, गायकवाड- ओरिएन्टल- सिरीज़, द्वितीयसंस्करणम् – १९९६ ई.

३) मम्मटः, काव्यप्रकाशः, सम्पादकः – वासुदेवशास्त्री अभ्यंकरः, वाराणसी, चौखम्बा, द्वितीयं संस्करणम् – १९९४ ई.

४) कविराजः विश्वनाथः, साहित्यदर्पणम्, सम्पादकः – डा. इ. रोर, कलिकाता, थॉमस् बैपटिस्ट मिशन, बिब्लियोथिका इण्डिका – १८५१ ई.

५) अग्निपुराण का काव्यशास्त्रीय भाग, सम्पादकः अनुवादकश्च – रामलालवर्मा शास्त्री, दिल्ली, हिन्दी अनुसंधान परिषद्, प्रथम संस्करण – १९५९ ई.

६) व्यासः, अग्निपुराणम्, (द्रष्टव्यं - अग्निपुराण का काव्यशास्त्रीय भाग) ।

७) भोजराजः, शृङ्गारप्रकाशः, सम्पादकः – म. म. रेवाप्रसादद्विवेदी, दिल्ली, इन्दिरागान्धीराष्ट्रियकलाकेन्द्रम्, प्रथमं संस्करणम् – २००७ ई.

८) राजशेखरः, काव्यमीमांसा, सम्पादकः – बी. भट्टाचार्यः, बडौदा, ओरिएन्टल इन्स्टीट्यूट्, गायकवाड-ओरिएन्टल-सिरीज़, तृतीयसंस्करणम् – १९३४ ई.

९) भवभूतिः, उत्तररामचरितम्, सम्पादकः – जीवानन्दविद्यासागरभट्टाचार्यः, कलिकाता, सिद्धेश्वरयन्त्रे, तृतीयसंस्करणम् – १८९५ ई.


**********

# त्रिस्कन्धात्मकं ज्योतिश्शास्त्रम्

**श्री गणेशभट्टः**
ज्यौतिषविभागीयशोधच्छात्रः

यदिह जगति जनिमतां जनानां समेषां श्रेयःप्राप्तिः कथं स्यादिति विचिन्त्य, सहस्रेभ्यः वर्षेभ्यः कृततपसः महर्षयः प्राप्तप्रज्ञाचक्षुर्बलेन अपौरुषेयं ज्ञाननिवहं 'वेदम्' लेभिरे । वेद एव सर्वेषां श्रेयःप्रदो मार्गः इति निरचैषुः । उक्तं च सौरपुराणे प्रत्यक्षदेवेन भानुना -

**"श्रेयसे त्रिषु लोकेषु न वेदादधिकं परम्"॥**[1]

**"सर्वेषामेव भूतानां वेदश्चक्षुः सनातनम् ।**
**वेदः श्रेयस्करः पुंसां नान्य इत्यब्रवीद्रविः"॥**[2]

वेदः कथं श्रेयः प्रयच्छति ? इति जिज्ञासायाम्, वेदस्य पठनेन, वेदोक्तकर्मानुष्ठानेन वेदार्थानुसन्धानादिना च विबुधा बहुधा व्याचख्युः । "अनन्तो वै वेदाः" इति वचसा वेदानाम् अपरिमितत्वं ज्ञायते । क्रमेण कालान्तरे दृष्टानां वेदानाम् उच्चारणशिक्षायै तस्यार्थं च वेदितुं तस्य निश्चितस्वरूपं ज्ञातुं शिक्षा व्याकरणं छन्दः निरुक्तं ज्यौतिषं कल्पः चेति षट् वेदाङ्गानि प्रणीतानि महर्षिभिः। एवमेव क्रमेण वेदेषु स्थितान् सूक्ष्मान् विचारान् विस्तारेण बोधयितुं शास्त्रणि पुराणानि च ऋषिभिः शिष्येभ्यः अबोधिषत । तदेवं अपौरुषेयस्य वेदस्य विस्तृतिः पौरुषेयैः ऋषिप्रणीतसन्दर्भैः कृता । एवं कालान्तरे एताः विद्याः सङ्कलय्य चतुर्दशविद्यास्थानानि इति विख्याताः । यथा -

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।**
**धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥**[3]

प्राप्तोपदेशाः शिष्याः एतानि चतुर्दशविद्यास्थानानि विज्ञाय, तेऽपि तपसा प्राप्तं ज्ञानं शिष्येभ्यः बोधयन्तः ग्रन्थेषु लिखन्तः विद्यायाः परिमाणं विस्तारयामासुः । अतः षड्-दर्शनानि, शास्त्राणि इत्येवं परम्परा समारब्धा । लोकेऽस्मिन् चत्वारो वेदाः तस्य षडङ्गानि मीमांसान्यायधर्मशास्त्रपुराणानि चैतानि चतुर्दशविद्यास्थानानि सनातनसम्प्रदायनिष्णातैः अभियुक्तैः सर्वदा समादृतानि वर्तन्ते । तथा च- 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति वचनात् सन्ध्योपासनादिवत् षडङ्गसहितवेदाध्ययनम् अवश्यं कर्तव्यम् इत्युक्तं भवति । यथा अनुपासीनः सन्ध्यां प्रत्यवैति तथा अनधीयानोऽपि षडङ्गसहितान् वेदान् अपि, इति

---

[1] सौरपुराणम् , अ-२,श्लो.सं.-५९

[2] सौरपुराणम् , अ-१७,श्लो.सं.-३५

[3] महाभारतम् , शान्तिपर्व अ-१२,श्लो-१२२

 ISSN: 2320-740X

धिया अस्मत्सनातनधर्मे आ पुराणात् कालात् तदध्ययने प्रवृत्तिः दरीदृश्यते । 'यत्र प्रयोजनं प्रोक्तं तत्र लोकः प्रवर्तते' इति लोकवचनात् प्रेक्षावत्प्रवृत्तेः प्रयोजनप्रमाणत्वात् तदध्ययनफलमुक्तं पाणिनीयशिक्षायाम् –

**छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥** [1] इति ।

यथा वर्णोत्पत्तिस्थानप्रयत्नादिशिक्षणात् शिक्षायाः, विविक्तानां साधूनां शब्दानां प्रकृतिप्रत्ययविभागतो ज्ञापनात् व्याकरणस्य, बहूनां छन्दसां लक्षणकथनात् छन्दसः, वेदेषूक्तानां पदानां बहुधा अर्थकथनात् निरुक्तस्य, वेदविहितयज्ञकर्मनिर्वहणात् कल्पस्य च वेदाङ्गत्वं तथैव वेदोक्तयज्ञादीनां तत्तदुक्तपुण्यकालनिर्णायकत्वात् ज्यौतिषशास्त्रस्यापि वेदाङ्गत्वं सिद्धं भवति । अत एव शिरोमणौ -

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**
**शास्त्रादस्मात्कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ॥**[2]

❖ **ज्योतिश्शास्त्रस्य माहात्म्यम् -**

अस्ति शास्त्रस्यास्य कालविधानात् वेदाङ्गत्वात् प्रत्यक्षशास्त्रत्वाच्च परमप्रामाण्यम् । अत एव

**अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम् ।**
**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥**
**यथा शिखा मयूराणां नागानां मणयो यथा ।**
**तद्वद्वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि संस्थितम् ॥** [3] इति प्राज्ञैरुक्तम्

अपि च -

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते**
**संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः ॥**[4] इति भास्करवचनात्

---

[1] पाणिनीयशिक्षा

[2] सिद्धान्तशिरोमणिः अ-१ श्लो.सं-१०

[3] वेदाङ्गज्योतिषम् श्लो.सं-३५

[4] सिद्धान्तशिरोमणिः अ-१ श्लो.सं-११

**मुखमर्धं शरीरस्य सर्वं वा मुखमुच्यते ।**

**तत्रापि नासिका श्रेष्ठा नासिकायाश्च चक्षुषी ॥**[1] - इति

कामदोग्ध्रीव्याख्याकृततम्मय्यवचनात् 'सर्वेन्द्रियाणां नयनं प्रधानम्' इति लोकवादाच्च वेदपुरुषस्य चक्षुष्ट्वेन प्रधानीभूतमिदं ज्योतिश्शास्त्रम् इत्यर्थः सिद्ध्यति ।

**लक्षं तु चतुरो वेदा लक्षमेकं तु भारतम् ।**

**लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्यौतिषम् ॥**[2]

- इति शौनकोक्तेः वेदाङ्गेषु चतुर्लक्षात्मकस्य ज्योतिश्शास्त्रस्य सकलशास्त्रात् गाम्भीर्यं वैशिष्ट्यं च ज्ञायते ॥

❖ **ज्योतिश्शास्त्रस्वरूपम् –**

'द्युत-दीप्तौ' इति धातोः इसिन्प्रत्यये कृते 'आदेश्च जः' इत्यनेन सूत्रेण जादेशे सति दीप्त्यर्थको ज्योतिश्शब्दो निष्पद्यते । ज्योतींषि ग्रहनक्षत्राणि तानि अधिकृत्य कृतं शास्त्रं ज्योतिश्शास्त्रम् । शास्त्रस्यास्य मूलं तु वेदेष्वेव दृश्यते ; तत्र तावत् – 'बृहस्पतिः प्रथमं जायमानः...'(ऋक्.४.५०.४), 'बृहस्पतिः.......तिष्यं नक्षत्रमभि सम्बभूव...' (तै.सं.३.१.५), 'यथा वै पुरुष एवं....शिर एव विषुवान्' (ऐ.ब्रा.१८.२२), 'द्वादश प्रधयश्चक्रमेकम्....' (ऋक्.१.१६४.४९), 'अग्नेः कृत्तिकाः........प्रजापते रोहिणी' (तै.ब्रा.१.५.१), 'चित्राणि साकं....आवहन्तु'(अ.सं.१९.७) इत्यादीनि श्रुतिप्रामाण्यवचनानि । एवं वेदेषु बीजभूतं शास्त्रमेव तदनन्तरकाले सूर्य- ब्रह्म- व्यास- वशिष्ठात्रि- पराशर- कश्यप- नारद- गर्ग- मरीचिमन्वङ्गिरोलोमश- पौलिश- च्यवन- यवन- भृगु- शौनकाख्याः देवर्षयः स्वतेजस्तपोबलेन शास्त्रप्रवर्तनद्वारा महावृक्षरूपेण वर्धयामासुः । एते एव ज्योतिश्शास्त्रस्य अष्टादशप्रवर्तकाः भवन्ति ।

**सूर्यः पितामहो व्यासो वसष्ठोऽत्रिः पराशरः ।**

**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः**

**लोमशः पौलिशः चैव च्यवनो यवनो भृगुः ।**

**शौनकोऽष्टादशः चैते ज्योतिश्शास्त्रप्रवर्तकाः ॥**[3]

गच्छता कालेन आर्यभट- वराहमिहिर- ब्रह्मगुप्त- लल्ल- भास्कर- श्रीपति- केशव- गणेशादयः स्वबुद्धिकौशलेन स्वतन्त्रग्रन्थव्याख्यानोपपत्त्यादिभिः महान्तं तं ज्योतिर्वृक्षं संररक्षुः ॥

---

[1] कामदोग्ध्रीव्याख्या

[2] शौनकसंहित

[3] ज्यौतिषसिद्धान्तमञ्जूषा पृ.सं-६



ISSN: 2320-740X

अस्य ज्योतिर्वृक्षस्य सन्ति त्रयः स्कन्धाः सिद्धान्तः संहिता होरा चेति । उक्तं च नारदसंहितायाम् –

**'सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् ।**

**वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम्'**॥ इति ।[1]

सिद्धान्तस्यैव गणितमिति, होरायाः एव जातकमिति, संहितायाः एव शाखा इति च नामान्तरं वर्तते । उक्तं हि वृद्धगर्गसंहितायाम् -

**गणितं जातकं शाखां यो वेत्ति द्विजपुङ्गवः ।**

**त्रिस्कन्धज्ञो विनिर्दिष्टः संहितापारगश्च सः ॥**[2] इति ।

❖ **स्कन्धत्रयविषयनिरूपणम्**

तत्र तावत् होरास्कन्धे सर्वप्रजानां प्राग्जन्मार्जितकर्मविपाकानां विज्ञापनं प्रधानः विषयः । होराग्रन्थेषु आधानलग्नात् जन्मलग्नात् प्रश्नलग्नात् वा प्रतिव्यक्त्यनुभूयमानं फलं प्रोच्यते । बृहत्पराशर–जैमिनीयसूत्र–बृहज्जातक–प्रश्नमार्ग–रमलप्रश्न - नाडीग्रन्थादयः विविधप्रकारेण पूर्वकर्मफलप्रवाचकाः प्रसिद्धाः होराग्रन्थाः लोके दृश्यन्ते ॥

संहितास्कन्धे तु ग्रहचार- दिग्दाह– भूकम्प– परिवेषेन्द्रचाप– प्रतिसूर्य- सद्योवर्षण- उल्कापातादिभिः उत्पातलक्षणैः एकैकस्मिन् भूखण्डे निवसतां सकलप्राणिनां कात्स्न्र्येन फलनिर्देशनमेव प्रधानः विषयः । पराशर- गर्ग- नारद- देवल- वशिष्ठ- मनु- सारस्वत- बृहत्संहितादयः प्रमुखाः संहिताग्रन्थाः, एषु संहिताग्रन्थेषु प्रायेण त्रिचतुराः ग्रन्थाः इदानीम् उपलभ्यन्ते ॥

गणितस्कन्धे गणितद्वारा ग्रहाणां स्फुटीकरणमेव प्रधानः विषयः । तथैव ग्रहण- ग्रहयुति- भग्रहयुति- ग्रहोदयास्त- शृङ्गोन्नति- महापातादीनां गणितविधिः, गणितागतस्फुटग्रहाणां वेधविधिः, तदर्थं शङ्कुयष्टिधनुश्चक्रादीनां यन्त्राणां रचनाविधिः भुवनगोलादीनां संस्थितिश्चैते विषयाः अपि निरूप्यन्ते । एवमेषु त्रिषु स्कन्धेषु गणितस्कन्धः प्रमाणम्, अन्यौ स्कन्धौ फलात्मकौ आगमप्रामाणौ च ।

अत्र उपपत्तिमान् अयं गणितस्कन्धः सिद्धान्ततन्त्रकरणभेदेन पुनः त्रिधा विभक्तः । तत्र कः सिद्धान्तः? किं तन्त्रम् ? किं च करणम् ? इति चेत् पृथक् तल्लक्षणमुच्यते –

**'सृष्ट्यादेर्यद्ग्रहज्ञानं सिद्धान्तः स उदाहृतः**

---

[1] नारदसंहिता अ-१,श्लो-४

[2] वृद्धगर्गसंहिता

**युगादितो ग्रहज्ञानं तन्त्रं तत् कथ्यते बुधैः**
**शकाद्यत्र ग्रहज्ञानं करणं तन्निगद्यते' ॥**

अर्थात् – 'आ सृष्टेः आ प्रलयम् एतावन्ति सौरवर्षाणि, एतावन्तःसावनदिवसाः, एतावन्तः ग्रहोच्च- पातानां भगणाः' इत्यभिधायतद्वशात् अहर्गणं; एतादृशाहर्गणवशात् मध्य- स्पष्टग्रहानयनम् इत्येवंविधानेन ग्रहगणितकर्म यत्रोच्यते सः सिद्धान्तःइत्युच्यते । उदा– सूर्यब्रह्मादिसिद्धान्ताः । उक्तं च सिद्धान्तलक्षणंसिद्धान्तशिरोमणौ भास्कराचार्येण –

**त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमात्**
**चारश्चद्युसदां द्विधा च गणितं प्रश्नास्तथा चोत्तराः ।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥** इति ।

तथैव वर्तमानयुगादेः आरभ्य अहर्गणादिकं कृत्वा यत्र ग्रहस्फुटीकरणं क्रियते तत् तन्त्रमित्युच्यते । उदा : आर्यभटीयम् । तथैव वर्तमानशकवर्षे अभीष्टदिनादारभ्य अहर्गणादिकं कृत्वा यत्र ग्रहस्फुटीकरणविधिः विधीयते तत् करणमित्युच्यते । उदा : केतकीग्रहगणितम् । एवं वेदोपकारकं लोकोपकारकञ्च **"त्रिस्कन्धात्मकं ज्योतिश्शास्त्रम्"** इति जेगीयते लोके ।

**********

# कालिदासमहाकाव्ययोः कविसमयपोषितः उत्प्रेक्षालङ्कारः

**श्री सूर्यहेब्बारः ए.**
साहित्यविभागीयशोधच्छात्रः

रघुवंशं कुमारसम्भवं च महाकविना कालिदासेन रचिते महाकाव्ये । तत्र रघुवंशे दिलीपादारभ अग्निवर्णपर्यन्तानां रघुवंशीयानां राज्ञां कथा नवदशसु सर्गेषु उपवर्णिता । कुमारसम्भवे शिवपार्वत्योः विवाहः कुमारस्य जननं च वर्णितम्। कुमारसम्भवस्य अष्टौ सर्गाः एव कालिदासरचिताः इति बहूनां मतम् । एवम् आहत्य सप्तविंशत्यां सर्गेषु कविसमयपोषितस्य उत्प्रेक्षालङ्कारस्य विषये विचारः प्रवर्त्यते ।

कविसमयो नाम यद् लोके न शास्त्रे वा न वर्तते तादृशस्य विषयस्य उपस्थापनम् । एतच्च सर्वैः कविभिः सिद्धान्तरूपेण अङ्गीकृतमपि स्यात् । कविसमयस्य लक्षणं राजशेखरेण इत्थम् उक्तं वर्तते । "अशास्त्रीयमलौकिकं


ISSN: 2320-740X

च परम्परायातं यमर्थमुपनिबध्नन्ति कवयः स कविसमयः"[1] इति । कविसमयमाश्रित्य काव्यरचनं तु आदिकवेः कालादारभ्य अद्यावधि वर्तते । तत्र कविसमयाः रस-गुण-अलङ्कारादीन् पोषयन्तः काव्यसौन्दर्यं वर्धयन्ति । एतादृशानां कविसमयानां कूलङ्कषपरिशीलनेन कविसमयः कम् अंशम् पोषयन् वर्तते इति ज्ञातुं शक्नुमः ।

सम्भावना स्यादुत्प्रेक्षा[2] इति उत्प्रेक्षालङ्कारस्य लक्षणम् । मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः ॥[3] इति कारिका उत्प्रेक्षालङ्कारोपस्थापकानि पदानि परिचाययति । यदि कस्यचित् वस्तुनः फलस्य कारणस्य वा ऊहः क्रियते तर्हि उत्प्रेक्षालङ्कारः वक्तुं शक्यः । लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः[4] । इति उत्प्रेक्षायाः उदाहरणम् । अत्र तमः लिम्पति इव, अञ्जनं वर्षति इव इति उत्प्रेक्षा ।

कालिदासमहाकाव्ययोः बहवः कविसमयाः सन्ति। तेषु अनेके उत्प्रेक्षां पोषयन्ति च । विस्तरभयात् कतिचन उदाहरणानि अत्र प्रस्तूयन्ते ।

**तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ।**
**विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥**[5]

चतुर्मूर्तेः उदये रावणेन त्रस्ताः इन्द्रादयः दिक्पालकाः उच्छ्वासं चक्रुः इति अत्र वर्णितम् । यद्यपि दिक्पालकाः अष्टौ विद्यन्ते । अतः दिशः इति शब्देन अष्टौ अपि दिशः उच्छ्वासिताः इत्यर्थोऽपि ग्रहीतुं शक्यः । परमत्र श्लोके दिशां सङ्ख्या चत्वारि इति कण्ठतः नोक्तं तथापि चतुर्मूर्तेः इति प्रयोगबलात् दिशः अपि चतस्रः इत्येवार्थः अभिव्यज्यते । दिशः चतस्रः इति ग्रहणेन चतुर्मूर्तिशब्दस्य सार्थक्यमपि सिध्यति । तदुक्तं मल्लिनाथेनापि दिशश्चतस्रो विरजस्कैः अपधूलिभिः[6] इत्यादिना, चुतुर्दिगीशरक्षणं मूर्तिचतुष्टयप्रयोजनमिति भावः इति च । दिशां सङ्ख्या दश अष्टौ अथवा चत्वारि इति कविसमयः । चतस्रः दिशः उच्छ्वासिताः इव अभवन् इत्यत्र उत्प्रेक्षालङ्कारः वर्तते। अयं च अलङ्कारः दिशः चतस्रः इति कविसमयग्रहणेन पुष्टः । चतस्रः दिशः इत्यर्थः उपस्थितः नाभविष्यत् उत्प्रेक्षायाः अपि सत्ता अभङ्क्ष्यत् ।

---

[1] काव्यमीमांसा- 14 अध्यायः

[2] कुवलयानन्दः- उत्प्रेक्षालङ्कारः

[3] कुवलयानन्दः- उत्प्रेक्षालङ्कारः

[4] मृच्छकटिकम्- 1-34

[5] रघुवंशम्- 10-73

[6] रघुवंशम्, सञ्जीविनी 10-73

**क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।**
**अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥[1]**

गङ्गायमुनयोः सङ्गमस्य वर्णनमिदम्। गङ्गा श्वेतवर्णीया यमुना च कृष्णवर्णीया । एतयोः सङ्गमे प्रियमानसानां हंसानां पङ्क्तिः कादम्बेन युक्ता इव इति उत्प्रेक्षितम् । कादम्बः नाम कृष्णवर्णीयः कलहंसः । कादम्बः कलहंसः स्याद्[2] इत्यमरः। अत्र हंसाः मानससरोवरं गच्छन्ति इति कविसमयमाश्रित्य खगानां प्रियमानसानाम् इति प्रयोगः कृतः । जलधरसमये मानसं यान्ति हंसाः[3] इति विश्वनाथः । "मानसस्य हिमदुष्टत्वाद्धिमस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धिः"[4] इति मल्लिनाथः । एवमत्र कविसमयप्रयोगेण हंसानां श्वैत्यस्य उत्कर्षः व्यज्यते। तेन विद्यमाना उत्प्रेक्षा परिपुष्टा भवति ।

**असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।**
**कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे [5]॥**

पार्वत्याः वयसः वर्णनमिदम् । वयः अङ्गस्य प्रयत्नरहितं मण्डनम्, आसवभिन्नं मद्यम्, कामस्य पुष्पभिन्नमस्त्रम् इति वर्णितम् । अत्र कामस्य पुष्पव्यतिरिक्तमस्त्रम् इत्युत्प्रेक्षितम् । एवमुत्प्रेक्षायां कामस्य बाणाः पुष्पमयाः इति कविसमयः कारणम् । तदुक्तं विश्वनाथेन मौर्वी रोलम्बमाला धनुरथविशिखाः कौसुमाः पुष्पकेतोः[6] इति । अत्र एतेन एतेन कविसमयेन विना उक्ता उत्प्रेक्षा न सिद्ध्यति। अत्र स्थाने ताद्रूप्यरूपकस्पर्शोऽपि वर्तते। तथापि कविसमयाधारेण यदि पश्यामः तर्हि उत्प्रेक्षैव चमत्कारकारिणी भासते ।

**मूर्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् ।**
**समुद्रगारूपविपर्ययेऽपि सहंसपाते इव लक्ष्यमाणे ॥[7]**

शिवविवाहकाले गङ्गायमुने नदीरूपं परित्यज्य सशरीरिण्यौ भूत्वा चामरेण शिवं वीजतः स्म । तदानीं सहंसा इव अशोभेताम् इति वर्णनमत्र विहितम् । नदी सहंसा इति कविसमयः अत्राश्रितः । हंसाः बाहुल्येन तडागादिषु जलाशयेषु एव दृश्यन्ते नदीसमुद्रादिषु तु न दृश्यन्ते। तथापि हंसानां सर्वजलाधारेषु वर्णनं कविभिः क्रियते। अत्रापि

---

[1] रघुवंशम्- 13-55

[2] अमरकोषः, सिंहादिवर्गः

[3] साहित्यदर्पणम्- सप्तमपरिच्छेदः

[4] मेघदूतम्, सञ्जीविनी, पूर्वमेघः-11

[5] कुमारसम्भवम् १-३१

[6] साहित्यदर्पणम्- सप्तमपरिच्छेदः

[7] कुमारसम्भवम् ७-४२


ISSN: 2320-740X

चामरस्य उपमानत्वसिद्धये हंसरूपोपमानेन भवितव्यम् । अतः नद्योः हंसवत्वरूपेण कविसमयेन अलङ्कारः पुष्टः ।

एतादृशानि उदाहरणानि अनेकानि रघुवंशकुमारसम्भवयोः दृश्यन्ते । एवं केवलयोः रघुवंशकुमारसम्भवयोः विद्यमानः उत्पेक्षाधारितः कविसमयः अत्र स्थालीपुलाकन्यायेन दर्शितः । तर्हि समग्रयोः रघुवंशकुमारसम्भवयोः विद्यमानस्य कविसमयपोषितस्य उत्प्रेक्षालङ्कारस्य व्याप्तिः कियती स्यात् । समग्रे संस्कृतवाङ्मये कविसमयपोषितस्य उत्प्रेक्षालङ्कारस्य स्थलानि कति स्युः। कविसमयेन पोषिताः अन्ये अलङ्काराः, रसः, ध्वनिः, गुणीभूतव्यङ्ग्यम् इत्यादिकं च यदि चिन्तयामः तर्हि काव्यप्रपञ्चे कविसमयस्य व्याप्तिः कियती महती इति ज्ञातुं शक्नुमः ।

**परिशीलितग्रन्थसूची—**


- कुमारसम्भवम्, कालिदासः, चौखम्बा विद्याभवन वाराणसी, 2013
- रघुवंशम्, कालिदासः चौखम्बा विद्याभवन वारणासी 2013
- कालिदासग्रन्थावली, मिथिलाप्रसादत्रिपाठी, कालिदाससंस्कृतअकादमी उज्जयिनी, 2008
- साहित्यदर्पणः, विश्वनाथः, कृष्णदासअकादेमी वाराणसी, 1974
- काव्यप्रकाशः, मम्मटः, दि इण्डियन् प्रेस् अलहाबाद्, 1995
- कुवलयानन्दः, अप्पय्यदीक्षितः, निर्णयसागरयन्त्रालय मुम्बई, 1917
- ಅಮರಕೋಶ, अमरसिंहः, संस्कृतभारती बेङ्गलूरुः, 2019
- कायमीमांसा, राजशेखरः, चौखम्बासंस्कृतसीरीज् वाराणसी, 1934
- शिशुपालवधम्, माघः, निर्णयसागरयन्त्रालय मुम्बई, 1905
- साहित्यमीमांसा, मङ्खकः, सम्पूर्णानन्दसंस्कृतविद्यालयः, 1984


**परिशीलितान्तर्जालपुटसूची**


- https://sa.wikisource.org
- https://sa.wiktionary.org
- https://archive.org
- https://sanskritdocuments.org


**********

# “अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरत्”

**श्री गणेशप्रसादः के.एस्.**
व्याकरणविभागीयशोधच्छात्रः

संस्कृतवाङ्मये बहुविधकोषेषु कश्चन प्रमुखः सुप्रसिद्धः शब्दार्थकोषः अस्ति अमरकोषः । कोषेऽस्मिन्शब्दाः श्लोकरूपेण रचिताः । ग्रन्थोऽयं काण्डत्रयात्मकः, चतुर्विंशतिसर्गेषु विभक्तः । कोषस्यास्य श्रेष्ठता वर्ण्यते –

**“अष्टाध्यायी जगन्माताऽमरकोषो जगत्पिता” ॥ इति ।**

‘नामलिङ्गानुशासनम्’ इत्यपरं नाम । अमरकोषस्य कर्ता अमरसिंहः । महान् वैयाकरणोऽयम् । वोपदेवः अष्टानां वैयाकरणानां नामानि निर्दिशति -

**इन्दश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।**[1]
**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ हि शाब्दिकाः ॥ इति ।**

अष्टसु वैयाकरणेषु अमरसिंहोऽपि अन्यतमः । सः तस्मिन् समये विद्यमानान् सर्वान् निघण्टून् शास्त्रान्तराणि च परिशील्य एव एतं ग्रन्थं रचितवान् । अत एव ग्रन्थस्य आरम्भे सः लिखति - 'समाहृत्यान्यतन्त्राणि' इति ।

किन्तु लोके उक्तिः इत्थं श्रूयते -

**“अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचरत्” ॥ इति ।**[2]

(अमरसिंहः व्याकरणभाष्यं सर्वं चोरितवान्) इति उक्तिः पण्डितगोष्ठीषु ख्याता अस्ति । किन्तु कुत्राप्यन्यत्र ग्रन्थेषु वा न दृश्यते । अमरसिंहः वैयाकरणः, चतुरः कविश्चेदपि कथं पापीयान् इति? बहवः मन्यन्ते यत् इयमुक्तिः निन्दापरा इति । किन्तु इयमुक्तिः स्तुतिपरा नतु निन्दायाम् । किमर्थमिति चेत् - व्याकरणशास्त्रे तस्य विशिष्टा अभिरुचिरासीत् । पाणिनेः अष्टाध्याय्याः सूत्र-वार्तिक-भाष्यादीनि सम्यक् परिशील्य तान् शब्दान् अमरकोशे योजितवान् ।

[3]पाणिनीयव्याकरणस्य अमरकोशपङ्क्तिषु प्रभावः –

---

[1] कविकल्पद्रुमः

[2] संस्कृतवाङ्मयेतिहासः

[3] नामलिङ्गानुशासने पाणिनीयप्रभावः


ISSN: 2320-740X

| पाणिनीयं सूत्रम् | अमरसिंहवचनम् |
|---|---|
| 1. “साधकतमं करणम्” 1-4-42[1] | **करणं साधकतमं**[2] क्षेत्रगानेन्द्रियेष्वपि । |
| 2. “उपसर्या काल्या प्रजने” 3-1-104 | **काल्योपसर्या प्रजने** प्रष्ठौही बालगर्भिणी । |
| 3. “निपानमाहावः” 3-3-74 | **आहावस्तु निपानं** स्यादुपकूपजलाशये । |
| 4. “ऐकागारिकट् चौरे” 5-1-113 | **चोरैकागारिकस्ते**नदस्युतस्करमोषकाः । |

एवम् अमरकोशे बहुत्र पाणिनीयप्रभावं द्रष्टुं शक्नुमः । अपि च पाणिनीय सूत्र-वार्तिक-भाष्यानुगुणं अमरकोशमरचयत् इत्यतः संस्कृतवाङ्मये सत्स्वपि नैकेषु कोशेषु अमरकोशोऽयं मूर्धन्यं स्थानं भजते ।

***********

# अद्वैतसिद्धिग्रन्थे प्रथममिथ्यात्वलक्षणे विनियुक्तानां हेत्वाभासनिग्रहस्थानानां न्यायशास्त्रदृष्ट्या परिशीलनम्

**वाणी मञ्जुनाथ हेगडे**

नव्यन्यायविभागीयशोधच्छात्रा

न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दानाम् आप्तशब्दत्वेन श्रुतीनाञ्च प्रामाण्यमस्त्येव । किन्तु अनुमानप्रमाणप्रधानमिदं शास्त्रम् । अत्र यावता विस्तरेण अनुमाननिरूपणं कृतं न तथा अन्यत्र शास्त्रे परिदृश्यते । प्रमाणषट्कवादि वेदान्तदर्शनं तावत् तदन्तर्गततया अनुमानमङ्गीकरोत्येव किन्तु, श्रुतिप्रधानमिदं शास्त्रम् । ब्रह्म सत्यं जगन्मिथ्येति अद्वैतवेदान्तसिद्धान्तः । तत्र च श्रुतिरेव परमं प्रमाणम् इत्यङ्गीकुर्वाणाः अपि वेदान्तिनः अद्वैतसिद्धिग्रन्थेऽस्मिन् अनुमानप्रमाणावलम्बनेन जगन्मिथ्यात्वमुपपादयन्ति । हेत्वाभासनिग्रहस्थानादीनां निरूपणं न्यायशास्त्रे यावता विस्तरेण कृतं तावता विस्तरेण नान्यत्र कृतम् । तेषां च हेत्वाभासादीनां प्रचुरः विनियोगः अद्वैतसिद्धिग्रन्थे कृतो दृश्यते । अतः गौतमोपज्ञन्यायशास्त्रस्य नव्यन्यायस्य च अनुमानप्रमाणनिरूपणे नैर्भर्यात् अद्वैतसिद्धिग्रन्थे च प्राधान्येन अनुमानप्रमाणमवलम्ब्यैव विचाराणां प्रवर्तितत्वात् ग्रन्थेऽस्मिन् पूर्वोत्तरपक्षयोः अनुमाननिराकरणाय उपयुक्तानां हेत्वाभासादीनां न्यायशास्त्रदृष्ट्या परीक्षणं किञ्चित् प्रदर्श्यते ।

द्वैताभावोपलक्षितब्रह्मनिर्विकल्पकनिश्चयरूपायाः अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमिथ्यात्वं

---

[1] अष्टाध्यायी

[2] अमरकोशः

ISSN: 2320-740X

प्रतिपादयिषवः मधुसूदनसरस्वतीयतिवर्याः अद्वैतसिध्याख्ये ग्रन्थे आदौ विप्रतिपत्तिजन्यसंशयस्य व्युदसनीयतया विचाराङ्गत्वमुपपाद्य मिथ्यात्वे विप्रतिपत्तिं प्रदर्शयामासुः । तद्यथा-**ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा? पारमार्थिकत्वाकारेण उक्तनिषेधप्रतियोगि न वा?** इति । अद्वैतवेदान्तस्य प्राचीनाचार्याः मिथ्यात्वस्य पञ्च विभिन्नलक्षणानि प्रत्यपादयन् । 'मिथ्याशब्दोऽनिर्वचनीयतावचनः' इति पद्मपादाचार्यकृतपञ्चपादिकावचनात् सदसत्त्वानधिकरणत्वरूपमनिर्वाच्यत्वं प्रथममिथ्यात्वलक्षणम् ।

**विप्रतिपत्तौ सत्त्वेन प्रतीत्यर्हत्वमिति** पदानुपादाने 'चिद्भिन्नं मिथ्या न वा' इति फलति विप्रतिपत्तिवाक्यम् । एवं सति शशविषाणादिरूपे अलीके बाधः स्यात् । तुच्छे शशशृङ्गादौ चिद्भिन्नत्वं (ब्रह्मभिन्नत्वमस्ति) । केनापि न बाध्यते शशविषाणः इत्यतः ब्रह्मप्रमातिरिक्ताबाध्यत्वमपि अस्ति । इत्थञ्च तुच्छस्य पक्षतावच्छेदकाक्रान्तत्वात् मिथ्यात्वस्य तत्राभावात् **बाधः** । (साध्याभाववत्पक्षः बाधः) पक्षतावच्छेदकाक्रान्ते तुच्छे शशविषाणादौ त्रैकालिकनिषेधप्रतियोगित्वरूपसाध्यं नास्तीति बाधदोषः । तद्वारणाय सत्त्वेन प्रतीत्यर्हत्वमिति विशेषणं पक्षतावच्छेदककुक्षौ निवेशनीयम्। तुच्छवस्तुनः शशविषाणादेः सत्त्वेन प्रतीत्यर्हत्वं-सत्त्वप्रकारकप्रतीतिविशेष्यमसद्विलक्षणत्वं नास्तीति (शशविषाणं सत् इति प्रतीत्यभावात्) पक्षतावच्छेदकानाक्रान्तत्वात् बाधदोषो नास्ति ।

**चिद्भिन्नमिति** अनुपादाने पक्षतावच्छेदकाक्रान्तः भवति ब्रह्म । केनापि न बाध्यते ब्रह्म अतः ब्रह्मप्रमातिरिक्ताबाध्यत्वमस्ति, सत्त्वेन प्रतीत्यर्हत्वमपि अस्ति इति पक्षतावच्छेदकाक्रान्ते ब्रह्मणि साध्यस्य त्रैकालिकनिषेधप्रतियोगित्वरूपसाध्यस्य विरहात् **बाधः** । तद्वारणाय चिद्भिन्नत्वमिति निवेशनीयम् ।

विप्रतिपत्तौ सिद्धायां जगतः मिथ्यात्वसाधकमनुमानं यथा- विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तिरूप्यवत् इति । अत्रानुमाने सन्दिग्धानैकान्तिकत्वं (व्यभिचारः) घटादौ अस्ति इति आशङ्का । अत्र साध्यं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं तच्च घटादौ इतोऽपि न निर्णीतम् । अतः निरुक्तमिथ्यात्वस्य अभावः (साध्याभावः) सन्दिग्धः घटादौ । सन्दिग्धसाध्याभाववति घटे हेतोः दृश्यत्वस्य सत्त्वात् सन्दिग्धव्यभिचारदोषः । **सन्दिग्धसाध्याभाववन्निरूपितवृत्तित्वं हेतौ वर्तते चेत् सन्दिग्धव्यभिचारः** । सन्दिग्धानैकान्तिकत्वं पक्षान्तर्भावेण न दोषः अपि तु पक्षव्यतिरिक्तान्तर्भावेणैव दोषः । साध्याभाववति घटे हेतुरस्तीति उक्तम् । तर्हि घटाद्यन्तर्भावेण सन्दिग्धानैकान्तिकत्वम् । घटादिश्च न पक्षः अपि तु वियत्। तस्मात् अत्र पक्षव्यतिरिक्तान्तर्भावेणैव सन्दिग्धानैकान्तिकत्वं सम्भवतीत्यतः तस्य दूषणार्हत्वं सम्भवति खलु इति चेत् न भवति । यद्यपि घटः अत्र न पक्षः तथापि घटः पक्षसमः पक्षतुल्यः अतः न


ISSN: 2320-740X

सन्दिग्धानैकान्तिकता । एतावता तस्य घटस्य पक्षत्वं पक्षसमत्वं वा आगतम् । इत्थं च घटान्तर्भावेण यः व्यभिचारसंशयः सः पक्षान्तर्भावेण व्यभिचारसंशयः एव । न तु तदतिरिक्तान्तर्भावः अतः दोषो नास्ति ।

**सन्दिग्धानैकान्तिकता-** यत्तु साध्याभावांशे निश्चयरूपं शेषांशे संशयसाधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकमन्यथा पक्ष एव साध्यसन्देहेन सन्दिग्धानैकान्तिकत्वापत्तेरिति । यदाहुः - 'नहि पक्षे पक्षसमे वा व्यभिचारः' इति ।[1]

अत्रानुमाने प्रपञ्चरूपे पक्षे सिषाधयिषितस्य मिथ्यात्वस्य दुर्बोधत्वं मत्वा 'ननु किमिदं मिथ्यात्वं साध्यते' इति विकल्पत्रयेण आक्षिपति पूर्ववादी । तद्धि सदसत्त्वानधिकरणत्वं किं सत्त्वविशिष्टसत्त्वाभावो वा इति प्रथमः विकल्पः । सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं धर्मद्वयमिति द्वितीयः विकल्पः । सत्त्वात्यन्ताभाववत्वे सति असत्त्वात्यन्ताभावरूपं विशिष्टम् इति तृतीयः विकल्पः । एवं विकल्पत्रयमुक्त्वा क्रमेण त्रयाणामपि निरासः क्रियते । तत्र प्रथमकल्पः असाधुः सिद्धसाधनदोषापातात् । सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयमिति द्वितीयविकल्पोऽपि न साधुः, व्याघातः, **अर्थान्तरम्,** साध्यवैकल्यमिति दोषत्रयसम्भवात् ।

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ।[2] प्रकृतानुपयुक्तार्थाभिधानम् अर्थान्तरम् । ब्रह्म निर्धर्मिकं तथापि सत् यथा तद्वत् प्रपञ्चेऽपि सत्त्वासत्त्वरूपधर्मः नास्ति अतः सन्नेव भवितुमर्हति । 'केवलो निर्गुणश्च' इति श्रुत्या यथा शुद्धे ब्रह्मणि बाध्यत्वाभावरूपं सत्त्वं धर्मो नाङ्गीक्रियते । तथा ब्रह्मणि बाध्यत्वरूपमसत्त्वं तद्धर्मोऽपि नास्ति । तथा च निर्धर्म्मके ब्रह्मणि सत्त्वासत्त्वयोरभावेऽपि यथा तस्य सद्रूपत्वं सिद्धान्तिभिरङ्गीक्रियते तथा प्रपञ्चस्यापि सत्त्वासत्त्वराहित्येन सद्रूपत्वं स्यात् । प्रपञ्चस्य सद्रूपत्वे च तस्य सद्रूपत्वविरोधिमिथ्यात्वाऽसिद्ध्या अर्थान्तरदोषः । अनभिप्रेतार्थसिद्धिः अर्थान्तरम् । अभिप्रेतं प्रपञ्चस्य मिथ्यात्वं किन्तु अनभिप्रेतं प्रपञ्चस्य सद्रूपत्वं सिद्धमित्यतः **अर्थान्तरदोषः ।**

यदि दृष्टान्ते साध्यं न सिद्धं चेत् **साध्यवैकल्यम् ।** मिथ्थात्वानुमानस्य दृष्टान्तभूते शुक्तिरजते अबाध्यत्वरूपसत्त्वस्य अभावेऽपि बाध्यत्वरूपासत्त्वस्य अभावः न सिध्यतीति साध्यवैकल्यम् । माध्वमते शुक्तिरूप्यस्य असत्त्वाङ्गीकारात् अयं दोषः आपादितः । नापि सत्त्वात्यन्ताभाववत्त्वे सति असत्त्वात्यन्ताभावरूपं विशिष्टमिति तृतीयः विकल्पः । धर्मद्वयसाध्यपक्ष इव विशिष्टसाध्यपक्षेऽपि पूर्वोक्तव्याघातार्थान्तरसाध्यवैकल्यमिति दोषत्रयसम्भवात्। तस्मात् सिषाधयिषितस्य मिथ्यात्वस्य दुर्बोधत्वेन जगतः मिथ्यात्वं न सिध्यतीति

[1] त.चि.-1705

[2] न्या.द. ५।२।७

पूर्वपक्षसंक्षेपः ।

अत्रोच्यते सिद्धान्तः- सत्त्वविशिष्टासत्त्वस्याभावः इति प्रथमविकल्पं परित्यज्य सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयमिति द्वितीयः कल्पः परिगृह्यते । अस्मिन् कल्पे पूर्वपक्षिणोक्तरीत्या व्याघातार्थन्तरसाध्यवैकल्यदोषाः न भवितुमर्हन्ति । अत्र सिद्धान्ती व्याहतिं त्रिधा विकल्प्य दूषयति । सत्त्वासत्त्वयोरेकाभावेऽपरसत्त्वस्यावश्यकत्वेन या व्याहतिरुक्ता सा किं सत्त्वस्याभावः असत्त्वम् असत्त्वस्याभावः सत्त्वमिति सत्त्वासत्त्वयोः परस्परविरहरूपतय, आहोस्वित् सत्त्वाभावव्यापकमसत्त्वम् असत्त्वाभावव्यापकं सत्त्वमिति परस्परविरहव्यापकतया वा, अथवा सत्त्वाभावव्याप्यमसत्त्वम् असत्त्वाभावव्याप्यं सत्त्वमिति परस्परविरहव्याप्यतया वा इति । तत्र सत्त्वासत्त्वयोः परस्परविरहरूपव्याहतिः न सम्भवति । सिद्धान्ते सत्त्वं नाम त्रिकालाबाध्यत्वम् । तेन त्रिकालाबाध्यत्वरूपसत्त्वस्य अभावः असत्त्वं न भवति । किन्तु क्वचिदपि उपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वम् असत्त्वम्, तदभावश्च अत्र साध्यत्वेन विवक्षितः । उपाधिपदस्य अधिकरणं धर्मि वा अर्थः । तथा च किंचिद्धर्मनिष्ठं यत् सत्त्वं तस्मिन् प्रतीयमानं साध्यम् । सत्त्वेन प्रतीयमानत्वानधिकरणत्वं नाम सत्तातादात्म्याभावः इत्यर्थः । ब्रह्मणि आरोपितानां शशविषाणादीनां सत्तातादात्म्याभावः तद्व्यतिरेकः अत्र साध्यत्वेन उच्यते। अतः सत्त्वासत्त्वयोः परस्परविरहरूपत्वं नास्तीति न व्याघातः । अनेन शुक्तिरूप्ये साध्यवैकल्यमित्यपि निरस्तम् ।

सत्त्वासत्त्वयोः परस्परविरहव्यापकतया इति द्वितीयविकल्पेनापि न व्याघातः । शुक्तिरूप्ये त्रिकालाबाध्यत्वरूपं सत्त्वं नास्ति, सिद्धान्तिना विवक्षितं क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपासत्त्वमपि नास्ति। अतः साध्याभाववति सत्ताभाववति शुक्तिरूप्ये असत्त्वाभावस्य विद्यमानत्वेन व्यभिचारः । तथैव असत्त्वाभाववति ब्रह्मणि त्रिकालाबाध्यत्वरूपसत्त्वस्य विद्यमानत्वेन सत्त्वस्यापि असत्त्वव्यभिचारित्वम् । साध्यतज्जातीयान्यवृत्तित्वम् । यत् खलु साध्यतज्जातीयवृत्तित्वे सति अन्यत्र वर्तते तद् व्यभिचारि । तद्वृत्तित्वं व्यभिचारः ।[1] तथा च सत्त्वासत्त्वयोः परस्परविरहव्यापकत्वाभावात् द्वितीयोऽपि विकल्पः निरस्तः । नापि सत्त्वासत्त्वयोः परस्परविरहव्याप्यतया व्याघातः । यदि सत्त्वासत्त्वयोः परस्परविरहव्याप्यत्वमङ्गीकृत्यापि एकस्मिन् धर्मिणि प्रपञ्चे सत्त्वासत्त्वयोरभावः अभ्युपगम्येत तर्हि तयोः परस्परविरहव्याप्यत्वमेव भज्येत । यतः यो यदभावसमानाधिकरणस्वभावकः स न तदभावव्याप्यः इति व्याघातप्रयोजकीभूतव्याप्तेः यथा गोत्वाभावव्याप्यम् अश्वत्वम्, अश्वत्वाभावव्याप्यं च गोत्वम् इति गोत्वाभावाश्वत्वाभावयोः एकत्र उष्ट्रादौ सहोपलम्भात् व्यभिचारः । तथा च सत्त्वासत्त्वयोः परस्परविरहव्याप्यत्वेऽपि सत्त्वाभावासत्त्वाभावयोः एकस्मिन् धर्मिणि प्रपञ्चे सम्भवात् न

[1] न्यायभाष्यवार्तिकम्। पे.नं – 162.



ISSN: 2320-740X

व्याघातः ।

निर्धर्म्मके ब्रह्मणि सत्त्वासत्त्वयोरभावेऽपि यथा तस्य सद्रूपत्वं सिद्धान्तिभिरङ्गीक्रियते तथा प्रपञ्चस्यापि सत्त्वासत्त्वराहित्येन सद्रूपत्वं स्यात् । प्रपञ्चस्य सद्रूपत्वे च तस्य सद्रूपत्वविरोधिमिथ्यात्वाऽसिद्ध्या अर्थान्तरमित्यपि नाशङ्कनीयम् । 'सत्यं ज्ञानम् अनन्तं ब्रह्म' इति श्रुतिप्रामाण्यात्, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिना ब्रह्मणः कारणत्वश्रवणात्, कारणस्य ब्रह्मणः सद्रूपत्वेन, सद्रूपे ब्रह्मणि सर्वेषां द्रव्यादीनां तादात्म्येन अध्यस्ततया आध्यासिकसम्बन्धस्य च सर्वत्र अविशेषात् सर्वत्र द्रव्यादिषु सत् सदित्यनुगप्रतीतिः जायते । किन्तु प्रपञ्चस्य प्रत्येकं सत्तास्वभावकल्पने मानाभावात् कल्प्यमाने च घटः सन्, पटः सन् इत्याद्यनुगतव्यवहाराभावप्रसङ्गाच्च ब्रह्मवत् प्रपञ्चस्य सद्रूपत्वं न सम्भवति ।

यद्यपि प्रपञ्चे सत्त्वप्रतीतिरस्ति तथापि सत्त्वप्रतीतिः ब्रह्मगतसत्त्वेनैव निर्वोढुं शक्यते इत्यतः ब्रह्मसत्त्वापेक्षया अतिरिक्तसत्त्वं प्रपञ्चस्य न स्वीक्रियते मानाभावात् । एकैकस्य प्रपञ्चस्य एकैकं सत्त्वं कल्पनीयमित्यतः विनिगमनाविरहात् अनुगतप्रतीत्यनुपपत्तिप्रसङ्गः। ब्रह्मसत्त्वमेकमेव सर्वत्र प्रतीयते इत्यतः प्रतीतेः व्यवहारस्य च अनुगमकत्वमुपपद्यते । इत्थं च प्रपञ्चस्य सद्रूपत्वाभावात् न अर्थान्तरप्रसक्तिः । अतः दोषत्रयाभावात् सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयं साध्यम् ।

अत्र पुनः ब्रह्मवत् सत्त्वधर्मराहित्येऽपि जगतः सद्रूपत्वेन अमिथ्यात्वमुपपद्यते इति अङ्गीकृत्याऽपि 'तुष्यतु दुर्जनः' न्यायेन साध्यान्तरमाह सिद्धान्ती – सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं वा साध्यमिति । अत्र आत्यन्तिकभेदः विवक्षितः । तथा च सदवृत्तिः सद्भेदः असदवृत्तिरसद्भेद इति भेदद्वयं साध्यम् । तथा च प्रपञ्चः सदात्मको न, असदात्मकोऽपि न, सदसदुभयात्मकोऽपि न । अतः सद्भेदः असद्भेदः एतदुभयमपि अस्ति प्रपञ्चे इत्यतः मिथ्यात्वमेव सिद्ध्यति न तु अनभिप्रेतमित्यतः न अर्थान्तरम् ।

सद्भेदासद्भेदोभयं साध्यम् उत सत्त्वाभावासत्त्वाभावोभयं साध्यमिति स्वीकारे साध्याप्रसिद्धिदोषः इति शङ्का । पक्षातिरिक्ते ब्रह्मणि सद्भेदः नास्तीत्यतः सद्भेदासद्भेदोभयं नास्ति । तुच्छे असद्भेदः नास्तीत्यतः सद्भेदासद्भेदोभयं नास्ति । सद्भेदासद्भेदोभयं साध्यम् उत सत्त्वाभावासत्त्वाभावोभयं सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावविशिष्टं वा भवतु साध्यं पक्षातिरिक्ते कुत्रापि न प्रसिद्ध्यति । प्रपञ्चस्यसर्वस्यापि पक्षत्वात् इति साध्याप्रसिद्धिः ।

सत्त्वाभावः असत्त्वाभावः एतदुभयं विशिष्टं यत्किमपि साध्यं भवतु तत् निर्धर्मिकब्रह्मणि भवितुमर्हतीति । अस्य मिथ्यात्वलक्षणस्य ब्रह्मणि सत्त्वात् अतिव्याप्तिः अतः एतादृशमिथ्यात्वं साध्यत्वेन विवक्षितुं न शक्यते इति शङ्का । तत्र समाधानम्- निर्धर्मिकं ब्रह्म तत्र सत्त्वमिति धर्मः न भवति । सत्त्वात्यन्ताभावरूपधर्मोऽपि न भवति ।

एवमेव असत्त्वात्यन्ताभावरूपधर्मोऽपि नास्तीत्यतः सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपोभयं ब्रह्मणि नास्तीति मिथ्यात्वलक्षणस्य ब्रह्मणि नातिव्याप्तिः । यत्र उभयं साध्यते तत्र स्थले उभयान्तर्गतस्य प्रत्येकं प्रसिद्धिरस्ति चेत् पर्याप्तं, यत्र विशिष्टं साध्यते तत्र स्थले विशेष्यस्य विशेषणस्य वा प्रसिद्धिरस्ति चेत् पर्याप्तमिति स्वीकारे तु सद्भेदः अस्ति पक्षातिरिक्ते तुच्छे, असद्भेदः अस्ति पक्षातिरिक्ते ब्रह्मणि इत्यतः उभयान्तर्गतस्य प्रत्येकं साध्यस्य प्रसिद्धिः अस्तीत्यतः साध्याप्रसिद्धिदोषो वार्यते । विशिष्टं साध्यमिति स्वीकारेऽपि विशेषणीभूतसद्भेदः अस्ति तुच्छे, असद्भेदः अस्ति ब्रह्मणि इत्यतः न अंशतः **साध्याप्रसिद्धि**दोषः ।

तस्मात् सदसत्त्वानधिकरणत्वमिति प्रथममिथ्यात्वलक्षणेन सत्त्वान्त्यन्ताभावासत्त्वान्त्यन्ताभाव-धर्मद्वयम्, सत्प्रितियोगिकासत्प्रतियोगिकभेदद्वयं वा विवक्षितम् । तच्च प्रपञ्चे सम्भवतीति द्वैतस्य मिथ्यात्वे अद्वैतः सिध्यति ।

**********

# काव्यादर्शे उपमाविवेचनम्

**श्री नारायन सामाइ**

साहित्यविभागीयशोधच्छात्रः

रसास्वादजनितविगलितवेद्यान्तररूपपरमप्रयोजनवत् काव्यं[1] कस्य वा मनः न हरति ? तादृशं मनोहारि काव्यं शब्दार्थरूपं शरीरं बिभर्ति, यत् शरीरं, मानवशरीरमाभूषणैः यथा अलङ्क्रियते तथा अनुप्रासोपमाद्यलङ्कारैः विभूषितं भवति । मानवशरीरस्याभूषणानि यथा कटककुण्डलादिनामभिः उच्यन्ते तथैव काव्यशरीरस्याभूषणानि शब्दार्थभेदेन अनुप्रासोपमादिनामभिः व्यवह्रियन्ते । तेषु काव्यस्य आत्मभूतस्य रसस्य उपकारकत्वं शब्दालङ्कारापेक्षया अर्थालङ्काराणामेव अधिकतया भवतीति हेतोः तेषामेव काव्येषु अधिकं प्राधान्यं दत्तमस्ति काव्यशास्त्रिभिः । तादृशार्थालङ्कारेषु सर्वालङ्कारमूलत्वेन परिगणितस्योपमालङ्कारस्य विशिष्टं स्थानं वरीवर्ति। स चालङ्कारः वेदादारभ्यैव प्रयोगपथमागतो दृश्यते । कालिदासादिभिः महाकविभिस्तु नितान्तमेव समादृतोऽयमलङ्कारः । तेन सर्वैरपि काव्यशास्त्रिभिः स्वग्रन्थेषु अयमलङ्कारः विवेचितः । तेषु आचार्यदण्डिना काव्यादर्शे प्रतिपादितम् उपमास्वरूपं मयाऽत्र विमृश्यते ।

आचार्यदण्डी भरतोक्तोपमायाः लक्षणमाधारीकृत्य एकं लक्षणं तस्य काव्यादर्शस्य द्वितीय परिच्छेदे

[1] सकलप्रयोजनमौलिभूतं रसास्वादसमुद्भूतं विगलितवेद्यान्तरमानन्दम् - काव्यप्रकाशः-१/२


ISSN: 2320-740X

प्रतिपादयति-

**यथाकथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते ।**
**उपमा नाम सा, तस्याः प्रपञ्चोऽयं प्रदर्श्यते ॥**[1]

अभीप्सितस्य विषयस्य सम्यक् प्रतिपादनार्थं, तस्य विषयस्य वा पदार्थस्य जाति, क्रिया, गुण, द्रव्यादिषु स्वरूपेषु एकेन स्वरूपेण सह समानरूपेण स्थितम् अन्यं विषयम् उद्भूतरूपेण अथवा गम्यरूपेण यदि कश्चनः वर्णयति तदा उपमा अलङ्कारः भवति इति दण्डिना तत्स्वरूपम् आविष्कृतम् । अर्थात् उपमालङ्कारघटने तिस्र पद्धतयः सन्ति - द्वौ पदार्थौ जाति, क्रिया, गुण, द्रव्येषु अन्यतमस्य कस्यचित् सादृश्यप्रतीतिः शब्दः अभिधाद्वारा उपमाम् अभिदधाति, अर्थः व्यञ्जनाद्वारा तां व्यञ्जयति, यत् काव्यशास्त्रकारा उपमेयम्, उपमानं, साधारणधर्मः, वाचकशब्दद्वारा तद्विवृण्वन्ति ।

यद्यपि दण्डी उपमालक्षणं भरतोक्तं लक्षणमाधारीकृत्य प्रोक्तवान् तथापि उपमाभेदांस्तु यास्काचार्यस्य उपमाभेदमाधारीकृत्य न्यरूपयत् ।

दण्डिना कृतः भेदः पृथक्तया केषुचित् विषयेषु विभक्तः भवति -

**क. उपमानस्य विभिन्नविशेषता**

**१. बहुत्वम्(**बहूपमा, मालोपमा**)**

**यस्यामुपमायाम् एकस्य उपमेयस्य तुलना वहुभिः उपमानैः सह क्रियते तदा बहुत्वं भवति। बहूपमा मालोपमा[2] च एतस्य उदाहरणम् ।**

**२. असामान्यत्वम्** (अद्भुतोपमा, असाधारणोपमा, असम्भावितोपमा, विक्रियोपमा)

**यत्रोपमानस्य साधारणधर्मदृष्ट्या किञ्चित् साम्यं, किञ्चित् वैषम्यं , कदापि उपमेयेन सह वैरुद्ध्यं भवति तदा असामान्यत्वम् भवति ।**

**३. नियमनम्** (नियमोपमा, अनियमोपमा)

एकस्मिन् उपमाने उपमेयस्य साधारणधर्मः कदाचित् नियतरूपेण तिष्ठति कदाचिच्च अनियतरूपेण, तत्र नियमनम् भवति । नियमोपमाऽनियमोपमयोः प्रतीतिः अत्र भवति ।

[1] काव्यादर्श-२/१४

[2] 'ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥'काव्यप्रकाशः-दशमोल्लासे, मालोपमानिरूपणावसरे ।

**ख. अलङ्कारान्तरम् – उपमालङ्कारः अर्थालङ्कारस्तथापि अन्यैः अलङ्कारैः कथं सा उपमा साधिता भवति, तत् अस्मिन् प्रकारे पर्यालोचितम् । तत् यथा-**

**१. अपह्नुति-** (प्रतिषेधोपमा, तत्त्वाख्यानोपमा)

**२. उत्प्रेक्षा-** (उत्प्रेक्षितोपमा, अभूतोपमा)

**३. तुल्ययोगिता-** (तुल्योयोगोपमा)

**४. श्लेष-** (श्लेषोपमा, समानोपमा)

**ग. धर्मः**

**यस्यामुपमायां धर्मः वाच्यत्वेन, उपमानेन सह गम्यत्वेन वा भवति तत्र साधारणधर्मदृष्ट्या उपमालङ्कारः सिद्ध्यति ।**

**१. उक्त-** (धर्मोपमा, समुच्चयोपमा, अतिशयोपमा)

**२. गम्य-** (वस्तूपमा)

**घ. उपमानम् उपमेयश्च**

**यत्र उपमानं कदाचित् उपमेयं भवति, अथवा उपमेयं कदाचित् उपमानं भवति तत्र उपमान उपमेयश्च भवति । अत्र विपर्यासोपमा अन्योन्योपमा विरोधोपमानां प्रतीतिः भवति ।**

**१. विपर्ययः**- (विपर्यासोपमा, अन्योन्योपमा)

**२. विरोधः-** (विरोधोपमा)

**ङ. भ्रमः**

**यत्रोपमाने भ्रमवशात् उपमा भवति तत्र भ्रमः भवति । यथा-(**मोहोपमा, संशयोपमा, निर्णयोपमा)

**च. उपमान-निन्दा—**

यत्र उपमाने निन्दा भवति तत्र उपमाननिन्दा भवति । यथा- निन्दोपमा **उपमान-स्तुतिः** - उपमाने यत्र स्तुतिः भवति तत्र उपमान-स्तुतिः भवति । यथा- प्रशंसोपमा, चाटूपमा

**छ. वाक्यभेदः**

**१. वाच्यसाम्यम्** (वाक्यार्थोपमा)

**२. गम्यसाम्यम्** (प्रतिवस्तूपमा)



ISSN: 2320-740X

**ज. सादृश्यविवक्षा—** आचिख्यासोपमा

दण्डिना कृताः उपमालङ्कारस्य भेदाः सम्भवतः कवेः भावजगतः वैविध्यमनुसृत्य वर्तन्ते । एतान् भेदान् स्पष्टीकृतवान् उद्भटः । स एतान् भेदान् व्याकरणतर्कद्वारा शाब्दी-आर्थी, पूर्णा-लुप्ता, समास-तद्धित, आचारप्रत्ययान्त, नामधातु वाक्यादिषु उपमायाः भेदान् परिकल्पितवान् । अनन्तरं कालानुसारेण अन्ये आचार्याः उद्भटेन परिकल्पितान् भेदान् गृहीत्वा उपमायाः भेदान् इतोऽपि विस्तृतवन्तः । इति शम् ।

*******************

# विद्यामाधवः तस्य व्याख्यानपद्धतिश्च

**कु. सौन्दर्यलक्ष्मीः**

साहित्यविभागीयशोधच्छात्रा

भारतीयवाङ्मये संस्कृतभाषायाः इव संस्कृतसाहित्यस्य महत्त्वपूर्णं स्थानं वर्तते । संस्कृतसाहित्यस्य अविभाज्यम् अङ्गं भवति काव्यम् । जनजीवननिर्माणे, व्यवहारसम्पादने काव्यानां योगदानम् अद्भुतमेव । तत्र कारणं भवति काव्यानां कान्तासम्मितत्त्वम् । वेदाः प्रभुसम्मितमिव अनुल्लङ्घनीयाः, पुराणानि मित्रवचनवद् गमनार्हाणि, परन्तु काव्यानि कान्तासम्मितवत् अङ्गीकरणीयान्येव भवन्ति । अतः एव काव्यानि भारतीयसंस्कृतेः वैशिष्ट्यसम्पादने काराणानीति मुक्तकण्ठेन वक्तुं शक्यते । काव्यानाम् अवगमने, तत्रान्तर्हितानां तत्त्वानाम् अवबोधने व्याख्यानानि अत्यन्तम् उपयुक्तानि भवन्ति । भारतीयभूमौ अनेके व्याख्याकाराः जाताः, तत्रैकोऽयं कर्णाटदेशीयः विद्यामाधवपण्डितः ।

श्रीक्षेत्रगोकर्णाद्दक्षिणे भागे गुणवतीति ग्रामे पण्डितोऽयं जनिं प्राप । वसिष्ठगोत्रोद्भवः तैत्तरीययजुश्शाखान्वितः नारायणपूज्यपादः भवानी च अस्य पितरौ । सर्वशास्त्रपारङ्गतस्य विद्यामाधवस्य द्वादशकृतयः इदानीं यावत् उपलब्धाः । यथा – मुहूर्तदर्शनम्, मेघमालामञ्जरी, मेघानयनम्, पार्वतीरुक्मिणीयम्, लघुप्रकाशिका, मुहूर्तदर्पणः इत्येते स्वतन्त्राः ग्रन्थाः, सौन्दर्यलहरीव्याख्या श्रीसूक्तव्याख्या चेति व्याख्याग्रन्थाः, एतदतिरिच्य विद्यामाधवीयमिति किरातार्जुनीयव्याख्या, सन्देहविषौषधिरिति शिशुपालवधव्याख्या, कामदुघेति नैषधव्याख्या, दीपिकेति कुमारसम्भवव्याख्या इति चतुर्णां महाकाव्यानां व्याख्यानानि विरचितानि सन्ति । रघुवंशमाहाकाव्यस्य व्याख्यानम् एतावता कुत्रापि न प्राप्तम् । तथापि पञ्चमहाकाव्यान्यपि अनेन पण्डितेन व्याख्यातानि स्युः इति संदिह्यते ।

व्याख्यानं नाम विशेषेण ख्यापनमथवा कथनम् । व्याख्यानं षड्भिः प्रकारैः सम्भवति – पदच्छेदः पदार्थकथनम् समासकथनम् वाक्ययोजनम् आक्षेपः समाधानञ्चेति । एतान् षट्प्रकारान् विद्यामाधवः आवश्यकतानुसारं सहृदयस्य मनोनुकूलं तत्र तत्र दर्शयति। प्रत्येकं श्लोके सर्वेऽपि प्रकाराः उपयुक्ताः न दृश्यन्ते ।

**पदच्छेदः -** सम्पूर्णे व्याख्याने पदच्छेददर्शनम् अनावाश्यकम् । तथापि क्वचित् व्याख्याने अनिवार्यं भवति । विद्यामाधवेन कुमारसम्भवव्याख्याने क्वचित् पदच्छेदः दर्शितः, यथा – 'अन्य इति पदच्छेदः कार्यः' ।

**पदार्थकथनम्** – सामान्यतः विद्यामाधवः श्लोके उक्तानां सर्वेषां पदानाम् अर्थं वदति । क्वचित् कोशमपि उद्धरति । अमरकोशः, क्रियानिघण्टुः, हलायुधादिकोशानामुल्लेखः व्याख्याने द्रष्टुं शक्यते । 'श्रुताखिलव्याकरणोऽहम् ' इति तस्यैव कथनानुसारम् अधीतव्याकरणः विद्यामाधवः तत्र तत्र व्याख्याने व्याकरणविशेषान् दर्शयति । नैषधीयचरितव्याख्याने यथा – 'परस्परामर्पितामिति कर्मव्यतिहार इत्यादिना द्विवचनम्, स्त्रीपुंनपुंसकयोरुत्तरपद इत्यादिना आम् ' इति ।

**समासकथनम्** – समस्तपदानां विग्रहवाक्यं प्रायः सर्वत्र व्याख्याने कृतमस्ति । परन्तु समासस्य नाम क्वचिदेव उक्तं दृश्यते ।

**वाक्ययोजनम्** – वाक्ययोजनं नाम अन्वयकरणम् । अन्वयः द्विप्रकारकः खण्डान्वयः दण्डान्वयश्च । सर्वत्र व्याख्याने स्पष्टतया अन्वयः कृतः दृश्यते । परन्तु सन्दर्भानुसारं क्वचित् दण्डान्वयः, क्वचित् खण्डान्वयः इति प्रकारद्वयमपि विद्यामाधवेन उपयुक्तं दृश्यते ।

**आक्षेपः** – विद्यामाधवः अन्येषामपि अभिप्रायान् तत्र तत्र संगृह्य केचिदाहुः, केचिदन्यथा व्याचक्षते इत्यादिना निर्दिशति । सन्दर्भानुसारं प्राचीनग्रन्थानाम् अनुसन्धानेन निर्दिष्टाः अभिप्रायाः केषामिति स्वयं ज्ञातव्यं भवति अध्येतृभिः ।

**समाधानम्** – आक्षेपाणां समाधानकथनमपि व्याख्यानस्य मुख्यमङ्गं भवति । विद्यामाधवेन व्याख्यानेषु कृतं समाधानं क्वचिदित्थं दृश्यते – 'तस्मान्न दोषः', 'सत्यदेतदत्र गतिं ब्रूमः' इत्यादि ।

एतान् प्रकारान् अतिरिच्य अन्येऽपि अंशाः यथा पाठभेदकथनम्, रसालङ्कारादिकथनम्, छन्दसः निर्देशः, स्ववंशवर्णनम्, पुष्पुका इत्यादयः द्रष्टुं शक्यन्ते । नैषधीयचरितव्याख्यानस्यारम्भे कृतः परिचयः यथा – 'यं प्रसूतवसिष्ठवंशतिलकश्रीनारायणाचार्यः श्रीकविराजकेशवोद्भूता भवानी च तेन विरच्यतेष्टसुधिया सर्वज्ञसंज्ञाजुषा टीका कामदुघा.....' इत्यादि । प्रत्येकं सर्गस्यान्ते पुष्पुकायां सर्गसंख्या, काव्यस्य नामादिकथनं यथा – 'इति


ISSN: 2320-740X

श्रीमद्वसिष्ठकुलतिलककविराजप्राज्ञसर्वज्ञमाधवकृते कामधेनुनाम्नि नैषधकाव्यनिबन्धने प्रथमस्सर्गः' इति ।

इत्येवं रूपेण विद्यामाधवेन काव्यानां व्याख्यानानि विस्तृतया कृतानि वर्तन्ते । ज्यौतिष-व्याकरण-न्याय-वेदान्तादिशास्त्रेषु पण्डितेनानेन कृतः परिश्रमः व्याख्यानेषु दृश्यते । अतः काव्याध्येतारः सहृदयाः अस्य व्यख्यानस्य सहयोगेन विशिष्टं ज्ञानमवश्यमेव प्राप्नुवन्ति ।

**********

# अद्वैतवेदान्ते जाग्रदाद्यवस्थानां निरुपणम्

**श्री सुदर्शन भट्टः**

वेदान्तविभागीयशोधच्छात्रः

भारतीयदर्शनपरम्परायां वेदान्तदर्शनं मुख्यं स्थानं भजते । आचार्याणां मधुसूदनयतीन्द्राणां वचनानुसारेण वेदान्तदर्शनं "दर्शनीयतमं दर्शनम्[1]" इति । इदं दर्शनं प्रस्थानत्रयात्मकम् । उपनिषदः भगवद्गीता ब्रह्मसूत्राणि चेति त्रीणि प्रस्थानानि । प्रस्थानत्रयात्मकस्य वेदान्तशास्त्रस्य प्रतिपाद्यः विषयः अद्वितीय आत्मा । अयञ्च आत्मा अन्तःकरणाद्युपाधिसहितः सन् जीव इत्याख्यायते । तदुपाधिरहितः परमात्मा इति निगद्यते । स च जीवः स्वकर्मानुसारं जाग्रति स्वप्ने च स्वकर्मफलं भुङ्क्ते । सुषुप्तौ कर्मबन्धरहितः तिष्ठति । तथा च जाग्रत्स्वप्नसुषुप्त्याख्याः तिस्रः अवस्थाः शास्त्रेषु लोके च प्रसिद्धाः वर्तन्ते ।

"इन्द्रियैरर्थोपलब्धिः जाग्रदि[2]"त्युच्यते । यस्यामवस्थायां श्रोत्रादीन्द्रियैः शब्दस्पर्शादीनाम् विषयाणाम् उपलब्धिर्भवति सा जाग्रदवस्था । जाग्रदवस्थायां जीवः स्थूलविषयान् भुङ्क्ते । एषः विषयः माण्डूक्योपनिषदि श्रूयते "जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमःपादः[3]" इति । जागरितं स्थानमस्येति जागरितस्थानः, बहिः स्वात्मव्यतिरक्ते विषये प्रज्ञा यस्य सः बहिष्प्रज्ञः, "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ[4]" इति श्रुत्यन्तरे उक्तानि सप्ताङ्गानि यस्य सः सप्ताङ्गः । बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश, वायवश्च प्राणादयः पञ्च,

[1] सिद्धान्तबिन्दुः

[2] पञ्चदशी १-३

[3] माण्डूक्योपनिषत् १-२

[4] छान्दोग्योपनिषत् ५-२८-२

ISSN: 2320-740X

अन्तःकरणचतुष्टयं चेति एकोनविंशतिमुखानि यस्य सः एकोनविंशतिमुखः । व्यष्टिसमष्टिभेदेन जाग्रदाद्यवस्थासु प्रत्येकम् आत्मनः रूपद्वयं वर्णितम् । जाग्रदवस्थाभिमानी व्यष्टिजीवः विश्वः, समष्टिजीवः वैश्वानर इति चोच्यते। इत्थं जाग्रदवस्था निरूपिता जीवस्य द्वितीयावस्था स्वप्नः । यत्र ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च कार्याभावे जाग्रदवस्थासंस्कारद्वारा गजाश्वादीनां दर्शनं शब्दस्पर्शादीनाम् अनुभवः च जायते सा स्वप्नावस्था । तथा चोक्तं "करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः[1]" इति । एवञ्च स्वप्ने जाग्रद्वासनया अन्तःकरणं नानाविधविषयाकारेण परिणमते । तान् विषयान् भोग्यतया स्वीकृत्य जीवः स्वप्ने भोगान् भुङ्क्ते । स्वप्नावस्थायां व्यष्टिसूक्ष्मशरीराभिमानी जीवः तैजसः इत्युच्यते । समष्टिसूक्ष्मशरीराभिमानी जीवः हिरण्यगर्भः इति कथ्यते । तथा चोक्तं माण्डूक्ये – "स्वप्नस्थानः अन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः[2]" इति। स्वप्नः स्थानमस्य इति तैजसः स्वप्नस्थानः, इन्द्रियापेक्षया अन्तस्त्वान्मनसः तद्वासनारूपा च स्वप्ने प्रज्ञा यस्येति अन्तःप्रज्ञः, ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च दश, वायवः प्राणाः पञ्च, अन्तःकरणचतुष्टयं चेति एकोनविंशतिमुखः, विषयशून्यायां प्रज्ञायां केवलप्रकाशस्वरूपायां विषयत्वेन भवतीति तैजसः ।

स्वप्नावस्थायाम् अनुभूयमानाः गजाश्वादिविषयाः प्रबोध इव सत्याः उत मिथ्या इत्याशङ्का उदेति । तस्याः आशङ्कायाः परिहाररूपेण सूत्रकारः सन्ध्याधिकरणं रचयामास । "सन्ध्ये सृष्टिराह हि[3]" इत्यस्मिन् सूत्रे "अथ रथान्रथयोगान्पथः सृजते[4]" इति श्रुतिम् आश्रित्य स्वाप्नसृष्टिः तात्त्विकीति पूर्वपक्षं प्रापय्य सः "मायामात्रं तु कात्स्न्येनानभिव्यक्तस्वरूपत्त्वात्[5]" इति सिद्धान्तं सूत्रयामास । स्वाप्नसृष्टिः मायामयीति अर्थात् मिथ्या रथादिनिर्माणे अपेक्षितायाः सामग्र्याः अभावात् इति तदर्थः । तथा च श्रुतिः "न तत्र रथा न रथयोगा न पन्थानो भवन्ति[6]" इति । तथापि केचित् स्वप्नाः सत्यस्यार्थस्य सूचकाः । तथा च श्रुतिः "पुरुषं कृष्णं कृष्णदन्तं पश्यति स स एनं हन्ति" इति । श्रुत्यन्तरं च "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने[7]" इति ।

---

1 पञ्चदशी १-४

2 माण्डूक्योपनिषत् मं-३

3 ब्रह्मसूत्रम् ३-२-१

4 बृहदारण्यकोपनिषत् ४-३

5 ब्रह्मसूत्रम् ३-२-२

6 बृहदारण्यकोपनिषत् ४-३-१०

7 छान्दोग्योपनिषत् ५-२-८


ISSN: 2320-740X

सुषुप्तिः तृतीया अवस्था । का नाम सुषुप्तिरिति जिज्ञासायां श्रूयते “यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्[1]” इति । यस्मिन् काले सर्वेषामिन्द्रियाणाम् अन्तःकरणस्य च कार्यं न भवति, केवलसाक्षिवेद्यत्वमात्रम् अनुभूयते तत्सुषुप्तिस्थानमिति तदर्थः । सुषुप्त्यवस्थायां जीवः कारणशरीराभिमानी सन् त्रिविधान्तःकरणव्यापारानुपसंहृत्य प्राज्ञो भूत्त्वा आनन्दमनुभवति ।

ब्रह्मसूत्रे तृतीयाध्यायस्य द्वितीयपादे द्वितीयाधिकरणे सुषुप्त्यवस्थायां जीवस्य अवस्थितिः क्वेति विचार्यते – “तदभावो नाडीषु तच्छ्रुतेरात्मनि च[2]” इति सूत्रेण । तत्र अनेकाः श्रुतयः सुषुप्तिविषयाः श्रूयन्ते । तद्यथा – “आसु तदा नाडीषु सृप्तो भवति । ताभिः प्रत्यवसृप्य पुरीतति शेते[3]” । “सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति” इत्यादयः । अत्र नाडीपुरीतत्परमात्मानः जीवस्य सुषुप्तिस्थानमिति श्रूयते । “सता सोम्य सम्पन्नो भवति स्वमपीतो भवति[4]” इति ब्रह्मसम्पत्तिं स्वरूपे अवस्थानं च समानतया श्रुतम् । अतः सुषुप्तः कदाचित् नाडीषु शेते, कदाचित् पुरीतति, कदाचित् ब्रह्मणि इति विकल्पः आश्रीयते इति पूर्वपक्षे प्राप्ते सिद्धान्तः सूत्रितः “तदभावो नाडीषु तच्छ्रुतेरात्मनि च” इति । तच्छब्देन पूर्वाधिकरणे निरूपितं स्वप्नदर्शनं परामृश्यते । तस्य अभावः सुषुप्तिरित्यर्थः । सूत्रे ‘च’कारः पुरीतत्समुच्चयार्थः । नाड्यादिश्रुतयः समुच्चयेन सुषुप्तिस्थानरूपम् अर्थं समर्पयन्ति । तत्र हेतुरुक्तः तच्छ्रुतेरिति । नाड्यादीनां बहुत्र सुषुप्तिस्थानत्वं श्रूयते । तच्च सुषुप्तिस्थानत्वं समुच्चयेन सङ्गृहीतं भवति न तु विकल्पे । जीवः नाडीषु पुरीतति ब्रह्मणि च स्वपिति इति समुच्चयो युज्यते । एवं सुषुप्तिनिरूपणेन “जीवो ब्रह्मैब नापरः[5]” इत्यात्मैक्यमेव श्रुत्या बुबोधयिषितम् । वस्तुतः वेदान्तानाम् अवस्थात्रयनिरूपणे नास्ति तात्पर्यम् । किन्तु लोके अवस्थावत्त्वेन जीवस्य सर्वानुभवसिद्धत्त्वात् अवस्थात्रयं जीवे स्वाभाविकमिति बहवः मन्यन्ते । जीवस्य ब्रह्माभिन्नत्त्वेन निर्विशेषचैतन्यरूपत्त्वात् न कोऽपि सांसारिकधर्मः तस्मिन् विद्यते । तथैव स्थूलानां वा सूक्ष्माणां वा विषयाणां भोगः जीवस्य उपाधिकृत एव न तु स्वाभाविकः । तथा चोक्तम् “अहं भोजनं नैव भोग्यं न भोक्ता[6]” इति । जीवस्य स्थूलशरीरस्य उपाधेः सम्बन्धे सति सः जागर्ति इत्युच्यते । सूक्ष्मशरीरस्य सम्बन्धे सति सः स्वप्नान् पश्यति । उभयशरीस्योपरमे अविद्यामात्रसाक्षिकः सन् सुषुप्तो भवति । तथा चोक्तं भाष्यकारैः – “मनःप्रचारोपाधिविशेषसम्बन्धादिन्द्रियार्थान्गृह्णंस्तद्विशेषापन्नो जीवो जागर्ति,

[1] माण्डूक्योपनिषत् मं-४

[2] ब्रह्मसूत्रम् ३-२

[3] छान्दोग्योपनिषत् ८-६-३

[4] छान्दोग्योपनिषत् ६-८-१

[5] विवेकचूडामणिः

[6] निर्वाणषट्कम् श्लोकसंख्या- ४

तद्वासनाविशिष्टः स्वप्नान्पश्यन्मनः शब्दवाच्यो भवति स उपाधिद्वयोपरमे सुषुप्तावस्थायामुपाधिकृत-विशेषाभावात्स्वात्मनि प्रलीन इव" इति । एवं शाङ्करदर्शनानुसारं जीवे जाग्रदाद्यवस्थाः कल्पिताः, न तु स्वाभाविकाः ।

*********

# न्यायशास्त्रानुसारं परिमाणविचारः

**श्री जनार्दन सुवेदी**

नव्यन्यायविभागीयशोधच्छात्रः

षोडशपदार्थानां तत्त्वज्ञानान्मोक्षो जायते अतो महर्षिगौतमेन षोडशपदार्थानां निरूपणं कृतं तद्यथा- **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां- तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1] इति । एतेषु पदार्थेषु द्वितीयः पदार्थः प्रमेयम्, तच्च द्वादश तदुक्तं सूत्रकारेण- **आत्म-शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम्।** [2] इति ।

एतेष्वपि चतुर्थस्यार्थात्मकप्रमेयस्यापि षड् भेदाः तद्यथा – द्रव्यगुणकर्मसामान्यविशेषसमवायाः षडर्था इति, अर्थेष्वपि द्वितीयार्थो गुणः, गुणाश्च चतुर्विंशतिः , चतुर्विंशतिगुणेषु षष्ठो गुणः परिमाणं तदिदानीं विचार्यते तथा च परिमाणस्य लक्षणं **परिमितिव्यवहारासाधारणकारणत्त्वं परिमाणत्त्वमति** , परिमाणं च चतुर्विधम् अणु महद् दीर्घं ह्रस्वं चेति, अत्र च भावप्रधानो निर्देशः, तेन अणुत्त्वम्, महत्त्वम्, दीर्घत्त्वम्, ह्रस्वत्त्वञ्च परिमाणं ज्ञातव्यम् । चतुर्णामपि परममध्यमभेदेन द्विविधं तत्र परमाणुत्त्वह्रस्वत्वे परमाणौ, मध्यमाणुत्त्वह्रस्वत्त्वे द्व्यणुके, परममहत्त्वपरमदीर्घत्त्वे विभुद्रव्येषु, आत्र्यणुकादुक्तादन्यत्र मध्यममहत्त्वदीर्घत्त्वे । ननु अणुत्त्वह्रस्वत्त्वयोः दीर्घत्वमहत्त्वयोरैक्यात् कथं परिमाणस्य चातुर्विध्यमिति चेन्न, तदवधिकाणुतया प्रतीयमानेऽपि तदवधिकह्रस्वत्त्वाऽव्यवहारात् , यथा एकः स्थूलः परन्तु ह्रस्वः, अपरश्च कृशः परन्तु दीर्घः एतादृशं यत्र रज्जुद्वयं वर्तते, तत्र कृशरज्जौ स्थूलावधिकाणुतया प्रतीयमानेऽपि तदवधिकह्रस्वत्त्वस्य व्यवहारो न क्रियते अत ह्रस्वत्त्वमणुत्त्वाद्भिन्नतया स्वीक्रियते । एवमेव कृशावधिकमहत्त्ववत्तया प्रतीयमानेऽपि तदवधिकदीर्घत्त्वव्यवहारो न क्रियते अतः दीर्घत्त्वमपि महत्त्वाद्भिन्नत्वेन स्वीक्रियते, वर्तुलत्वचतुरस्रत्वादयश्चोक्तपरिमाणभेदा एव अतः

---

[1]न्यायसूत्रम् १/१/१

[2] न्या.सू.1.1.9


ISSN: 2320-740X

परिमाणस्य सिद्धं चातुर्विध्यम् । तच्च परिमाणं नित्यमनित्यञ्चेति द्विविधं नित्ये विद्यमानं नित्यम् अर्थात् विभुपरमाणुपरिमाणं नित्यम् अन्यत्र द्व्यणुकादावनित्यमिति । तस्य च परिमाणस्योत्पत्तिस्त्रिधा । तदुक्तं भाषापरिच्छेदे –

**सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते ।**[1]

परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमेन स्वाश्रयारब्धद्रव्यपरिमाणारम्भकत्वाभावात् द्व्यणुकपरिमाणं तु न परमाणुपरिमाणादेवं त्र्यणुकपरिमाणमपि न द्व्यणुकपरिमाणाज्जन्यते । द्व्यणुकस्याणुपरिमाणं परमाणुत्त्वापेक्षया नोत्कृष्टम्, त्रसरेणुपरिमाणं तु न द्व्यणुकपरिमाणसजातीयम्, अतः द्व्यणुकपरिमाणं परमाणुगतद्वित्त्वसंख्यायाः, त्र्यणुकपरिमाणं द्व्यणुकगतत्रित्त्वसंख्यायाः जायते त्रसरेणुपरिमाणस्य द्व्यणुकगतत्रित्त्वसंख्या, द्व्यणुकपिरमाणस्य च परमाणुगतद्वित्त्वसंख्याऽसमवायिकारणमित्यर्थः । **कारणगुणा हि कार्यगुणानारभन्त इति** न्यायात् घटादिपरिमाणं कपालादिपरिमाणाज्जन्यते, नचात्रापि पूर्ववदेव घटपरिमाणमपि कपालगतद्वित्वसंख्याया जन्येत इति वाच्यम्, द्वित्वसंङ्ख्याया महत्त्वाजनकत्वात्, अत एव द्व्यणुकद्वयान्न त्रसरेणोरुत्पत्तिः, त्रसरेणुगतमहत्त्वानुपपत्तिप्रसङ्गादत एव त्रिभिर्द्व्यणुकैः त्रसरेणुरुत्पद्यत इति स्वीक्रियते अन्यथा द्व्यणुकेऽपि महत्त्वापत्तेः, एवञ्च निष्कर्षः द्वित्वसंख्यायाः यत्र परिमाणजनकत्वं तत्र परिमाणत्वावच्छिन्नं प्रति जनकत्वम्, त्रित्वसंख्यायाश्च यत्र जनकत्वं तत्र महत्त्वावच्छिन्नं प्रत्येव हेतुत्वमिति । एवं कपालगतमहत्त्वोत्कर्षेण घटगतमहत्त्वोत्कर्षस्याऽऽनुभविकतया कपालमहत्त्वस्य तत्रावश्यं हेतुत्त्वं स्वीकार्यमिति ।

एवं कुत्रचित् तुलकादौ प्रचयादपि परिमाणं जन्यते, तदुक्तम्

**प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते। परिमाणं तूलकादौ** ॥ इति ।[2]

प्रचयो नाम शिथिलाख्यः संयोगः, अर्थात् भूयोवयवावच्छेदेनाऽवयवान्तराऽसंयोगिन्यवयवे वर्तमानः संयोगः प्रचय इति भावः । अवयवेषु वृद्ध्यभावेऽपि तुलकादौ अवयविनि परिमाणस्य वृद्धिदर्शनात् तत्र तुलकादीनां परिमाणं प्रचयाज्जायते इति स्वीक्रियते । परिमाणस्य नाशस्तु सर्वत्राश्रयनाशादेव इति दिक् ।

**************

[1] भाषापरिच्छेदः112

[2] भाषापरिच्छेदः112/113

ISSN: 2320-740X

# “शब्दशक्तिमूलध्वनौ द्वितीयार्थोऽभिधाविषयः भवति उत न?”

**श्री पङ्कजभट्टः**
साहित्यविभागीयशोधच्छात्रः

सर्वजनमनोरञ्जकस्य काव्यस्य कः प्रधानभूतांश इति विचार्यमाणे आनन्दवर्धनाचार्येण ‘काव्यस्यात्मा ध्वनि’रिति मुक्तकण्ठम् उद्घुष्य ध्वनितत्त्वमेव प्राधान्यं भजत इति स्पष्टमुक्तमेव । तादृशस्य ध्वनेः सामान्येन आदौ अविवक्षितवाच्यध्वनि-विवक्षितान्यपरवाच्यध्वनिभेदेन द्विधा विभागः कृतः । पुनश्च तत्र विवक्षितान्यपरवाच्यध्वनेः द्वैविध्यमङ्गीकृतम्। तद् यथा, असंलक्ष्यक्रम- संलक्ष्यक्रमध्वनिः च । अत्र संलक्ष्यक्रमव्यङ्ग्यध्वनिस्थले द्वितीयार्थस्य बोधकया शब्दवृत्त्या भवतीत्यस्मिन् विषये आलङ्कारिकेषु ऐकमत्यं नास्ति । अभिधया एव भवतीति केचन वदन्ति । तथा सर्वथा न भवति, किन्तु व्यञ्जनया एव भवतीति अपरे केचन अभिप्रयन्ति । स विचारोऽत्र मया प्रस्तूयते ।

**संलक्ष्यक्रमध्वनिः**– सम्यक् लक्ष्यन्ते प्रतीतिपथमायाति यत्र द्वयोः व्यङ्ग्यव्यञ्जकयोः (वाच्य-व्यङ्ग्ययोः) पौर्वापर्यक्रमः, सोऽनुस्वानसन्निभध्वन्यपरपर्यायः संलक्ष्यक्रमध्वनिः। यथा घण्टाया अभिघातानन्तरं किञ्चित्कालपर्यन्तम् अनुरणति स ध्वनिः, यथा च प्रधानध्वनेः अनुरणित-ध्वनेश्च व्यत्यासः स्पष्टं प्रतीयते, तथा वाच्ये प्रतीते, किञ्चित्कालानन्तरमेव व्यङ्ग्यं प्रतीयते, तयोश्च वाच्य(व्यञ्जक) – व्यङ्ग्ययोः क्रमः स्पष्टं प्रतीयते। विवक्षितान्यपरवाच्यध्वनेः द्वितीयभेदोऽयम्। शब्दशक्तिमूलत्वार्थशक्तिमूलत्वभेदेन स द्विविधः। आनन्दवर्धनाचार्यो निगदति –

**क्रमेण प्रतिभात्यात्मा योऽस्यानुस्वानसन्निभः।**
**शब्दार्थशक्तिमूलत्वात् सोऽपि द्वेधा व्यवस्थितः ॥** [1]

इति । अभिनवगुप्तपादाचार्यैरपि, ‘द्वितीयोऽपि द्विविधः शब्दशक्तिमूलोऽर्थशक्तिमूलश्च’ [2] इत्युक्तम्।

एवं शब्दशक्तिमूलार्थशक्तिमूलध्वन्योः विषये आलङ्कारिकाणाम् ऐकमत्यं नास्ति । तत्रापि शब्दशक्तिमूलध्वनौ यत्र नानार्थशब्दाः प्रयुज्यन्ते तत्र अर्थद्वयस्य प्रतीतिः कथं भवतीत्यस्मिन् विषये प्राचीन-नवीनालङ्कारिकाणां मध्ये महानेव भिन्नाभिप्रायः वर्तते ।

---

[1] ध्वन्यालोकः-2/20

[2] ध्वन्यालोक-लोचनम्


ISSN: 2320-740X

शब्दनिष्ठा शक्तिः= व्यञ्जना कारणं यस्य स ध्वनिः शब्दशक्तिमूलध्वनिः । अस्य लक्ष्यस्थलं प्राचीनानां मते संलक्ष्यक्रमव्यङ्ग्यध्वनिः, नवीनानां मते योगरूढिस्थलम् । तत्र,

**प्राचीनमतम्-** नानार्थकपदं शब्दशक्तिमूलध्वनेर्लक्ष्यस्थलम् । एकाधिकार्थवाचकत्वं नानार्थत्वम् । तच्च एकाधिकार्थवाचकत्वं नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैक – धर्मवृत्तित्वम् । नानार्थशब्दाश्रित अनेकार्थप्रतिपादनं बहुत्र दृष्टिगोचरो भवति । तत्र वर्तमानयोः द्वयोरर्थयोः – अर्थद्वयस्यापि वाच्यत्वे श्लेषः, वाच्यार्थव्यङ्ग्यार्थयोः उभयोरपि प्रस्तुतत्वे पर्यायोक्तिः, श्लिष्टविशेषणमाहात्म्यात् प्रकृतेऽप्रकृतेव्यवहारस्यारोपे समासोक्तिः, अप्रकृतस्य वाच्यत्वे प्रकृतस्य च व्यङ्गयत्वे अप्रस्तुतप्रशंसा इत्यादिरीत्या व्यवहारः । एतद्विलक्षणतयाऽपि काव्येषु कविभिः नानार्थशब्दप्रयोगः क्रियते, यत्र प्रकृतार्थोऽभिधया अप्रकृतार्थश्च व्यञ्जनया ज्ञायते । अर्थादनेकार्थशब्दस्थले नानार्थकशब्दस्याभिधाशक्तौ प्रकरणादिभिः एकस्मिन्नर्थे नियन्त्रितायाम्, द्वितीयार्थो व्यञ्जनया अभिव्यज्यते । तदेवास्य ध्वनेः लक्ष्यमिति प्राचीनालङ्कारिकाणां मम्मटादीनां मतम् । तादृशस्थलेषु प्राकरणिकार्थः वाच्यो न भवति किन्तु शब्दनिष्ठव्यञ्जनाशक्तया व्यङ्ग्य एव । स एव शब्दशक्तिमूलध्वनिरित्युच्यते ।

अस्य मतस्य मूलाधारः क इत्यमु विषयं मतभेदेन सह जगन्नाथाचार्यः एवं निरूपयति । तत्र

**प्रथममते-**

१. नानार्थशब्दश्रवणम्
२. तस्य शब्दस्य सर्वेषामर्थानां बुद्धौ उपस्थितिः
३. तात्पर्यसन्देहः
४. प्रकरणादीनां पर्यालोचनम्
५. एकस्मिन्नर्थे तात्पर्यनिर्णयः
६. पुनः पदार्थोपस्थितिः
७. प्राकरणिकार्थस्य शाब्दबोधः
८. द्वितीयार्थस्य (अप्राकरणिकार्थस्य) व्यञ्जनया बोधः इति प्राचीनानां मतम् [1]।

अत्र प्राकरणिकार्थ एव अभिधया ज्ञायते अप्राकरणिकार्थस्तु व्यञ्जनयैव इति तेषां मतम् । किन्तु अत्र काचित् संशीतिर्भवति यत् द्वितीयायाः पदार्थोपस्थितेः प्रथमपदार्थोपस्थिताविव नानार्थगोचरता कुतो न भवतीति । तदा

[1] रसगङ्गाधरे-द्वितीयानने संलक्ष्यक्रमव्यङ्ग्यनिरूपणावसरे ।

ISSN: 2320-740X

प्रकरणादिज्ञानस्य तदधीनतात्पर्यनिर्णयस्य वा पदार्थोपस्थितौ प्रतिबन्धकं वाच्यं भवति। नो चेत् शाब्दबुद्धेरपि नानार्थविषयतापत्तिः भवति।

**द्वितीयमते-**

१. नानार्थशब्दश्रवणम्

२. तस्य शब्दस्य सर्वेषामर्थानां बुद्धौ उपस्थितिः

३. तात्पर्यसन्देहः

४. प्रकरणादीनां पर्यालोचनम्

५. प्राकरणिकार्थनिर्णयः

६. तस्यार्थस्य(प्राकरणिकार्थस्य) शाब्दबोधः

७. व्यञ्जनया द्वितीयार्थबोधः

एवं नानार्थपदप्रयोगस्थले द्वितीयार्थः अभिधया न बोध्यते किन्तु व्यञ्जनया एवेति ते अभिप्रयन्ति [1]। द्वितीयार्थस्य अभिधा अजन्यत्वे प्राचीनैरुपस्थापितानि कारणानि,

1. 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव' इति नियमानुसारम् एकमर्थं बोधयित्वा विरतायामभिधायाम्, अपरार्थबोधनसामर्थ्यं तस्या न भवति। सुरभिमांसं भक्षयतीत्यस्मिन् स्थले सुगन्धिमांसं भक्षयतीत्यर्थबोधानन्तरमभिधाया विरतिः। तेन गोमांसं भक्षयतीत्यर्थं बोधयितुम् असमर्था सा।
2. अप्राकरणिकार्थाः द्वितीयोपस्थितिकाले उपस्थिता एव न भवन्ति इत्यस्मात् कारणात् तेषां बोध अभिधया न जायते। अर्थात् द्वितीयोपस्थितिकाले गोमांसं भक्षयति इत्यर्थोऽनुपस्थितोऽर्थः। तेन अभिधया न बोधः।

इत्यादीनि। द्वितीयार्थबोधे व्यञ्जना यदि न स्वीक्रियते तर्हि अश्लीलार्थव्यञ्जनस्थले दोषः कथमुक्तः इत्यादिप्रश्नाः उत्तिष्ठन्ति। यतः अश्लीलदोषः तत्रैव स्वीक्रियते यत्र अश्लीलार्थः व्यज्यते, न तु शब्देनोच्यते। निःश्शेषच्युतचन्दनमित्यादिषु 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' इत्येतद्वाच्यमतिक्रम्य 'तदन्तिकमेव रन्तुं गतासी'त्याद्यर्थाः कथं ज्ञायन्ते व्यञ्जनां विना ? इत्यपि भवति प्रश्नः। अत एव व्यञ्जनावृत्तिः द्वितीयार्थबोधस्थले अवश्यमङ्गीकरणीयेति प्राचीनाः। किन्तु नवीनालङ्कारिकाः जगन्नाथादयः प्राचीनानामेतन्मतमनङ्गीकुर्वन्तः अत्रानेकान् दोषांश्च पश्यन्तः द्वितीयार्थबोधोऽपि अभिधयैव भवतीति प्रतिपादयन्ति

[1] रसगङ्गाधरे-द्वितीयानने संलक्ष्यक्रमव्यङ्ग्यनिरूपणावसरे।


ISSN: 2320-740X

१. यदि अश्लीलार्थव्यञ्जने व्यभिचारं निवारयितुं, श्रोतुः बुद्धिशक्तिविशेषो व्यक्तेरुल्लासे हेतुः, स च आनन्दरूपफलबलात् चमत्कारिण्येवार्थे व्यक्तिमुल्लासयति न त्वचमत्कारिण्यर्थे, इत्यङ्गीकृत्य व्यञ्जनाया क्वाचित्कत्वं यदि साधयामस्तर्हि व्यभिचारो निवर्तेत, किन्तु क्वाचित्कत्वस्याङ्गीकारे तन्न कारणं भवति। यतो हि तेन व्यञ्जनाङ्गीकारस्यावश्यकतैव निवर्तते एवम् – सा बुद्धिशक्तिः व्यञ्जनामुल्लासयतीति किमर्थं वक्तव्यम् ? नियन्त्रिताम् अभिधामुल्लासयतीत्येव वक्तव्यम् । तथा उल्लसितयाऽभिधाशक्त्यैव द्वितीयार्थबोधो जायते । व्यञ्जनोल्लाससमर्थायाः श्रोतृबुद्धिशक्तेः, नियन्त्रितायाऽभिधाया उल्लासेऽपि सामर्थ्यं वर्तत एव खलु ? येन व्यञ्जनारुपातिरिक्तवृत्तेरङ्गीकारात् जायमानं गौरवं न स्यात् ।

२. नानार्थव्यञ्जकस्थलेऽग्रहीतद्वितीयार्थशक्तिकस्य ग्रहीतविस्मृतद्वितीयार्थशक्तिकस्य च सर्वप्रकारेणैव अप्राकरणिकार्थबोधानुदयान्नानार्थस्थलेव्यञ्जनया अप्राकरणिकार्थबोधवादिनां मते व्यञ्जनया तदर्थवोधः दुर्वार एव । 'सुरभिमांसं भक्षयति' इत्यत्र 'सुरभि' पदस्य गव्यपि शक्तिः वर्तत इति यस्य ज्ञानं नास्ति (अगृहीतशक्तिकः) अथवा पूर्वं जानन्नपीदानीं विस्मृतम्, तस्य कृते गवार्थे कथञ्चिदपि, अर्थात् न केवलमभिधया किन्तु व्यञ्जनयापि बोधो न जायते । द्वितीयार्थबोधे व्यञ्जनाङ्गीकतृणां मते तादृशानामपि व्यङ्ग्यार्थबोधोऽनिवार्यतया भवेत् । तत्तु न सम्भवति एव । परन्तु ये अप्राकरणिकार्थबोधेऽपि अभिधामेव अङ्गीकुर्वन्ति तेषां मते स दोषः नास्तीति तन्मतमेव अङ्गीकर्तुं समुचितम् ।

३. येन शब्देन योऽर्थो व्यज्यते तस्य शब्दस्य तदर्थगतशक्तिज्ञानं तदर्थव्यक्तेरुल्लासे हेतुरिति कार्यकारणभावस्वीकारे अगृहीतशक्तेः गृहीतविस्मृतशक्तेर्वा पुरुषस्य न व्यञ्जनोल्लास इत्युच्यते चेत्, सुरभिमांसमित्यादि स्थले लक्षणस्य समन्वयः भवति । येन सुरभिशब्देन योऽर्थोऽर्थात् गवार्थो व्यज्यते । तस्य सुरभिशब्दस्य गवार्थगतशक्तिज्ञानं गवार्थव्यञ्जनाया उल्लासे हेतुरितिरीत्या । किन्तु निःशेषच्युतचन्दनमित्यादौ व्यज्यमाने रमणार्थे तल्लक्षणं न समन्वेति, रमणार्थे अधमशब्दस्य शक्तिज्ञानं कस्यापि नास्तीति हेतोः । यद्यपि अधमपदस्य रमणार्थे शक्तिः वर्तते । तर्हि तस्यापि अर्थस्याभिधयैव बोधसम्भवात् पुनर्व्यञ्जनाया नैरर्थक्यापत्तिः ।

४. यदि नानार्थव्यञ्जनस्थल एवंजातीयकः कार्यकारणभावः कल्प्यते, तत्र शक्तेर्नियन्त्रितत्वेन अकिञ्चत्करत्वात् तस्याः व्यक्तिकल्पनं युज्यत एव इत्युच्यते तर्हि नवीनकार्यकारणभावकल्पनमूलकगौरवप्रसङ्गः । अपि च नियन्त्रणस्य पूर्वमेव दूषितत्वेन 'तद्धेतोरेव तदस्तु किं तत्कल्पनये'ति न्यायात् व्यक्त्युल्लासहेतोस्तदर्थगतशक्तिज्ञानस्यैव तदर्थबोधजनकत्वम्, किं व्यक्त्युल्लासस्य जनकत्वकल्पनेन? इति वक्तुं शक्यत्वात् न व्यञ्जनाया आवश्यकता ।

ISSN: 2320-740X

५. अप्राकरणिकोऽपि अर्थोऽभिधाजन्य इति यदि उच्यते भवतु नाम, परन्तु सर्वत्र न । कुत्र इति चेत् यत्र द्वितीयार्थः न बाधितः तत्रैव । 'जैमनीयमलं धत्तेरसनायामयं द्विजः' इत्यत्र जैमनीयं विष्ठाम् अयं द्विजः रसनायां धत्ते इति द्वितीयार्थः जुगुप्सितार्थः बाधितः, ब्राह्मणस्य तादृशाचरणाभावात् । तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयज्ञानं प्रतिबन्धकमिति न्यायात्, विप्राः तादृशचरणं न कुर्वन्तीत्याकारकोऽभावनिश्चयः विष्ठां जिह्वायां धारयतीत्येतस्य प्रतिबन्धकः । व्यक्तेस्तु बाधितार्थबोधकत्वं धर्मिग्राहकमानसिद्धमिति व्यक्तिवादिनां दोष इति यदपि उच्यते तदप्यसमीचीनम् । गामवतीर्णा इत्यादिषु वाच्यार्थ एव बाधितः । तत्र वाच्यार्थस्य अन्वयार्थं यो यत्नोऽनुस्रियते तेनैव यत्नेन नानार्थस्थलेऽपि बाधितार्थबोधस्योपपत्तिः स्यात् । तथा यदि नाङ्गीक्रियते तर्हि चमत्कारोत्पादनार्थं काव्येषु प्रयुज्यमानेषु सर्वेष्वप्यलङ्कारेषु वाच्यार्थस्य प्रायः बाधितत्वात् तत्र सर्वत्रापि व्यञ्जनाऽङ्गीकरणीया भवेत् ।

एतैः कारणैः द्वितीयार्थबोधार्थमभिधा एव आश्रयणीया, न पुनर्व्यर्थव्यञ्जना इति मतमुपस्थापितं जगन्नाथेन। तस्य मते योगरूढिस्थले योगार्थबोध एव व्यञ्जना स्वीक्रियते, न तु नानार्थपदप्रयोगस्थले । किन्तु साहित्यशास्त्रस्य काव्यादीनाञ्च अवलोकनं यदा कुर्मः तत्र केवलं योगरूढिस्थलं व्यञ्जनाया विषयः न भवतीति दृग्गोचरं भवति । नानार्थस्थले व्यञ्जनाया अनङ्गीकारे प्रकृताप्रकृतयोः पार्थक्यमेव न शक्यते । उदाहरणार्थं –

**"भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।**
**यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥ [1]"**

इत्यस्मिन् पद्ये राजपरकार्थः प्रकृतः, गजपरकार्थः अप्रकृत इति पार्थक्यं कथं शक्यते ? अत्र अर्थद्वयस्यापि अभिधया बोध इत्येतदनुचितमित्येव भाति । तेन प्राचीनानां मतमेव साधु इति निर्णयः समीचीनः ।

**********

# व्यापारमुख्यविशेष्यकशाब्दबोधविचारः

**कु. योगिता छत्रे**
व्याकरणविभागीय शोधच्छात्रा,

वैयाकरणसिद्धान्तरीत्या वाक्यस्फोटस्यैव मुख्यत्वात्, वाक्यस्य च सुप्तिङन्तचयत्वात्, सुबन्तानां च प्रायशः क्रियाविशेषणत्वात्, धातोः क्रियावाचित्वेन पुरस्स्फूर्तिकत्वात् धात्वर्थः प्राधान्यमावहतितराम् । किञ्च

[1] काव्यप्रकाशे-द्वितीयोल्लासे अभिधामूलध्वनिनिरूपणावसरे ।


ISSN: 2320-740X

सर्वेषां शब्दानां धातुमूलकत्वं “सर्वं नाम धातुजमाह शकटस्य तोकम्” इत्यादिना भाष्यकृता प्रपञ्चितम् । यत्रोभे भावप्रधाने भवतः इति निरुक्तेन वाक्ये धात्वर्थप्राधान्यमेव प्रतिपादितम् । प्रधानभूते तस्मिन् धात्वर्थे विशेषणतया अन्वययोग्यस्य तिङर्थस्यापि निरूपणं धात्वर्थनिरूपणोपकारकमित्यतः धात्वर्थनिरूपणेन सहैव आख्यातार्थोपि न्यरूपि वैयाकरणवृद्धैः । तत्रापि विभिन्नानां दार्शनिकानां को नाम धात्वर्थः कश्च आख्यातार्थः इति विषयेऽस्मिन् विभिन्ना मतिः वर्तते । अत्र केचन फलमेव धात्वर्थः इति, केचन फलव्यापारौ धात्वर्थौ इति, केचन च फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च शक्तिरिति आमनन्ति । आख्यातपदं तावत् तिङः, तिङन्तस्य वा पर्यायवाचित्वेन अङ्गीक्रियते विद्वद्भिः यस्यार्थः कर्तृकर्मणी, कृतिः, भावना वेति विभिन्नानि मतानि प्रसिद्धानि ।

पदसमूहात्मके वाक्ये नामाख्यातार्थोपसर्गनिपातभेदेन चतुर्धा पदानि यास्काचार्येण विभक्तानि । नामाख्यातान्तर्गताः ये प्रकृतिप्रत्ययाः तेषाम् अर्थाः परस्परमन्वयप्रकाराश्च ज्ञातव्या भवन्ति । शब्दजन्यः बोधः शाब्दबोधः इत्युच्यते, यमधिकृत्य शाब्दबोधनिरूपणपरेषु वाक्यपदीय- भूषणसार- मञ्जूषा- व्युत्पत्तिवाद- न्यायकौस्तुभ- मीमांसाकौस्तुभादिग्रन्थेषु विमर्शः कृतः वर्तते । शाब्दबोधविषये त्रयः पक्षाः मुख्यतया संभवन्ति इति सर्वेषां सुविदितमेव । तेषु एकः पक्षः वैयाकरणानाम् अपरः नैयायिकानाम् अन्तिमश्च मीमांसकानामिति । वैयाकरणाः तावत् धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधवादिनः । फलव्यापारौ धात्वर्थः इति कथयन्ती प्राचीना कारिका-

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**
**फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ॥**[1]

धातुः फलव्यापारयोः वाचकः । कर्तृकर्मसङ्ख्याकालाः तिङर्थः । कर्तृप्रत्ययसमभिव्याहारे आख्यातकर्तुः धात्वर्थव्यापारे विशेषणतया अन्वयः । एवं कर्मप्रत्ययसमभिव्याहारे आख्यातार्थकर्मणः धात्वर्थफले विशेषणतया अन्वयः । तिङर्थसंख्यायाः समानप्रत्ययोपात्तकर्तृकर्मणोरन्वयः । अत्र च आख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति आख्यातार्थकर्तृकर्मजन्योपस्थितिः हेतुः इति कार्यकारणभावः संपन्नः । आख्यातार्थकालस्य प्रधानीभूते धात्वर्थव्यापारे अन्वयः । एवञ्च तिङर्थः सर्वात्मना विशेषणमेव । धात्वर्थव्यापार एव प्रधानम् । ‘व्यापारो भावना सैवोत्पादना सैव च क्रिया’ इत्येवम् उत्पाद्यत्वेन साध्यत्वेन वाऽभिधीयमाना क्रिया व्यापारपदेन उच्यते । चैत्रस्तण्डुलं पचति इत्यत्र शाब्दबोधः एकत्वसंख्याविशिष्टचैत्राभिन्नैककर्तृकः तण्डुलाश्रयविक्लित्त्यनुकूलो वर्तमानकालिको व्यापारः ।

1 वैयाकरणभूषणसारः

नैयायिकाः आख्यातार्थकृतिप्रकारकप्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनः। तादृशशाब्दबोधस्वीकारे किं विनिगमकमिति चेदुच्यते पदवाक्यरत्नाकरे-

**प्रयाति पुरुषस्तस्य पादयोरभिवादय ।**
**इत्यादौ प्रथमान्तार्थः प्राधान्यान्मृश्यते तदा ॥[1] इति ।**

मीमांसकाश्च आख्यातार्थभावनाविशेष्यकशाब्दबोधवादिनः इति वस्तुस्थितिः । अत्र वैयाकरणमीमांसकयोः भावना कस्यार्थः इति विषये वैमत्ये सत्यपि भावनाविशेष्यकशाब्दबोधः एव जायते इत्यत्र नास्ति विप्रतिपत्तिः । तस्मात्, वाक्यात् किंविशेष्यकः शाब्दबोधः जायते इति विषये प्रधाना विप्रतिपत्तिः वैयाकरणनैयायिकयोरेवेति शिष्यते।

धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधानङ्गीकारे प्रधानतया प्रसज्यमानाः अनुपपत्तयः चतस्रः भवन्ति । ताश्च-

1. यास्कनिरुक्तविरोधः ।
2. भूवादिसूत्रभाष्यविरोधः ।
3. कार्यकारणभावे गौरवम् ।
4. 'पश्य मृगो धावतीति' प्रयोगानुपपत्तिः ।

चत्वारि पदजातानि - नामाख्यातोपसर्गनिपाताः इत्युपक्रम्य भावप्रधानमाख्यातम् इति आख्यातलक्षणम् सत्त्वप्रधानानि नामानि इति नामलक्षणं च निरूपितं निरुक्तकारेण । निरुक्तवाक्ये अस्मिन्, प्रकृतिः प्रत्ययो विभक्तिरित्येतावन्नाम । सत्ता, द्रव्यं, लिङ्गं संख्येति नामार्थः इति तद्भाष्यात् सुबन्तं नामपदेन बोध्यते, आख्यातशब्देन तिङन्तं गृह्यते, 'आख्यातमाख्यातेन क्रियासातत्ये' इति वार्तिके तिङन्ते आख्यातशब्दप्रयोगात् 'ते विभक्त्यन्ताः पदम्' इति न्यायसूत्रविवरणे तिबाद्यन्तमाख्यातम् इति उक्तत्वाच्च । भावप्रधानमाख्यातमित्यत्र भावशब्देन धात्वर्थः अभिधीयते । तथा च तिङन्तं धात्वर्थव्यापारप्रधानकमिति तस्मात् निरुक्तवाक्यात् लभ्यते । तिङन्ते भासमानानां पदार्थानां मध्ये भावः प्रधानम् इति उक्तं भवति ।

भूवादिसूत्रे भाष्ये भाववचनो धातुरिति न्यासे महर्षिणा 'पचति भवति' इति विलक्षणः प्रयोगः प्रादर्शि । तत्र कथं भाववचनाः पचादयः इति प्रश्नं विधाय यदेतेषां भवतिना सामानाधिकरण्यं पचति भवति पक्ष्यति भवति अपाक्षीत् भवति इत्युक्तम् । तदग्रे किंसम्बन्धमूलकोयं पचति भवति इति प्रयोगः इत्याशङ्क्य (का तर्हीयं वाचोयुक्तिः पचति भवतीति) समाहितं- 'एषैषा वाचोयुक्तिः । पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति' ।

1 पदवाक्यरत्नाकरः(मू.) पृ.411


ISSN: 2320-740X

इदं च कथनं धात्वर्थव्यापारस्य प्राधान्यस्वीकारादेव संगच्छते । अन्यथा नैयायिकोक्तरीत्या प्रथमान्तार्थस्य प्राधान्ये, पचतीति वाक्ये चैत्रादेः प्राधान्यात्, तस्यैव उत्तरत्र भवतिक्रियायां कर्तृत्वेन अन्वयस्यापि वक्तव्यत्वात् पचिक्रिया भवतिक्रियायाः कर्त्री भवतीति भाष्यकृदुक्तमसङ्गतं स्यात् इति महाभाष्यविरोधरूपा द्वितीयैषा अनुपपत्तिः। पचति इत्यत्र तिङन्ते व्यापारप्राधान्याभावे तिङर्थविशेषणत्वे स्वोत्तरतिङर्थे विशेषणतया अन्वितस्य धात्वर्थस्य अन्यत्र विशेषणत्वासंभवेन पचति भवति इति भाष्यप्रयोगो न संगच्छेत । किञ्च ह्रस्वो नपुंसके प्रातिपदिकस्य इति सूत्रस्थं रमते ब्राह्मणकुलम् इति क्रियाप्रधानम् इति वचनमपि अत्र प्रमाणम् ।

नैयायिकोक्तरीत्या प्रथमान्तार्थस्य वाक्याज्जायमाने शाब्दबोधे यदि प्राधान्यं स्वीक्रियेत तर्हि, तिङ्प्रत्ययार्थः कृतिरिति स्वीकृत्य तस्याः प्रथमान्तोपात्ते कर्तरि विशेषणतया अन्वयः अभ्युपेयः । एवमेव, तिङ्प्रत्ययार्थस्य संख्यायाः अन्वयः प्रथमान्तोपात्ते कर्तरि वक्तव्यः । तथा च, तदनुरोधेन - 'आख्यातार्थसंख्याप्रकारकशाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति' कश्चन कार्यकारणभावः वक्तव्यः भवति । तथा च संख्यान्वयबोधार्थं भिन्नपदजन्योपस्थितिरपेक्षिता इति गौरवम् । व्याकरणमते तावत् धात्वर्थव्यापारविशेष्यकबोधस्यैव स्वीकारात् आख्यातार्थः न कृतिः अपि तु कर्ता इति स्वीकृत्य तत्र प्रथमान्तार्थस्य अभेदेनान्वयो वक्तव्यः । तथा च संख्यापि तावत् आख्यातेनैव उच्यते इत्यतः कर्तृसामान्यरूपार्थे अन्वेति इति 'आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातार्थकर्तृकर्मोपस्थितिः कारणमिति' कार्यकारणभावः कल्पनीयः । अत्र च कार्यकारणभावे न भिन्नपदजन्योपस्थितिः अपेक्षिता इति लाघवमस्ति ।

यदि "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तत्र प्रत्ययार्थस्य प्राधान्यम्" इति प्रत्ययार्थप्राधान्यबोधकन्यायः सार्वत्रिकः स्यात् तर्हि आख्यातार्थस्य कर्तुः प्राधान्यात् तस्य च देवदत्तादिभिः सह अभेदान्वयेन चैत्रः पचति इत्यादिवाक्ये विक्लित्त्यनुकूलवर्तमानकालिकव्यापाराश्रयाभिन्नः चैत्रः इति बोधापत्त्या प्रथमान्तपदार्थस्य प्राधान्यं स्यात् । नैयायिकाः तु आख्यातार्थः कृतिरिति उक्त्वा प्रथमान्तार्थस्य मुख्यत्वमभ्युपगच्छन्ति । आख्यातार्थः कर्ता इति स्वीकारेपि तद्विशेष्यकः प्रकृत्यर्थव्यापारप्रकारकः बोधः न स्वीकार्यः । प्रत्ययार्थप्रकारकप्रकृत्यर्थविशेष्यक एव बोधः स्वीकार्यः । अन्यथा पश्य मृगो धावतीति प्रयोगानुपपत्तिः इति चतुर्थं दूषणम् । एतादृशप्रयोगाणां सत्त्वे क्रियाऽपि कृत्रिमं कर्म इति भाष्यवचनं गमकम् । तथा हि मृगकर्तृकं धावनम् अतीव सुन्दरमस्तीति तद्धावनं पश्येति धावनकर्मकदर्शनाभिप्रायेण अयं प्रयोगः- पश्य मृगो धावतीति । प्रकृत्यर्थविशेष्यकबोधे एकत्वसंख्याविशिष्टमृगाभिन्नाश्रयकं वर्तमानकालिकं यद्धावनं तत्कर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनम् इति एकवाक्यता लभ्यते । प्रत्ययार्थविशेष्यकबोधे तु धावनक्रियाश्रयाभिन्नो मृगः, दर्शनानुकूलक्रियाश्रयाभिन्नस्त्वम् इति बोधापत्त्या एकमुख्यविशेष्यकबोधजनकत्वरूपम् एकवाक्यत्वं न स्यात् । यदि

धात्वर्थव्यापारविशेष्यकशाब्दबोधः न स्यात् तर्हि नैयायिकोक्तरीत्या अत्र प्रथमान्तार्थस्य प्राधान्यं स्वीकरणीयम् । तथा सति धावनानुकूलकृतिमान् मृगः इति शाब्दबोधः वाक्यात् जायते । तथा च तद्वाक्यार्थे प्रधानस्य मृगस्यैव दृशिक्रियायां कर्मत्वेन अन्वयस्य वक्तव्यत्वात् 'कर्मणि द्वितीयेति' अनुशासनमहिम्ना मृगशब्दोत्तरं द्वितीयायाः प्रसक्तिः । न च इष्टापत्तिः,पश्य मृगो धावति इत्यादि स्वारसिकप्रयोगाणामेव विलयापत्तिः । यद्यपि धावति इत्यत्र तिङा धात्वर्थधावनव्यापाराश्रयकर्तुः उक्तत्वेन मृगशब्दात् प्रथमा प्राप्ता सा च अन्तरङ्गा तथापि प्रधानक्रियानुरोधेन कर्मत्वे द्वितीयैव स्यात् । एवं च धावति मृगं पश्य इति प्रयोगापत्तिः।

मृगशब्दोत्तरं द्वितीयायाः स्वीकारे द्वितीयान्तार्थेन सामानाधिकरण्यात् धावतीत्यस्य ' लटः शतृशानचेत्यादिना' शतृप्रसङ्गे 'धावन्तं मृगं पश्येति' प्रयोगः स्यात् । न तु पश्य मृगो धावतीति । अभीष्टप्रयोगसिद्धये मध्ये तमिति अध्याह्रियते चेदपि धावनानुकूलकृतिविशिष्टमृगकर्मकस्यैव दर्शनं बोधितं स्यात् न तु अभीष्टस्य मृगकर्तृकधावनस्य दर्शनम् । ननु यत्तत्शब्दयोः अध्याहारेण द्वितीयापत्तिः नास्ति । तथा च यो धावति मृगः तं पश्य इति पश्य मृगो धावति इत्यत्र दोषाभावः इति चेत् उच्यते - अध्याहारो न युक्तः । एकवाक्यतया अन्वये संभवति अध्याहारेण वाक्यभेदे गौरवम् । किञ्च एतादृशस्थले अध्याहारेण भूवादिसूत्रभाष्यस्य एवं शतृसूत्रभाष्यस्य च विरोधो भवति । किञ्च ऋषीणामेकवाक्यतया बोधे साधुत्वस्य इच्छासत्त्वे तत्र अस्मदादीनामनिच्छायाः अकिञ्चित्करत्वात्, उत्कटधावनस्य कर्मत्वप्रतिपिपादयिषुः वक्तुः तात्पर्यस्य असिद्धत्वाच्च प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्वीकाररूपं नैयायिकमतम् अयुक्तम् ।

धात्वर्थमुख्यविशेष्यकबोधवादिनां वैयाकरणानां मते तु पश्य मृगो धावति इत्यत्र धात्वर्थधावनस्य दर्शनक्रियायां कर्मत्वेन अन्वयः । तस्य च कृत्तद्धितसमासाश्चेत्याद्युक्तप्रातिपदिकत्वाभावात् द्वितीयापत्तिः नास्ति । मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति शाब्दबोधः प्रतिपद्यते ।तस्मात् प्रदर्शितानामनुपपत्तीनां सत्त्वात् धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधः एव स्वीकर्तव्यः इति वैयाकरणानां सरणिः ।

वस्तुतस्तु तादृशः व्यापारमुख्यविशेष्यकः शाब्दबोधः अस्मासु नोत्पद्यते इति अनुभवः । रामः ग्रामं गच्छति इत्युक्ते रामस्य गमनं प्रधानतया न भासते, अपि तु रामाभिन्नः कर्ता एव मुख्यतया भासते । संस्कृतेतरभाषास्वपि इयमेव स्थितिरस्तीत्यतः तादृशबोधोपपत्तेः कारणानि अन्वेषणीयानि स्युः । संस्कृतमातृभाषिणां बालानां संस्कृतवाक्यात् शाब्दबोधः कथं भवतीति अनुसंधानस्य विषयः भवेत् इति शम् ।

**सन्दर्भाः-**

वैयाकरणपरमलघुमञ्जूषा



ISSN: 2320-740X

वैयाकरणभूषणसारः
महाभाष्यम्
शाब्दबोधमीमांसा
भूषणसारतत्त्वप्रकाशिका

**********

# अपभ्रंशेषु शक्तिविचारः

**श्री प्रमोदः जि. के.**
व्याकरणविभागीयशोधच्छात्रः

**चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥**

सर्वस्यास्य चराचरजगतः नियामकः स्वयं भगवान् शब्दब्रह्मरूपः वेदः। शब्दब्रह्मणः सर्वत्र व्यापकत्वं तद्विभुत्वात् सिद्धं भवति । तस्यैव अंशः सर्वेषु प्राणिषु परावाग्ब्रह्मरूपेण वर्तते । इयमेव सञ्चेतना शब्दाकृतिं गृहीत्वा सर्वेषु वाग्वत्सु तद्रहितेषु वा अखिलं व्यवहारं सम्पादयति । शब्दः वर्णरूपः । सः कस्यचिदर्थस्य अभिधायकः भवत्येव । वर्णरूपः शब्दस्तावत् तत्तदर्थे रूढः साक्षादेव अर्थस्य भानं कारयति । अव्यक्तध्वनिरूपः शब्दः प्रसङ्गानुरोधेन स्वस्मिन् सन्निहितम् अर्थं परिचाययति । संस्कृतनये तावत् एषा अवधारणा वर्तते यत् यः शब्दः शास्त्रान्वितो भवति स शब्दः साधुः भवति यश्च शास्त्रान्वितो न भवति स शब्दः अपभ्रंशः असाधुर्वा भवति इति । शब्दत्वं तु उभयस्यापि निर्विवादं समेषां विपश्चिताम् । **(एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति)** । शब्दः साधुर्वा अपभ्रंशो वा स्यात् इति उभयविधे अपि शब्दे अर्थबोधकशक्तेः समावेशः भवत्येव इति वैयकरणां समयः केचन हि दार्शनिका अत्र सिद्धान्ते विप्रतिपद्यन्ते । तेषां विप्रतिपत्तिविमर्शपूर्वकम् अपभ्रंशेषु अपि अर्थशक्तिबोधकत्वस्य निरूपणं यथाप्रामाण्यं प्रबन्धे अत्र क्रियते । तत्रादौ साध्वसाधुषु अर्थशक्तेः सञ्ज्ञानात् प्राक् साधोः असाधोश्च परिचयदृशा मनाक् उच्यते –

**साधुशब्दपरिचयः**

शिष्टानां जनानां सकाशात् आगमविद्यां समाश्रित्य सिद्धाः ये शब्दाः सन्ति ते साधवः भवन्ति । धर्मं कर्तुम् एते एव साधनत्वेन उपयुज्यन्ते । परन्तु असाधुशब्दाः तावत् वैपरीत्यं भजन्ते अधर्मस्य उत्पादका भवन्ति ।

तदुक्तम् –

**शिष्टेभ्यः आगमात् सिद्धाः साधवो धर्मसाधनम् ।**

**अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः[1] ॥**

किञ्च च परिनिष्ठितत्वम् अपि साधुत्वस्य लक्षणं भवति । परिनिष्ठितत्वञ्च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वम् इत्येवं सङ्कीर्त्यते वैयाकरणैः । यथा दध्योदनम् इत्यत्र सर्वं विधानं यथाशास्त्रं जातम् इत्यतः शब्दोऽयं परिनिष्ठितत्वात् साधुत्वं भजते । परन्तु परिनिष्ठितः शब्दः प्रसङ्गानुगुणं यस्मिन् अर्थे प्रयुक्तः भवति तस्मिन्नेव अर्थे साधुत्वं भजते । यदि अर्थान्तरे स प्रयुक्तः भवति तर्हि तस्य साधुत्वं न भवति । अतस्तदुक्तम् –

**अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।**

**निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम्[2] ॥ इति ।**

अर्थात् अस्वशब्दः अश्वार्थे असाधुः, अपेक्षिते अर्थान्तरे साधुः भवति । तथैव गोणीशब्दः गवार्थे असाधुः, अपभ्रंशो वा अपेक्षिते अर्थान्तरे साधुः भवति । एवमेव सर्वेषु परिनिष्ठितेषु शब्देषु अपि अवगन्तव्यम् । एवञ्च परिनिष्ठितः सन् यः शब्दः प्रयोगद्वारा पुण्यजनकः भवति स साधु इति वैयाकरणानाम् अभिप्रायः । यदि परिनिष्ठितत्वे सत्यपि शब्दे पुण्यसाधकत्वं नास्ति तर्हि स शब्दः साधुशब्दकोटौ नान्तर्भवति ।

**असाधुशब्दपरिचयः**

वस्तुतः साधुशब्दविषये ये अंशाः उक्ताः तद्वैपरीत्यं येषु सञ्जायते ते असाधुशब्दाः । कस्मिँश्चिद् अर्थविशेषे प्रयुज्यमानः शब्दः यदि भिन्नार्थे प्रयुज्येत तर्हि स शब्दः अपभ्रंशत्वम् एव प्राप्नोति । तदुक्तम् –

**शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।**

**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम्[3] ॥**

एते अपभ्रंशशब्दाः संस्कृतभाषया अपि भवितुम् अर्हन्ति संस्कृतेतरभाषया चापि भवितुम् अर्हन्ति। वस्तुतः अपभ्रंशेषु शब्देषु संस्कृतस्य एव कश्च विकृतः अंशः लक्ष्यते । संस्कृतस्य उच्चारणादिषु बहूनाम्

---

[1] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 58, बलाहरः, श्लो.सं.27, राष्ट्रियसंस्कृतसंस्थानम्।

[2] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 108, श्लो.सं.147, बलाहरः, राष्ट्रियसंस्कृतसंस्थानम्।

[3] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 108, श्लो.सं.148, बलाहरः, राष्ट्रियसंस्कृतसंस्थानम्।


ISSN: 2320-740X

असामर्थ्यात् अपभ्रंशैः स्वरूपं गृहीतम् । केचन च अपभ्रंशाः मानवानां वाचि अशक्त्यादिधारणस्य कारणात् उत्पना इत्यपि कारणम् आमनन्ति विज्ञाः । तद्यथा –

**दैवी वाग् व्यवकीर्णेयम् अशक्तैरभिधातृभिः ।**
**अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः**[1] ॥ इति ।

ननु साधुशब्दाः यथा अर्थस्य अभिधायकाः तथा असाधुशब्दा अपभ्रंशा वा अपि अर्थस्य अभिधायका भवन्ति वा इति जिज्ञासा जायते । यद्यपि वैयाकणानां मते अपभ्रंशेषु अपि अर्थबोधनरूपिणी शक्तिः भवत्येव तथापि तत्र युक्तेः प्रामाण्यस्य अपेक्षा भवति इत्यतः विभिन्नानाम् आप्तानां वैयाकरणानां प्रामाण्येन अपभ्रंशेषु शक्तिनिरूपणं कथ्यते –

**भाष्यकारस्य** अपभ्रंशेषु शक्तिमत्वस्य सङ्केतः

तत्र पस्पशायां **समानायाम् अर्थगतौ शब्देन चापशब्देन धर्मनियमः क्रियते**[2] इत्याह भाष्यकारः । तन्नाम यत्र समानरूपेण अर्थस्य ज्ञानं भवति तत्र शब्देन अपशब्देन च धर्मस्य नियमः क्रियते इति दृश्यते लोके । यद्यपि अस्य वचनस्य अग्रिमायाम् एव पङ्क्तौ निरासत्वेन **शब्देन एव अर्थः अभिधेयः न अपशब्देन इति** इत्यपि उक्तम् परन्तु एतावद्भिः वचनैः इदं तु स्पष्टं भवति यत् अपशब्दैः अपि अर्थस्य अवगतिः जायते । अर्थावगमनं यदि तेभ्यः भवति तर्हि अर्थबोधनपरा शक्तिरापि तेषु अङ्गीकार्या एव ।

**भर्तृहरेः दृष्टिः –**

महाभाष्यव्याख्याता भर्तृहरिः यथा साधूनां शब्दानां वाचकत्वं वदति तथैव असाधूनाम् अपि प्रतिपादयति । तद्यथा यदा वयं कञ्चन लघुबालं अम्ब इति उच्चारणं पाठयामः तदा सः बम्बा म्बा वा इति अस्फुटम् उच्चारणम् आरम्भे करोति । अस्य अस्फुटस्य उच्चारणस्य श्रवणात् परं श्रोता स्फुटस्य भानं करोति यत् एष बालः अम्बा इति वक्तुम् इच्छति इति । अतः बालमुखात् निःसृतः अम्बशब्दस्य अपभ्रंशः शब्दः बोधं तु जनयति एव ननु । अत एव इदम् उक्तम् –

**अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते ।**

---

[1] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 108, श्लो.सं.148, बलाहरः, राष्ट्रियसंस्कृतसंस्थानम्।

[2] पतञ्जलिः (व्याख्याता – युधिष्ठिरो मीमांसकः), (2008), महाभाष्यम्, पृष्ठ संख्या - 58, रेवली, सोनीपत - हरियाणा, रामलाल कपूर ट्रस्ट् ।

**अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णय**[1] ॥ इति।

किञ्च एवं रीत्या प्रयोगस्तु साधोः एव कर्तव्य आसीत् परन्तु अपभ्रंशस्य प्रयोगः विभिन्नैः कारणैः कृतः, तर्हि सः अपभ्रंशः शब्दः साधुशब्दस्य माध्यमेन कस्यचित् अर्थस्य अभिधायकः भवत्येव । उक्तं हि यथा –

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।**

**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते**[2] ॥ इति।

एवञ्च इत्येतावता साधुशब्दानां स्मरणमाध्यमेन असाधुशब्दानाम् अर्थबोधः जायते इति फलितं भवति । एवं चेत् तर्हि ये तावत् साधूनां शब्दानां परिचयम् एव न आवहन्ति तेषां किम् असाधूनाम् एव प्रयोगेण किम् अर्थबोधः न जायते? इति जिज्ञासा उत्पन्ना भवति । अत्र उच्यते यत् – येषां साधूनां शब्दानां ज्ञानम् एव नास्ति तेषाम् अपभ्रंशानां माध्यमेन एव अर्थस्य बोधो भवति। तैः सह यदि साधूनां शब्दानां ज्ञाता व्यवहारं करोति तर्हि तेषाम् असाधुप्रयोक्तॄणां बोधः एव न जायेत । अतः साधूनां माध्यमेन एव असाधुभिः शब्दैः अर्थः कर्तुं शक्यते न अन्यथा इति एष सिद्धान्तः युक्त्या युक्तः न भाति । उक्तं च तद् –

**पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।**

**प्रसिद्धिमागता येषु तेषां साधुरवाचकः**[3] ॥ इति ।

एवञ्च वाक्यपदीयकाराणाम् आशयैः अपि इदं स्फुटं भवति यत् अपभ्रंशेषु शब्देषु अर्थस्य बोधनं भवति तेषु अर्थबोधिका काचित् शक्तिः भवति इति वा ।

**नागेशस्य दृष्टिः**

**नागेशस्तु वाच्यवाचकभावरूपां शक्तिं साधूनां शब्दानामिव अपभ्रंशेष्वपि स्वीकरोति । यतः शक्तेः ग्राहकेषु साधुषु अपभ्रंशेषु वा शब्देषु मुख्यभूतः व्यवहारः समान एव भवति । तद्यथा तदीयमेव वचनम् –**

**"सा च शक्तिस्साधुष्विवापभ्रंशेष्वपि, शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात् "**[4] **इति ।**

---

[1] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 109, श्लो.सं.152, बलाहरः, राष्ट्रियसंस्कृतसंस्थानम्।

[2] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 110, बलाहरः, श्लो.सं.153, राष्ट्रियसंस्कृतसंस्थानम्।

[3] भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, पृष्ठ संख्या - 110, बलाहरः, श्लो.सं.154, राष्ट्रियसंस्कृतसंस्थानम्।

[4] नागेशभट्टः (व्याख्याता – डा.जयशङ्करलालत्रिपाठी), (2011), परमलघुमञ्जूषा, पृष्ठ संख्या - 32, शक्तिनिरूपणप्रकरणम्, वाराणसी, चौखम्बा कृष्णदास अकादमी।


ISSN: 2320-740X

अयं च उक्तव्यवहारः पूर्वस्मिन् जन्मनि अनुभूतायाः शक्तेः संस्कारवशात् भवति । एतेन कारणेनैव बालकेषु पशुषु पक्षिषु च शब्दानां मिथः सम्बन्धस्य बोधः भवति । उक्तं यथा –

**व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम् । अत एव बालानां तिरश्चां चान्वयबोधः । नहि तेषां तदैव तत्सम्भवः । इति**

**तार्किकाणां दृष्टिः**

नैयायिकानां वैयाकरणानाम् इव अपभ्रंशेषु अर्थावबोधस्य शक्तेः स्वीकारः न भवति । तेषां मते शक्तिः तु साधुषु शब्देषु एव भवति । असाधुभ्यः शब्देभ्यः अवबोधस्य प्रकारं ते भिन्नया एव रीत्या प्रतिपादयन्ति । तत्र प्रथमा रीतिस्तु एषा यत् साधूनां शब्दानां ज्ञातारः यदा असाधून् शब्दान् शृण्वन्ति तदा ते तेषाम् असाधूनां शब्दानाम् इव साधूनां शब्दानां स्मरणं कृत्वा असाधूनां शब्दानाम् अर्थं जानन्ति । अपरा रीतिः यत् साधूनां शब्दानाम् अज्ञातारः प्रयुज्यमानानाम् असाधूनां बोधम् अर्थशक्तेः भ्रमवशात् एव कुर्वन्ति । नाम असाधुषु शब्देषु विद्यमानायाः अर्थशक्तेः वास्तविकार्थः तैः न ज्ञायते । तेषाम् अवगमनं भ्रमयुक्तम् एव भवति इति ।

**तार्किकमतखण्डनम्**

नैयायिकानां प्रथमायाः रीतेः अनुसारं साधुशब्दानां स्मरणद्वारा असाधुशब्दानां बोधः भवति इति यदुक्तं तदनुसारेण ये खलु जनाः साधुशब्दान् न जानन्त्येव तेषां जनानां साधुशब्दानां स्मरणाभावेन असाधुशब्दैः अर्थबोध एव न स्यात् । तदुक्तम् –

**तद्वाचकसाधुशब्दमजानतां बोधानापत्तेः**[1] इति ।

किञ्च साधूनां शब्दानां शक्तेः भ्रमात् असाधूनां बोधः जायते इति यदुच्यते तदपि न युज्येत, कुत इति चेत् किञ्चन बाधकं विना असन्दिग्धस्य ज्ञानस्य भ्रमः भवितुं नार्हति । असाधुषु शब्देषु शक्तेः स्वीकारः चेत् अल्पज्ञानवताम् उच्चरितेषु साधुषु शब्देषु अर्थविषयके सन्देहे जाते तस्य साधोः शब्दस्य अपभ्रंशशब्दद्वारा एव अर्थस्य निर्णयः क्रियते । तदुक्तम् –

**..बालादीनामुच्चारिते साधावर्थसंशये तदभ्रंशेनार्थनिर्णय**[2] इति ।

किञ्च साधुषु एव शब्देषु यदि शक्तेः स्वीकारः स्यात् तर्हि मीमांसाशास्त्रप्रसङ्गानुसारं म्लेच्छानां

[1] नागेशभट्टः (व्याख्याता – डा.जयशङ्करलालत्रिपाठी), (2011), परमलघुमञ्जूषा, पृष्ठ संख्या - 33, शक्तिनिरूपणप्रकरणम्, वाराणसी, चौखम्बा कृष्णदास अकादमी।

[2] नागेशभट्टः (व्याख्याता – डा.जयशङ्करलालत्रिपाठी), (2011), परमलघुमञ्जूषा, पृष्ठ संख्या - 33, शक्तिनिरूपणप्रकरणम्, वाराणसी, चौखम्बा कृष्णदास अकादमी।

यवशब्दस्य प्रियङ्गुविषयकं ज्ञानं शक्तिभ्रमजन्यम् एव स्यात् परन्तु यथार्थज्ञानं तु न स्यात् । अत एव शुक्तौ भ्रमवतः ज्ञानं यथा रजतस्य साधकं न भवति तद्वदेव यवे प्रियङ्गोः भ्रमवतां ज्ञानं कस्यापि वस्तुनः साधकं न स्यात्। यत्र च पदार्थद्वयमपि वस्तुनः साधकं भवति तत्रैव अयं बलवान् अयं बलरहित इति निर्णयः क्रियते । एकस्य प्राधान्ये सत्येव अपरः अप्रधानः भवति । परन्तु प्रकृते म्लेच्छप्रसिद्धिः भ्रमजन्या वर्तत इत्यत उभयोः अतुल्यत्वात् बलवत्त्वाबलवत्त्वस्य अवकाश एव नोपतिष्ठते । अतः साधुशब्दानाम् इव असाधूनाम् अपि अर्थजन्या काचित् शक्तिः अङ्गीकार्या एव। उक्तं चेदम् अत्रैव मञ्जूषायाम् ।

**मीमांसकाः**

मीमांसकाः अपि अपभ्रंशनां वाचकत्वं स्वीकुर्वन्ति । अतः एव वाक्यशास्त्रे वेदवाक्यर्थनिर्णायकम् आर्यम्लेच्छाधिकरणं संगच्छते ।तथा हि तत्र यवशब्दः वेदे दीर्घशूकः इत्यर्थे , लोके च प्रियङ्गुः इत्यर्थे उभयथापि प्रसिद्धः । इह कः अर्थः स्वीकार्यः इति शङ्कायाम् आर्याणामेव वैदिककर्मणि अधिकारात् वैदिकव्यवहारे आर्याणामेव प्रसिद्धेः बलवत्त्वाच्च इह दीर्घशूकार्थः एव ग्राह्यः इति प्रतिपादितम् । यदि अपभ्रंशेषु शक्तिभ्रान्त्या अर्थबोधः इति मन्यते तर्हि अनार्याणां बोधस्य शक्तिभ्रममूलकत्वेन तेनैव दीर्घशूकस्य बोधे आर्यम्लेच्छशब्दयोः बलवत्त्वविवेकस्य असङ्गतिः स्यात् ।

**निष्कर्षः**

प्रकृतविवरणेन विषयः एषः स्पष्टः भवति यत् संस्कृतेतरशब्दाः ये लोके व्यवह्रियमाणाः सन्ति तेषु अपि अर्थबोधनपरा शक्तिः भवत्येव । यदि एषु शब्देषु शक्तिरेव न स्यात् तर्हि संस्कृतेतरलोकस्य सर्वविधः वाचिकः व्यवहार एव न स्यात् । यद्यपि साधव एव प्रयोक्तव्या इत्यस्ति आर्षाज्ञा तथापि लुप्यमानस्य साधुत्वस्य यावता संस्कृतप्रचारमाध्यमेन पुनरुज्जीवनं समग्रतया न स्यात् तावता असाधुभिरेव शब्दैः लोकः पुण्ये धर्ममार्गे नेयः स्यात् मन्थरं च असाधूनां शब्दानां स्थाने **साधवः**[1] प्रतिष्ठापयितव्याः स्युः ।

**परिशीलितग्रन्थाः**

- नागेशभट्टः (व्याख्याता – डा.जयशङ्करलालत्रिपाठी), (2011), परमलघुमञ्जूषा

[1] अत एव आर्यम्लेच्छाधिकरणं सङ्गच्छते। तत्र हि यद्यपि आर्या यवशब्दं दीर्घशूके प्रयुञ्जते म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते, तमेव च बुध्यन्ते, तथाप्यार्यप्रसिद्धेर्बलवत्वाद् वेदे दीर्घशूकपरतैवेति सिद्धान्तितम्। तव तु म्लेच्छबोधस्य शक्तिभ्रममूलकत्वेन भ्रान्तिविषयरजतज्ञानस्येव म्लेच्छप्रसिद्धेर्वस्त्वसाधकतयाऽऽर्यम्लेच्छप्रसिद्ध्योः कस्याः बलवत्त्वमिति विचारासङ्गतिः स्पष्टैव। (सन्दर्भः पूर्ववत्) साधुत्वञ्च व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकधर्मवत्त्वं वा। तद्भिन्नत्वमसाधुत्वम्। (सन्दर्भः पूर्ववत्)


ISSN: 2320-740X

- भर्तृहरिः (व्याख्याता – डा.रामनारायणदासः), (2003), वाक्यपदीये ब्रह्मकाण्डस्य समीक्षा व्याख्या च, बलाहरः, राष्ट्रियसंस्कृतसंस्थानम् ।
- श्रीमन्महर्षिपतञ्जलिविनिर्मितं पाणिनीयव्याकरणमहाभाष्यम् ,कैयटप्रणीतेनभाष्यप्रदीपेन समुल्लसितम् ।


**************

# निरुक्तशास्त्रे व्याकरणस्य भूमिका


**कु. श्रीगणेश विश्वेश्वर भट्टः**

आचार्यद्वितीयवर्षम्


सर्वविदितमेवैतत् सर्वेषां सर्वविधश्रेयःसाधनीभूतः वेद एव । तदेव सायणाचार्यैः 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः' इत्युक्तम् ऋग्वेदभाष्यभूमिकायाम् । तथा हि "कोऽयं वेदो नाम ? न हि तत्र लक्षणं प्रमाणं वास्ति । न च तदुभयव्यतिरेकेण किञ्चिद्वस्तु प्रसिद्ध्यति । 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' इति न्यायविदां मतम्" इति पूर्वपक्षिणा आक्षिप्ते सति "मन्त्रब्राह्मणात्मकत्वं तावददुष्टं लक्षणम्, अत एव आपस्तम्बो यज्ञपरिभाषामेवमाह – 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति इत्युत्तरितम् । अतः वेदः मन्त्रब्राह्मणात्मकः इति ज्ञायते । तथापि अग्रे "ननु अस्तु नाम वेदाख्यः कश्चित् पदार्थः, तथापि नासौ व्याख्यानमर्हति, अप्रमाणत्वेन अनुपयुक्तत्वात् । मन्त्रब्राह्मणात्मकः वेदः इति चेत् तेषु मन्त्रेषु केचिदबोधकाः यथा - अम्यक् सा त इन्द्र ऋष्टिः'[1] 'यादृष्मिन् धायि तमपस्यया विदत्'[2] इत्यादिमन्त्रेषु अम्यक्, यादृश्मिन् इत्यादिपदानाम् अर्थ एव न विद्यते" इत्याक्षिप्यते पूर्वपक्षिणा । अत्र सायणाचार्यैः "अम्यगादिमन्त्राणामर्थो यास्केन निरुक्तग्रन्थेऽवबोधितः । तत्परिचयरहितानामनवबोधो न मन्त्राणां दोषमावहति । अत एव अत्र लौकिकं न्यायमुदाहरन्ति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति, पुरुषापराधः स भवति[3] । तत्र जैमिनिनापि 'अविशिष्टमस्तु वाक्यार्थः'[4] इत्युक्ते क्रियाकारकसम्बन्धेन प्रतीयमानो वाक्यार्थः लोकवेदयोरविशिष्टः । तथा सति यथा लोके अर्थप्रत्यायनायैव वाक्यमुच्चार्यते तथा वैदिके यागप्रयोगेऽपि द्रष्टव्यम्" इति समाहितम् ।

---

[1] ऋग्वेदसंहिता १/१६९/३

[2] ऋग्वेदसंहिता ५/१४/८

[3] निरुक्तम् १/१६

[4] जैमिनिसूत्रम् १/२/४०

तादृशानां सार्थकानां वेदानाम् अर्थमवबोधयितुम् अपरविद्यात्वेन कीर्तितानि शिक्षादीनि षट् वेदाङ्गानि महर्षिभिः परिकल्पितानि । उक्तं च मुण्डकोपनिषदि “द्वे विद्ये वेदितव्ये इति ह स्म तद्ब्रह्मविदो वदन्ति परा चैवापरा च, तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते”[1] इति । तत्र निरुक्तं वेदपुरुषस्य श्रोत्रस्थानं, तथा व्याकरणं मुखस्थानं चालङ्कुरुतः ।

इदं निरुक्तं महर्षिणा यास्केन प्रणीतम् । अस्मिन् नैघण्टुकनैगमदैवतसंज्ञकानि त्रीणि काण्डानि विद्यन्ते । तदुक्तम् अनुक्रमणिकाभाष्ये -

**आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा ।**
**तृतीयं दैवतश्चेति समाम्नायस्त्रिधा स्थितः ॥ इति ।**

निरुच्यन्ते निःशेषेण प्रतिपाद्यन्ते शब्दार्थाः अत्र इति निरुक्तशब्दव्युत्पत्तिः । ऋग्वेदभाष्यभूमिकायां तावत् अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् । यथा गौ, ग्मा, ध्मा, क्षा, क्षमा इत्यादि इति । किन्तु निरुक्तस्य प्रथमाध्यायस्य पञ्चमपादे निरुक्तशास्त्रारम्भप्रयोजनं वदद्भिः आचार्यैः ‘अथापि इदमन्तरेण मन्त्रेषु अर्थप्रत्ययो न विद्यते, अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः इत्युक्त्वा तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्‍र्यम्’[2] इत्युक्तम् । अत्र व्याख्यायाम् – ‘अर्थपरिज्ञानस्य एतदधीनत्वात्, स्वरसंस्कारयोः अर्थवशगत्वाच्च इदं व्याकरणस्य कात्स्न्‍र्यं साहाय्येन कृत्स्नभावं पूर्णतां करोतीति शेषः । व्याकरणेन हि स्वरसंस्कारौ चिन्त्येते, तस्मादपरिसमाप्तमेव तावद्व्याकरणं यावन्निरुक्तशास्त्रं नावगतमिति । न हि अनैरुक्तोऽर्थमवधारयितुमलं भवति, न अनवधृतार्थः स्वरसंस्कारतत्त्वं जानीयात्’ इत्युक्तम् ।

अस्य अयं भावः – व्याकरणेन तु स्वराः, प्रकृतिप्रत्ययविभागश्च सूच्यते, किन्तु विशेषार्थावधानं तु निरुक्तेनैव भवितुमर्हति । अतः वेदार्थजिज्ञासुना केवलं व्याकरणमधीयते चेत् सः वेदस्य सम्पूर्णाशयं ज्ञातुं न पारयति । अतः इदं निरुक्तशास्त्रं व्याकरणशास्त्रस्य सम्पूर्णतां प्रापयतीति सिद्धमेतत् ।

अत्र प्रश्नः उदेति – यदि निरुक्तं व्याकरणस्य सम्पूर्णतां प्रापयति तर्हि निरुक्तं व्याकरणस्य अङ्गं स्यादुणादिवत् इति चेत् अग्रे मूले एव उक्तं ‘स्वार्थसाधकं च’[3] इति । अत्र व्याख्याने – ‘इदं निरुक्तं स्वार्थं साधयत् व्याकरणस्य कृत्स्नतां करोति । तस्मात् स्वतन्त्रमेवेदं विद्यास्थानम् अर्थनिर्वचनात्मकं निरुक्तशास्त्रम् । व्याकरणं तु

[1] मुण्डकोपनिषत् १/१/४-५

[2] निरुक्तम् १/५

[3] निरुक्तम् १/५


ISSN: 2320-740X

लक्षणप्रधानम् इति विशेषः' इत्युक्तम् । अस्य अयमाशयः – व्याकरणं लक्षणानुगुणं लक्ष्यसिद्धिं करोति । किन्तु निरुक्ते तावत् अर्थस्यैव प्राधान्यम् । अत्र तु अर्थानुगुणं शब्दनिष्पत्तिर्भवतीति विशेषः ।

किं च निरुक्तस्य द्वितीयाध्याये अथ निर्वचनम् इत्यारभ्य निर्वचनप्रक्रिया कथं स्यादिति चेद्यास्काचार्यैः प्रथममुच्यते – 'तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्यातां तथा तानि निर्ब्रूयात्'[1] इति । अत्र व्याख्याने -'येषु पदेषु स्वर (उदात्तदि) संस्करौ (प्रकृतिप्रत्ययौ) समर्थौ – अर्थमवगमयितुं शक्तौ प्रादेशिकेन – प्रदेशाभिधायिना, अर्थमवगमयता गुणेन - धातुरूपेण अन्वितौ – सम्बद्धौ स्यातां तथा तानि निर्ब्रूयात् नैरुक्तः इति शेषः । लक्षणप्रधानं हि व्याकरणम् आद्यभूमाववतिष्ठते' इत्युक्तम् । अस्य अयमाशयः – सति सम्भवे निरुक्तवित् व्याकरणोक्तलक्षणैः यदि निर्वचनं कर्तुं शक्तः तर्हि प्रथमं व्याकरणानुगुणमेव व्याख्यानं कुर्यात् । व्याकरणं हि लक्षणानुगुणं लक्ष्यसंस्कारं करोतीत्यतः तत् प्राधान्यं भजते इति । यथा गौः इति शब्दस्य निष्पत्तिः एवं कृता – 'यद्दूरं गता भवति, यच्चास्यां भूतानि गच्छन्ति, गातेर्वौकारो नामकरणः'[2] इति । अत्र सर्वत्र व्याकरणलक्षणम् अन्वितं भवति यथा 'गमेर्डोः'[3] इति 'गम्' धातोः प्रथमव्युत्पत्तौ कर्तरि 'डो'प्रत्ययः, द्वितीयव्युत्पत्तौ अधिकरणार्थे 'डो'प्रत्ययः । तृतीयव्युत्पत्तौ तु 'गाङ् गतौ' इति धातोः नामार्थः 'डो' एव प्रत्ययः अनेनैव सूत्रेण छान्दसत्वात् । यदि व्याकरणोक्तलक्षणं न सङ्घटते तर्हि किं क्रियेत इति चेदुच्यते 'अथानन्विते अर्थे अप्रादेशिके विकारे अर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येन, अविद्यमाने सामान्ये अक्षरवर्णसामान्यान्निर्ब्रूयात् नत्वेवं न निर्ब्रूयान्न स्वरसंस्कारमाद्रियेत'[4] इति । अस्य अयमर्थः – प्रथमं व्याकरणलक्षणेन शब्दनिष्पत्तिर्भवति वेति परीक्षेत । यदि व्याकरणलक्षणैः शब्दार्थनिर्णयः न स्यात् तर्हि केनचित् क्रियागुणसामान्येन कथमस्य धातोरर्थसामान्यमत्र अस्तीति परीक्षेत । यदि क्रियागुणसामान्यमपि न लभ्यते तर्हि अक्षरसामान्यात् अथवा वर्णसामान्यात् अर्थनिर्वचनं कुर्यात् । अस्मिन् समये स्वरसंस्कारौ (व्याकरणलक्षणम्) आदरणीयावेव इति नास्ति इति । अस्य उदाहरणं यथा 'तत्त्वा यामि ब्रह्मणा'[5] (ऋ. सं १/२/५१) इति मन्त्रे यामीति पदं पठितम् । तत्र व्याकरणदिशा याच् धातोः उत्तमपुरुषैकवचने याचे इति भवेत् । किन्तु तत्र छान्दसत्वात् चाशब्दलोपः परस्मैपदत्वञ्च । अत्र व्याकरणलक्षणं नादरणीयम् । अर्थानुसारं निर्वचनं कुर्यात् ।

---

[1] निरुक्तम् २/१

[2] निरुक्तम् २/२

[3] उणादिपाठः २/६९

[4] निरुक्तम् २/१

[5] ऋग्वेदसंहिता १/२/५१

द्वितीयाध्यायस्य प्रथमपादे निरुक्तस्य अधिकारिलक्षणं वदद्भिः यास्काचार्यैः प्राथम्येन इदमुक्तं – 'नावैयाकरणाय नानुपसन्नाय नानिदंविदे निर्ब्रूयात्'[1] इति । अत्र व्याख्याने 'वैयाकरणो हि लक्षणज्ञो भवति । यः पुनरलक्षणज्ञः तस्मै अवैयाकरणाय न निर्ब्रूयाद्यतो ह्यसौ व्युत्पाद्य निरुच्यमानमेतन्नावबुध्येत, ततश्च व्यर्थ एव श्रमः स्यात्' इति । अत्र ज्ञायते यत् येन व्याकरणं सम्यक् अपाठि तेनैव निरुक्ताध्ययनं क्रियेत नो चेत् तेन व्युत्पत्तिपूर्वकं निःशेषेण उच्यमानं पदानाम् अर्थम् अवगन्तुं न शक्येत । अतः निरुक्ताध्ययनस्य अधिकारी व्याकरणविदेव भवितुमर्हतीत्यतः निरुक्ताध्ययने व्याकरणस्य अध्ययनम् आवश्यकमेवेति ज्ञायते ।

एवं च अतिगम्भीरार्थयुक्तस्य वेदस्य अर्थनिर्वचनं निरुक्ताध्ययनेन भवति । तादृशनिरुक्तस्य अध्ययनार्थं व्याकरणस्य भूमिका अत्यावश्यकी । यथा कर्णसहितः मूकः शृणोति चेदपि वक्तुं न शक्नोति तथैव व्याकरणाध्ययनरहितः निरुक्तवित् वेदस्य सम्पूर्णाशयं ज्ञातुं न पारयति । व्याकरणाध्ययनसहितेन निरुक्ताध्ययनेनैव वेदस्य सम्पूर्णमर्थं ज्ञातुं शक्नोति कश्चिन्मनीषी ।

**********

# अभिज्ञानशाकुन्तले काव्यप्रयोजनानि

**कु. शरण्यः पि.**

आचार्यद्वितीयवर्षम्

लोकोत्तरवर्णननिपुणस्य कवेः कर्मणः काव्यस्य बहूनि प्रयोजनानि सन्ति ।

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।**

**करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥** इति भामहः ।

'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेव' इति विश्वनाथः । एवं बहवः आलङ्कारिकाः स्वेषु ग्रन्थेषु काव्यप्रयोजनानि प्रत्यपादयन् । तेषु सर्वैः अङ्गीकृतं काव्यप्रयोजनं मम्मटाचार्येणोक्तम् । तच्च-
'काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिवृत्तये कान्तासम्मिततया उपदेशयुजे' इति । अत्र मम्मटाचार्येण षट् लौकिककाव्यप्रयोजनानि प्रोक्तानि । महाकवेः कालिदासस्य सप्तसु काव्येष्वपि एतानि प्रयोजनानि सिध्यन्ति एव ।

रघुवंशम्, कुमारसम्भवम् इति महाकाव्यद्वयम् । मेघदूतम्, ऋतुसंहारम् इति खण्डकाव्यद्वयम् ।

[1] निरुक्तम् २/१

 ISSN: 2320-740X

विक्रमोर्वशीयम्, मालविकाग्निमित्रम्,अभिज्ञानशाकुन्तलम् इति नाटकत्रयम् । एतेषु सर्वेष्वपि मम्मटोक्तानि काव्यप्रयोजनानि दृश्यन्ते एव । तत्रापि विशेषतः अभिज्ञानशाकुन्तलनाटके काव्यशैली शोभामाना दृश्यते । अस्य नाटकस्य सर्वाणि प्रयोजनानि सहृदयैः प्राप्यन्ते । सुन्दरं सर्वश्रेष्ठं नाटकमिदम् अभिज्ञानशाकुन्तलम् । शृङ्गाररसः प्रधानतया वर्तते । अस्य कथावस्तु महाभारतस्य दुष्यन्तोपाख्यानतः उद्धृतम् । अस्य नायकः दुष्यन्तः, नायिका च शकुन्तला । सप्ताङ्कात्मकं नाटकमिदं सहृदयानां चित्ताह्लादकारि वर्तते ।

अभिज्ञानशाकुन्तलस्य कविः कलिदासः अस्य रचनानन्तरं सर्वत्र प्रसिद्धोऽभूत् । इदं नाटकं सर्वैः श्लाघितम्, अनेकासु भाषासु अनूदितञ्च । इदमेव काव्यस्य प्रथमं प्रयोजनं यशःप्राप्तिः । एतद्द्वारैव इदानीमपि कालिदासः लोके प्रसिद्धः ।

अस्मिन्नाटके प्रथमाङ्कादारभ्य अन्तिमाङ्कपर्यन्तं बहूनि सन्देशवाक्यानि उपलभ्यन्ते । दुष्यन्तस्य पात्रं अस्मिन् नाटके राज्ञः स्वभावः कथं स्यात्, राज्ञा कथं वर्तितव्यम् इत्यादिकं बोधयति 'षष्टांशवृत्तेरपि धर्म एषः' 'अनार्यः परदारव्यवहारः' इत्यादिभिः वाक्यैः कालिदासः व्यवहारम् अबोधयत् ।

सद्यः परनिर्वृत्तिः इत्याख्यं काव्यस्य मुख्यं सर्वप्रयोजनातिशयितप्रयोजनम् अस्मात् नाटकात् अवश्यं जायते । नाटकस्य प्रथमत्रिषु अङ्केषु सम्भोगशृङ्गारः, अन्तिमचतुर्षु अङ्केषु विप्रलम्भशृङ्गाररसश्च प्रवहति । कान्तासम्मिततया उपदेशयुक्तं भवति काव्यम् । तच्च अवश्यम् अस्मात् शाकुन्तलानाटकात् सिध्यति ।

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।**
**तत्राप्यङ्कतुरीयस्तु तत्र श्लोकचतुष्टयम् ॥**

इत्येतत् वाक्यम् अस्य काव्यस्य दर्शनानन्तरं तदर्थमेव उक्तम् । कालिदासः सर्वेभ्यः उपदेशं प्राददात्। स्त्रियः पतिगृहे कथं व्यवहारं कुर्युः, मानवजीवनं कीदृशं स्यादित्यादयो नैके उपदेशाः अस्मात् काव्यात् लभ्यन्ते ।

- अर्थो हि कन्या परकीय एव ।
- मनोरथा नाम तटप्रपाताः ।
- भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।
- अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ।

इत्यादिवाक्यानि उपदेशयुक्तानि वर्तन्ते । इत्थं सरसतापादनेन 'रामादिवद्वर्तितव्यं न रावणादिवत्' इति सन्देशः अस्मात् नाटकात् प्रत्यक्षं लभ्यते । एवं कालिदासस्य अस्मिन् रमणीये शाकुन्तलनाटके काव्यस्य अनेकानि प्रयोजनानि प्राप्तुं शक्नुमः ।

**********

# संस्काराद् द्विज उच्यते

**कु. महेश प्रकाश देवते**

आचार्यद्वितीयवर्षम्

संस्क्रियते अनेन इति संस्कारः । समुपसर्गपूर्वक कृ - धातोः घञ्प्रत्यये निष्पन्नोऽयं शब्दः । 'आत्मशरीरान्यतरनिष्ठः विहितक्रियाजन्यः अवस्थाविशेषः अविद्योपहतस्यात्मनः विशुद्धिजनको वा संस्कारः' इति व्यवह्रियते । प्राधान्येन अत्र धार्मिकतत्त्वानां प्रभावेण न केवलं जन्मान्तरीसम्बन्ध एव साध्यते, अपितु मानवजीवने देवानां साहचर्यमपि काम्यते । तत्साहचर्यं लोकपरलोकयोः नियामकं भवति । अशुभानामपाकरणं शुभानां च आमन्त्रणं संस्कारेण सम्भवति । जन्मान्तरीयगुणदोषा अपि संस्कारबलेन संयम्यन्ते । गृह्यसूत्रानुसारं संस्काराः **'बीजगर्भसमुद्भवैनोनिबर्हणपुरस्सरम् आयुःश्रीबलवृद्ध्यर्थं'** क्रियन्ते । तदेव मनुः प्रतिपादयति-

**गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः ।**
**बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥**

ऐतरेयब्राह्मणे संस्काराणां माहात्म्यम् एवं दृश्यते- **'आत्मसंस्कृतिर्वाव शिल्पानि.... एतैर्यजमान आत्मानं संस्कुरुते'** इति ।

प्रकृते संस्काराः कति विधाः, के च ते, तेषाम् आचरणं कथम् इत्यादिविषयेषु किञ्चित् ज्ञास्यामः । संख्यादृष्ट्या नामतश्च संस्कारेषु विदुषामैकमत्यं नास्ति । यथा- मनुः त्रयोदशसंस्कारान् मनुते । अङ्गिराः पञ्चविंशति संस्कारान् इति । गौतमस्तु चतुर्विंशतिम् । गृह्यसूत्रेषु द्वादश, षोडश, अष्टादश इति भेदाः दृश्यन्ते । प्राधान्येन महाभारते षोडशसंस्काराणाम् उल्लेखोऽस्ति । अतः सामान्येन गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, कर्णवेधः, चूडाकर्म, विद्यारम्भः, उपनयनम्, वेदारम्भः, केशान्तः, समावर्तनम्, विवाहः, अन्त्येष्टिः इति षोडशसंस्काराः प्रसिद्धाः। एषु आद्यास्त्रयः प्राग्जन्मसंस्काराः । अन्ये तदनन्तरं क्रियमाणाः वर्तन्ते ।

1. **गर्भाधानम्** :- शिशोर्जन्मनिमित्तकः, मातुर्गर्भे बीजरूपेण प्रतिष्ठापनरूपः संस्कारः | स्त्रीणां गर्भधारणयोग्ये ऋतुकाले दम्पती सोपवासं यज्ञादिकर्मणा मनः पवित्रीकृत्य विष्णु– त्वष्टृ- प्रजापति- सरस्वतीनां स्तवनपूर्वकं परस्परमनुरागेण सन्तानोत्पत्तौ प्रवर्तेते । शुभतिथिनक्षत्रेषु गर्भाधानं समर्थ्यते । एवं-

**युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।**
**तस्माद् युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियाम् ॥ (मनुस्मृतिः)**

ISSN: 2320-740X

समदिनेषु पुत्रोत्पत्तिः विषमदिनेषु कन्योत्पत्तिश्च भवति ।

2. **पुंसवनम्** :- पुंसः सवनम् इति । गर्भलक्षणे दृष्टे सति गर्भस्थबीजम् पुमान् क्रियते इति पुंसवनम् । गर्भनिश्चयात् परं तृतीये मासि क्रियते । गर्भिण्याः अङ्के जलेन पूर्णकुम्भं निधाय गर्भरक्षायै विष्णुप्रमुखानां देवानां स्तुतिर्विहिता। आयुर्वेदानुसारं वटशुङ्गस्य सुलक्ष्मणायाः सहदेव्याः वा रसः दुग्धेन सम्मिश्र्य गर्भवत्याः दक्षिणनासिकायां पातनीयः इति विधिः ।

3. **सीमन्तोन्नयनम्** :- गर्भवत्याः नार्याः सीमन्तः उन्नीयते इति अस्येदं नाम । संस्कारेऽस्मिन् गर्भिण्याः केशपाशमलङ्कुर्वन् पतिः सोमराजस्य स्तुतिं कुर्वन् गर्भरक्षायै सम्प्रार्थ्य सीमन्तमुन्नयति । गृह्यसूत्रेषु गर्भतश्चतुर्थे षष्ठे वा मासि, स्मृतिषु षष्ठे अष्टमे वा मासि प्रोक्तोऽयं संस्कारः ।

4. **जातकर्म** :- शिशोर्जन्मनः परं सद्यः एव क्रियते । जाते शिशौ नाभिच्छेदात् प्रागेव नान्दीश्राद्धादिकं सम्पाद्य मन्त्रोच्चारणपुरस्सरं दधिमधुघृतं समुदायुत्य सुवर्णेन प्राशयेत् । **'वेदोऽसि'** इति गुह्यं नाम कृत्वा नाभिच्छेदनं विधाय शिशुः स्नपनीयः । ततः पिता सरस्वतीं स्तुवन् शिशुं मातुः स्तनपानाय प्रयच्छति । संस्कारस्यास्य अपरं नाम **'आयुष्करणम्'** इति ।

5. **नामकरणम्** :- नामधेयकरणम् । व्यावहारिकनाम, कुलदेवतानाम, मासनाम, नक्षत्रनामेति चतुर्णां विधानं जन्मतः दशमे द्वादशे वा अहनि अथवा द्वितीयवर्षस्य प्रथमदिवसं यावत् यस्मिन् कस्मिन्नपि शुभमुहूर्ते सम्पादनीयम् इत्यस्ति । तदाह मनुः –

**नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् ।**
**पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥** इति ।

तद्धि व्याकरणमहाभाष्येऽपि उल्लिखितं यथा – 'दशम्युत्तरकालं जातस्य पुत्रस्य नाम विदध्यात् घोषवदाद्यन्तरस्थम् अवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् । तद्धि प्रतिष्ठितं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यात् न तद्धितम्' इति । एवं ब्राह्मण-क्षत्रिययोः शर्म-वर्मात्मकं नाम, वैश्य- शूद्रयोः गुप्त-दासात्मकं नाम युज्यते । गृह्यसूत्रानुसारं व्यावहारिकनाम- पितामहादिपूर्वजानां मङ्गलकरं च भवेत् । कुलदेवतानाम- **'गणपतिभक्तः'** इत्यादि तत्तत्कुलदेवतानाम भवेत् । मासनाम यथा- 'कृष्णोऽनन्त....' इत्यादि गृह्योक्तं चैत्रादि क्रमेण द्रष्टव्यम् । नक्षत्रनाम- आश्वयुजः, अपभरणिजः, कार्तिकः इत्याद्यूह्यम् ।

6. **निष्क्रमणम्** :- शिशोर्जन्मतः परं प्रथमतया गृहात् बहिरानयनम् । अयं चतुर्थे मासि क्रियते । निष्क्रमणमुहूर्ते गृहाद् बहिः चतुरस्रां भूमिं परिष्कृत्य गोमयेनोपलिप्य स्वस्तिचिह्नं कृत्वा माता तण्डुलान् विकिरति । ततः पिता


ISSN: 2320-740X

उत्थितः सन् बालकं क्रोडे कृत्वा मन्त्रोच्चारणपूर्वकं सूर्यं दर्शयन् शतायुषं कामयते । रात्रिकालिके मुहूर्ते चन्द्रदर्शनम् इति प्रकारान्तरम् ।

7. **अन्नप्राशनम्** :- जन्मकाले दधिमधुघृतप्राशनमभूत् । तदनन्तरं केवलं स्तनपानम् इति वर्तते । शिशोः घनरूपाहारपचनयोग्यता यदा भवति तदायं संस्कारः विहितः । जन्मतः षष्ठे मासे क्रियते । कस्मिंश्चित् शुभदिने मन्त्रपाठेन सह पिता शिशोः पुष्ट्यै अग्नौ हविर्जुहोति । ततः क्षीरमिश्रितान्नस्य प्राशनमस्ति ।

8. **कर्णवेधः** :- नाम्नैव स्वरूपं स्पष्टम् । जन्मतः सप्तमे अष्टमे वा मासे अयं सम्स्कारः विहितः । कर्णवेधनाय सौवर्णी राजती लौही वा सूची भवति । वैद्यः सुवर्णकारो वा विद्धयति । पिता मन्त्रोच्चारणं कुर्यात् । बालकस्य प्रथमं दक्षिणकर्णः बालिकायाः तु वामकर्णः इति क्रमेण विद्ध्यते । क्रोधोपशमनाय, अण्डकोशवृद्धि-आन्त्रवृद्धिं च निरोद्धुं कर्णभूषणं च धारयितुं युज्यते अयं संस्कारः।

9. **चूडाकर्म** :- 'चूडा' इत्यस्य अर्थः 'शिखा' । अस्मिन् केशानां कर्तनं मुण्डनं वा विधाय शिखा स्थाप्यते । इदमेवास्य प्रधानोद्देश्यम् । दीर्घायुषे, यशसे, कल्याणाय च उक्तोऽयम् । सुमुहूर्ते पुण्यक्षेत्रे माङ्गलिकं विधानम् अनुष्ठाय माता बालकं क्रोडे कृत्वा उपविशति । पिता मन्त्रोच्चारणपूर्वकं सकुशान् केशान् कर्तयित्वा गोमये निधापयति । पश्चात् नापितः शिखादिकं सम्पादयति । छिन्नकेशाः सुगुप्ते स्थाने सरोवरे भूमिगर्तेवा विसर्जिताः क्रियन्ते । गोत्रानुसारं कुलाचारमनुसृत्य वा शिखा स्थाप्यते ।

10. **विद्यारम्भः** :- गृह्यसूत्रेषु क्वचिदयं संस्कारत्वेन न दृश्यते । लोके तु **'अक्षराभ्यासः'** इति व्यवह्रियते । शुभदिने मन्त्रघोषपुरस्सरं तण्डुलस्योपरि अक्षराणामभ्यासः मात्रा पित्रा च कार्यते । तस्मिन्नेव काले धनम्, पुस्तकम्, क्रीडासामग्र्यः इत्यादीन् संस्थाप्य शिशुः गत्वा किं गृह्णाति इति दृष्ट्वा तस्य जीविकानिर्धारणक्रमोऽपि वेद्यते ।

11. **उपनयनम्** :- लोकाद् वेदे यदानयनं तदुपनयनमित्युच्यते । लोकवेदयोरुभयोरपि विज्ञाता आचार्यः तत्र ब्रह्मचारिणां गतिर्भवति । अत एव अस्यापरं नाम **'आचार्यकरणम्'** इति । अस्य परमोद्देश्यं तु **'द्विजत्वसिद्धिपूर्वकवेदाध्ययनाधिकारसिद्धिः'** । आचार्य एवात्र द्वितीयस्य जन्मनः प्रदाता । अत्र सवित्रीमन्त्रोपदेशः, अजिनसहितं यज्ञोपवीतधारणं, मौन्जीबन्धनं, दण्डग्रहणं, भिक्षाचरणम् इत्यादयः प्रधानांशाः विद्यन्ते । एतेन वटुः ब्रह्मवर्चसमाप्नोति । उपनयनकालस्तु शास्त्रे एवं निर्धारितः – **'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यं'** चेति । एवं गर्भाष्टमे ब्राह्मणस्य, गर्भैकादशे राजन्यस्य, गर्भाद् द्वादशे वर्षे वैश्यस्योपनयनं प्रोक्तम् । अजिनयज्ञोपवीतधारणसंस्कारतः पश्चादाचार्यः शिष्यस्य शौचाचारम्, अग्निकार्यम्, सन्ध्योपासनञ्च

शिक्षयति ।

12. **वेदारम्भः** :- अयं वेदपाठस्य आरम्भार्थः क्रियते । व्यासस्मृतौ अयं संस्कारत्वेन प्रतिपादितः । गृह्यसूत्रेषु अत्र चतुर्णां व्रतानामुल्लेखो दृश्यते । तानि महानाम्नीव्रतम्, महाव्रतम्, उपनिषद्व्रतम्, गोदानव्रतञ्चेति । शुभे मुहूर्ते गुरुः स्वशिष्यं प्रदीप्ताग्नेः पश्चिमत उपवेशयति । यथोक्तं हवनं सम्पाद्य वेदाध्ययनं प्रारभ्यते ।

13. **केशान्तः** :- चूडाकर्मसंस्कारे केवलं केशानां वपनं भवति । श्मश्र्वादीनां कर्तनं मुण्डनं वा प्रथमतया संस्कारेऽस्मिन् भवति । केचन गोदानव्रतमेवेदम् इति वदन्ति । यथा गोशब्दस्य केश- श्मश्रु- लोमादयोऽपि अर्थाः इति स्वीकृत्य तत्पर्याय इति । अस्य कालस्तु मनुना उक्तः –

**केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ।**
**राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥** इति

14. **समावर्तनम्** :- अध्ययनं समाप्य गुरोराश्रमात् गृहं प्रति प्रत्यागमनम् समावर्तनम् । विद्यासम्पन्नस्य ब्रह्मचारिणः विधिवत् स्नानं विहितम् । एवं विद्याव्रतस्नातकः सः स्नातकपदवीं लभते । **'स्रग्वी'** इति अस्य पर्यायः। अत्रैव आचार्यः शाश्वतीं शिक्षां प्रोवाच- **'सत्यं वद । धर्मं चर । आचार्याय............... नो इतराणि'** इति । गृहस्थाश्रमप्रवेशाय संस्कारोऽयं सोपानत्वेन दृश्यते ।

15. **विवाहः** :- **'जायमानो वै ब्राह्मणस्त्रिभिः ऋणवान् जायते । ब्रह्मचर्येण ऋषिभ्यो वेदेन देवेभ्यः प्रजया पितृभ्यः'** इति श्रुतिमूलकत्वात् **'अविप्लुतब्रह्मचारी लक्षण्यां स्त्रियमुद्वहेत्'** इति शास्त्रवचनानुसारं प्रजोत्पादनाय पुरुषार्थसाधनाय च संस्कारोऽयं विहितः । पाणिग्रहणं सप्तपदी च प्राधान्येन दृश्यते । स्त्रीपुरुषयोः वैवाहिकः सम्बन्धः शस्त्रोक्तैः मन्त्रैः विधिभिश्च सम्पाद्यते । यज्ञाधिकारः सपत्नीकस्यैव सम्भवति इत्यस्ति । धर्मपत्न्यां पुत्रं सम्प्राप्य पुरुषः पितृणाम् ऋणान्मुक्तो भवति । सगोत्रेषु सपिण्डेषु समानप्रवरेषु च विवाहो निषिद्धः । अनुलोमविवाहः शास्त्रसम्मतः । प्रतिलोमस्तु न । तदनु ब्राह्मणक्षत्रियवैश्यवराणां क्रमशः चतुस्त्रिद्विवर्णोत्पन्नाभिः कन्याभिर्विवाहो योग्यः । मनुना विवाहस्याष्टौ भेदाः कृताः – ब्राह्म- दैव- आर्ष- प्राजपत्य- आसुर- गान्धर्व- राक्षस - पैशाचाश्च । तत्र ब्राह्मदैवार्षप्राजापत्याः श्रेष्ठाः शास्त्रसम्मताश्च । आसुरगान्धर्वौ मध्यमौ, राक्षसपैशाचौ अधमौ इति ।

16. **अन्त्येष्टिः** :- निवृत्तिप्रधानोऽयम् संस्कारः बहुभिः न गण्यते तथापि आश्वलायनादिगृह्यसूत्रेषु परिगणितः । अयमेव जीवनस्य चरमः संस्कारः । अन्त्याः= अन्तिमा, इष्टिः= यज्ञः तस्मादयं अन्तिमः शवदाहादिरूपः भवति । एतेन मृतकस्य अग्रिमजन्म निर्बाधं सम्पद्यते ।


ISSN: 2320-740X

एवं एते संस्काराः व्यक्तित्वविकासाय सहकुर्वन्ति । एतैः सुसंस्कृताश्चेत् लौकिकी समृद्धिरपि सिध्यति । संस्काराः संस्कारोपकरणानि भूत्वा समग्रमपि जीवनं संस्कारमयं कर्तुं क्षमन्ते । ऐतरेयब्राह्मणेऽपि संस्काराणां माहात्म्यम् एवं दृश्यते- **'आत्मसंस्कृतिर्वाव शिल्पानि.... एतैर्यजमान आत्मानं संस्कुरुते'** इति । अत एव एतदर्थिका **'संस्काराद् द्विज उच्यते'** इत्युक्तिरपि संगच्छते ।

**********

# विभक्त्यर्थस्य विभक्त्यर्थान्तरान्वयविचारः

**कु. देवीकृष्णा**

आचार्यद्वितीयवर्षम्

सविषयकार्थकधातुसमभिव्याहारस्थले द्वितीयया विषयतारूपं कर्मत्वं बोध्यते । यथ 'चैत्रः शास्त्रं जानाति' इत्यत्र 'शास्त्रनिष्ठविषयतानिरूपकज्ञानाश्रयः चैत्रः' इति बोधः । नञ्समभिव्याहारस्थले 'शास्त्रं न जानाति' इत्यादौ शाब्दबोधानुपपत्त्या नव्यनैयायिकैः विषयित्वमेव द्वितीयार्थः न तु विषयत्वमिति अभ्युपगम्यते ।

'रजतत्वेन शुक्तिं जानाति' इत्यत्र तृतीयार्थः प्रकारिता धात्वर्थे ज्ञाने अन्वेति, रजतत्वप्रकारिताविशिष्टज्ञाने द्वितीयान्तार्थः शुक्तिविषयिता अन्वेति इति सिद्धान्तः ।

**अत्रेदम् एकदेशिमतम्** – 'रजतत्वेन शुक्तिं जानाति' इत्यत्र तृतीयान्तार्थस्य रजतत्वप्रकारकत्वस्य द्वितीयान्तार्थे शुक्तिविषयकत्वे अवच्छेद्यावच्छेदकभावसम्बन्धेनान्वेति । इदं मतं न शोभनम् । विभक्त्यर्थे विभक्त्यर्थान्तरान्वयस्य अव्युत्पन्नत्वात् । उक्तस्थले प्रकारितायाः विषयितायाः उभयोरपि विभक्त्यर्थत्वात् ।

**अत्र पूर्वपक्षी प्रत्यवतिष्ठते** – विभक्त्यर्थे विभक्त्यर्थान्तरान्वयः स्वीकर्तव्यो भवति । 'रजतत्वेन ज्ञायते इदम्' इत्यत्र तृतीयार्थप्रकारतायाः आख्यातार्थे विषयतायां निरूपितत्वसम्बन्धेन अन्वयं स्वीकृत्य 'रजतत्वनिष्ठप्रकारतानिरूपिता या ज्ञाननिरूपिता विषयता तदाश्रयतावदिदम्' इत्याकारकशाब्दबोधस्य सिद्धान्तेऽपि स्वीकृतत्वात् इति ।

**अत्रेदं समाधानम्** – 'रजतत्वेन ज्ञायते इदम्' इति वाक्यप्रयोगस्थले विभक्त्यर्थयोः अन्वयः नैव स्वीकृतः । तृतीयान्तार्थे रजतत्वप्रकारताविशेष्यितधात्वर्थज्ञानस्यैव आख्यातार्थे विषयतायाम् अन्वयः स्वीक्रियत इति ।

ननु 'तस्मात् पचति' इत्यस्मिन् निगमनवाक्ये पञ्चम्यर्थस्य हेतुत्वस्य ज्ञाप्यतारूपस्य तिप्प्रत्ययार्थे कृतौ अन्वयः सर्वसम्मतः । एवं 'तस्मात् चैत्रस्य' इति निगमनवाक्येऽपि पञ्चम्यर्थस्य हेतुत्वस्य षष्ठ्यर्थे सम्बन्धे अन्वयोऽपि सर्वसम्मतः । अतः विभक्त्यर्थस्य विभक्त्यन्तरार्थस्यान्वयो भवितुमर्हति इति चेन्न ।

हेतुविभक्त्यर्थातिरिक्तविभक्त्यर्थस्य विभक्त्यन्तरार्थानन्वय इत्येव नियमः विवक्षितः । दर्शितस्थलद्वये हेतुविभक्त्यर्थस्यैव विभक्त्यन्तरार्थेन अन्वयः । 'रजतत्वेन शुक्तिं जानाति' इत्यत्र तु तृतीयार्थद्वितीयार्थयोः हेतुविभक्त्यर्थत्वाभावात् अन्वयः भवितुं नार्हति ।

नन्वेवमपि 'रजतत्वेन शुक्तिं जानाति' इत्यत्र तृतीयायाः कारकविभक्तित्वाभावात् तदर्थस्य प्रकारितायाः धात्वर्थे ज्ञाने अन्वयोपगमो न सम्भवति । कारकविभक्त्यर्थस्यैव क्रियान्वयनियमात् । अतः गत्यन्तरविरहेण तृतीयार्थप्रकारितायाः द्वितीयान्तविषयितायामेव अन्वयः स्वीकर्तव्य इति चेत् ।

अत्रोच्यते, कारकविभक्त्यर्थस्य एव क्रियान्वय इति नियमः असिद्धः । यतो हि 'तस्मात् जानाति' इत्यत्र पञ्चम्यर्थस्य ज्ञाप्यत्वस्य कारकविभक्त्यर्थातिरिक्तत्वेऽपि धात्वर्थे ज्ञाने स्वरूपसम्बन्धेन अन्वयः मणिकारमते स्वीकृतः । एवं 'तस्मात् स्थीयते' इत्यत्र निगमनवाक्ये पञ्चम्यर्थस्य ज्ञाप्यत्वस्य कारकविभक्त्यर्थत्वाभावेऽपि धात्वर्थे स्थितौ अन्वयः सर्वमत एव अङ्गीकृतः । एवं 'गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः' इत्यत्र षष्ठ्यर्थसम्बन्धस्य कारकविभक्त्यर्थत्वाभावेऽपि धात्वर्थे प्रतिकरणे अन्वयः सर्वसम्मतः । एवं 'रजतत्वेन जानाति' इत्यत्र द्वितीयान्तपदसमभिव्याहाररहितवाक्ये तृतीयार्थस्य प्रकारितायाः कारकविभक्त्यर्थत्वाभावेऽपि गत्यन्तरविरहेण धात्वर्थे ज्ञाने एव अन्वयः उपगन्तव्यो भवति । विषयतायाः तत्र उपस्थापकपदविरहेण उपस्थितिविरहात् इति ।

**********


ISSN: 2320-740X

# काव्यप्रकाशकारेणोक्तं रसस्वरूपम्

**कु. सावित्रीदास्**

आचार्यद्वितीयर्षम्

साहित्यशास्त्रे विद्यमानेषु विविधेषु आलङ्कारिकेषु मम्मटस्य सुप्रसिद्धस्थानं वर्तते । काव्यप्रकाशस्य रसः काव्यस्य आत्मरूपः । रसस्य लक्षणं निरूपितं मम्मटेन उक्तं यथा-

**कारणान्यथ कार्याणि सहकारीणि यानि च ।**

**रत्यादेः स्थायिनो लोके तानि चेत् नाट्यकाव्ययोः ॥**

**विभावः अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।**

**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥**

कारिकायाः तात्पर्यमिदं यत् लोके यानि यानि कारणानि कार्याणि सहकारिकारणानि सन्ति तानि काव्ये नाट्ये वा विभावादीनां रूपेण ज्ञातव्यानि भवन्ति । सहृदयानाम् अन्तःकरणे विद्यमानानां रतिहासशोकादीनां स्थायिभावानां परिपोषकतया जायन्ते । तानि विभावानुभावव्यभिचारिभावाः इति कथ्यन्ते ।

तैः विभावानुभावादिभिः यथा रत्यादीनां स्थायिभावनां सम्पूर्णरूपेण परिपुष्टिः जायते । तत्र विभावादिभिः परिपोषणं 'स्थायिभावरसस्स्मृत' इति मम्मटेनापि उक्तम् स्थायी इति स्थायिनः लक्षणं रत्यादयः सततं सहृदयेषु तिष्ठन्ति । यावत्पर्यन्तं विभावादयः हेतुरूपेण न आयान्ति तावत्पर्यन्तं तेषां रत्यादीनां परिपोषः न जायते । एतत् सर्वं भरतमुनिना साररूपेण सूत्रितम् – 'विभावानुभावव्यभिचारिसंयोगात् रसनिष्पन्तिः'' इति । साहित्यशास्त्रे भरतमुनेः रससूत्रं मनसि निधाय आलङ्कारिकाः रसलक्षणं निरूपितवन्तः । मम्मटोऽपि काव्यप्रकाशे चतुर्थोल्लासे भरतस्य रससूत्रस्योपरि एव कारणान्वयकार्याणि इति लक्षणं निरूपयामास ।

********

# नहि सत्यात्परो धर्मः

**कु. चण्डीप्रसादः**

आचार्यप्रथमवर्षम्

सत्यं द्विविधम् अस्ति, भौतिकम् आध्यात्मिकञ्च । तत्र भौतिकं सत्यं कीदृशम् इति एवमुक्तम् 'यथादृष्टं यथाश्रुतं यथा मनसि अनुभूतं तथैव कथनं सत्यम्' इति । आध्यात्मिकं सत्यम् एवं भवति 'त्रिकालाबाधितं सत्यम्'। अयमाशयः भूतभविष्यद्वर्तमानेषु त्रिषु कालेषु यत् वर्तते तत् सत्यम् अभिधीयते, आध्यात्मिकं सत्यं प्राप्तुं प्रथमं भौतिकं सत्यम् आश्रयणीयम् । व्यावहारिके जीवने लौकिकं सत्यम् आश्रित्य ये जनाः सर्वाणि कार्याणि कुर्वन्ति ते सकलदुःखरहिताः भवन्ति । दुःखसामग्र्या समावृताः अपि ते सुखिनः भवन्ति । सत्येन शान्तिः लभ्यते । शान्त्या ध्यानं लभ्यते तथा ध्यानात् आध्यात्मिकं ज्ञानं लभ्यते । एवं सत्येन मनुष्याः मानवजीवनस्य लक्ष्यभूतान् पुरुषार्थचतुष्टयं धर्मार्थकाममोक्षादीन् चतुरः पुरुषार्थान् प्राप्तुं समर्थाः भवन्ति ।

सत्यस्य गणना धर्मशास्त्रेषु अस्ति । सत्यम् अत्यन्तं महत्त्वपूर्णमस्ति । सकलं जगत् सत्ये प्रतिष्ठितम् । मानवजीवनं सत्येन सञ्चालितं भवति । यदि अस्मिन् जगति सत्यस्य आश्रयणं न कृतं स्यात् तर्हि सकलव्यवहारशून्यत्वाद् इदं जगत् नष्टं स्यात् । अस्माकं जीवने विवाहादिव्यवस्था सत्यमाश्रिता अस्ति । वरकन्ययोः अभिभावकैः यत् किंचित् निश्चितं तत् मौखिकम् अस्ति न तु लिखितम् । सत्यमेव आश्रित्य निर्धारितायां तिथौ द्वयोः पक्षयोः जनाः सकलानि विवाहोचितानि कार्याणि सम्पन्नानि कुर्वन्ति । एवं कृषिकर्मणि व्यापारे च ये जनाः सत्यमाश्रित्य कार्यं कुर्वन्ति ते स्वकार्येषु साफल्यं प्राप्नुवन्ति । ये जनाः सत्यमनाश्रित्य कार्यं कुर्वन्ति ते सर्वदा अवनतिं यान्ति ।

सत्येन आत्मबलं प्राप्यते । सत्यवक्तारः सदा उन्नतमस्तकाः सन्ति । ते कस्मादपि न बिभ्यति । समाजे तेषाम् अतीव आदरो भवति । सत्यवक्तुः व्यक्तित्वं महत्त्वपूर्णं प्रभावोत्पादकं भवति । ये सत्यं न वदन्ति ते सदा नतमस्तकाः सन्तः इतस्ततः परिभ्रमन्ति । लोके तेषां प्रतिष्ठा न भवति । येषां जनानां लोके प्रतिष्ठा न भवति तेषां जीवनं पृथिव्यां भारस्वरूपमस्ति । तेषु आत्मनिर्बलता वर्तते । ते सदैव भयभीताः सन्ति । एतादृशाः जनाः सर्वेषां घृणापात्राणि भवन्ति । अतः सर्वैः सत्यम् आश्रयणीयम् । सत्येन विश्वासः जायते । विश्वासेन सकलानि कार्याणि सिद्ध्यन्ति । एतदर्थमेव न केवलं अस्माकं देशे अपि तु सर्वेषु राष्ट्रेषु सत्यस्य महिमा प्रतिष्ठितः अस्ति । यावन्तः धर्माः धर्मशास्त्रेषु वर्णिताः तेषु सत्यात् परः न कश्चिद् अन्यो धर्मः । एकं सत्यं पालयन्तः जनाः सर्वधर्मपालकाः भवन्ति । सत्ये सर्वेषां धर्माणाम् अन्तर्भावो भवति ।



ISSN: 2320-740X

अस्मिन् भारते सत्यपालने सर्वे प्राचीनाः ऋषयः मुनयः राजानश्च संलग्नाः आसन् । महाराजः हरिश्चन्द्रः सत्याय सर्वम् आत्मनः राज्यं त्यक्तवान् । महाराजः दशरथः सत्यपालनाय स्वपुत्रं रामचन्द्रं वनं प्रेषितवान् । प्राचीनकाले जनाः सत्याय धनं त्यक्तवन्तः आसन् । किन्तु वर्तमानयुगे जनाः धनाय सत्यं त्यजन्ति । एतस्मादेव कारणात् अस्माकं भारतीयानां वर्तमानं जीवनं दुःखमयमस्ति। अतः धर्मार्थकाममोक्षदायकं सत्यं सर्वैः पालनीयम् । उक्तं च सत्यस्य महत्त्वं धर्मशास्त्रे -

**सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।**
**प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः ॥**

*********

# वेदाः, तेषु साहित्यगणिते

**कु. गिरीशभट्टः**
शिक्षाशास्त्रिप्रथमवर्षम्

विविधवेषभूषणभाषाव्यवहारविभूषितविश्वेऽस्मिन् विद्याविवेकविशोधितविशिष्टसंस्कृत्या विश्रुतं विशिष्टं विख्यातं च स्थानं भजते भारतमिदम् । भारते यथा संस्कृतिः प्रमुखा वर्तते तथैव वेदोऽपि प्रमुखं स्थानं वहत्येव । वेद इति नाम्नि एव वर्तते वेदस्यार्थः **'ज्ञानम्'** इति । अस्योत्पत्तिः **'विद् ज्ञाने'** इति धातोः घञ्प्रत्यये वेद इति रूपं भवति । वेदः नित्यः अपौरुषेयश्च अर्थात् वेदस्य उत्पत्तिः नास्ति नाशोऽपि नास्ति । वेदः केनापि पुरुषेण न निर्मितः न प्रणीतश्च । साक्षात् ब्रह्मणः रूपमेव अयं वेदः । अस्य वेदस्य श्रुतिः इत्यपि नामान्तरं वर्तते । हिन्दूधर्मे अयं वेदः विशिष्टं स्थानं वहति ।

वेदस्य महत्त्वं गोपथब्राह्मणे एवं दृश्यते यत् – **'श्रेष्ठो हि वेदः तपसा अधिजातः ब्रह्मज्ञानं हृदये संबभूव'** इति । श्रेष्ठतमज्ञानं वेदे एव अस्ति । वेदाः ऋषीणां हृदयगोचराः अभवन् । अस्माकं ऋषिभिः मनसा अन्तश्चक्षुषा च श्रुतः दृष्टश्च वेदः । अतः तान् ऋषीन् मन्त्रद्रष्टारः इति वदन्ति न तु मन्त्रकर्तारस्ते । ऋषिभिः श्रुताः एते वेदाः इति कारणेन अयं वेदः **श्रुतिः** इति कथ्यते । वेदस्य स्वतःप्रामाण्यं स्वीक्रियते । ये विषयाः वेदे सन्ति ते सत्यमेव, साक्षात् ब्रह्मस्वरूपः अयं वेदः इति कारणेन । अस्माकं पुराणेषु उच्यते यत् – **'वेदस्य साहाय्येनैव ब्रह्मा सृष्टिकार्यं करोति'** इति । वेदस्य आदिः नास्ति अन्तोऽपि नास्ति । वेदज्ञानं ब्रह्मा सृष्टेः आरम्भे चतुर्भ्यः ऋषिभ्यः दत्तवान् । मानवानां जन्म सार्थकं भवतु इति श्रूयते । अग्निना ऋग्वेदः, वायुना यजुर्वेदः, आदित्येन सामवेदः, अङ्गिरसा अथर्ववेदः प्राप्तः इति ज्ञानिनः कथयन्ति ।

वेदेषु एव एवम् उच्यते यत् – **'अनन्ता वै वेदाः'** इति । प्राचीनकाले वेदाः लिखिताः नासन् । साक्षात् गुरुणा शिष्येभ्यः मौखिकरूपेणैव पाठ्यन्ते स्म । भारते धर्मव्यवस्था वेदायत्ता एव । वेदः धर्मनिरूपणे स्वातन्त्र्येण प्रामाणं भवति स्मृत्यादयस्तु तन्मूलकतया एव । न केवलं वेदाः धर्ममूलतया एव समादृताः विश्वेऽस्मिन् सर्वप्राचीनग्रन्थतयापि । प्राचीनानि धर्मसमाजव्यवहारप्रभृतीनि वस्तुजातानि बोधयितुं श्रुतयः एव क्षमन्ते । प्रधानतया वेदः द्विविधः । मन्त्ररूपः ब्राह्मणरूपश्चेति । मन्त्रसमुदायः संहिताशब्देन व्यवहृतः । ब्राह्मणरूपः वेदभागस्तु संहिताभागस्य व्याख्यारूपः । वेदस्तु विभागचतुष्टयेन विभक्तः वर्तते । तेषु बहवः शाखाः अपि वर्तन्ते ।

वेदे चत्वारः भेदाः एवं वर्तन्ते – १. ऋग्वेदः २. यजुर्वेदः ३. सामवेदः ४. अथर्ववेदः इति । ऋग्वेदस्य प्रमुखः विषयः ज्ञानम् । ऋच्यते स्तूयते अनया सा ऋक् । तादृशीनाम् ऋचां समूहः एव ऋग्वेदः । यत्र अर्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः वदन्ति । सः ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः । तत्र सूक्तं चतुर्विधमस्ति - ऋषिदेवताछन्दोऽर्थसूक्तमिति । एकर्षिदृष्टमन्त्राणां समूहः ऋषिसूक्तम् । एकदेवताकमन्त्राणां समूहः देवतासूक्तम् । समानच्छन्दसां मन्त्राणां समूहः छन्दःसूक्तम् । यावदर्थसमाप्तानां मन्त्राणां समूहः अर्थसूक्तम् । सुष्ठु उक्तत्वात् सर्वं सूक्तमिति आख्यायते । ऋग्वेदः मण्डलानुवाकवर्गभेदेन, अष्टकाध्ययनसूक्तभेदेन द्विधा अस्ति । चतुर्षु वेदेषु प्रथमगणनीयः अयं ऋग्वेदः ।

यजुर्वेदस्य प्रमुखः विषयः कर्म । विशेषतः यजुर्वेदे यज्ञस्य प्राधान्यमस्ति । **'ज्ञ'** इति अक्षरं ज्ञानं सूचयति यथा प्रकृष्टरूपेण यः जानाति सः प्रज्ञः इति । **'य'** इति अक्षरम् आश्रयं सूचयति । अस्माकं सृष्टेः आश्रयः परमात्मा एव । आश्रयस्य स्वरूपज्ञानमेव यज्ञाचरणस्य उद्देश्यम् । अतः यज्ञः इति इदं पदम् आत्मज्ञानमेव सूचयति ।

सामवेदस्य प्रमुखः विषयः उपासनम् । सामवेदस्तु छन्दोरूपेण वर्तते । यथा लोके गीतानि भवन्ति तथैव वेदेषु सामवेदः । अथर्ववेदस्य प्रमुखः विषयः विज्ञानम् । अथर्ववेदस्तु धर्मकार्याणि सूचयति । कथं मानवः जीवनं यापयेत्, किं किं कर्तव्यं किं किं न कर्तव्यमिति, अयं धर्मो वा अधर्मो वा, के आदरणीयाः इत्यादिबोधनं करोति अयं अथर्ववेदः । **'सत्यं वद । धर्मं चर । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव इति ।'** सत्यमेव वक्तव्यं नानृतं, मातापित्रोः आदरणविषयेऽपि वदति वेदः । उपनिषदि वर्तते इदं वाक्यम् **'अन्नं न निन्द्यात्'** इति अर्थात् अन्नं देवतासमानम् इति । अतः कदापि अन्नस्य निन्दा न करणीया इति बोधयति ।

प्रत्येकं वेदे संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषत् चेति चत्वारः भागाः सन्ति । संहिता वृक्षाः इति चिन्तयामश्चेत् ब्राह्मणानि अत्र पुष्पाणि भवन्ति । आरण्यकानि अपक्वफलानि, उपनिषदः तु पक्वफलानि भवन्ति । एतदतिरिच्य आयुर्वेद–धनुर्वेद–गन्धर्ववेद–स्थापत्यवेदाख्याः चत्वारः उपवेदाः अपि सन्ति । अस्माकं संस्कृतस्य


ISSN: 2320-740X

स्वरूपमेव एते वेदाः । **'नास्ति वेदात् परं शास्त्रम्'** इति लोकोक्तिः । आङ्ग्लीयः आल्फ्रेड् नोरत् वैट्हेड् ( Alfred North Whitehead ) वदति यत् – 'Vedanta is the most impressive metaphysics the human mind has conceived' इति । एतेन वयं ज्ञातुं शक्नुमः यत् अन्यदेशीयाः अपि वेदेन प्रभाविताः इति । अमेरिका, चीना इत्यादि देशे वेदवक्यानि सूक्तानि च इदानीं पाठ्यक्रमे वर्तन्ते इति वयं अन्तर्जालद्वारा ज्ञातुं शक्नुमः ।

पूर्वकाले वेदस्य अध्ययनं मौखिकरूपेणैव भवति स्म । तत्र दोषवर्जनाय वेदाध्ययने विहितः नियमः एवमस्ति – चतुर्वेदैः सह षडङ्गानाम् (शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्, कल्पः) अपि अध्ययनम् आवश्यकम् इति । पतञ्जलिकृतमहाभाष्ये वर्तते यत् – **'रक्षार्थं वेदानाम् अध्येयं व्याकरणम्'** इति । सर्वेभ्यः शास्त्रेभ्यः वेदाः एव श्रेष्ठाः । यथा नदीनां वैशिष्ट्यकथनसमये ताः गङ्गासदृश्यः इत्युच्यन्ते, यथा पुण्यक्षेत्राणां वैशिष्ट्यकथनसमये काशीसदृशानि क्षेत्राणि इति वदन्ति तथैव कस्यपि ग्रन्थस्य वैशिष्ट्यकथनसमये सः वेदसमो ग्रन्थः इत्युक्तिस्तु नातिशयोक्तिः । रामायणे एवमुक्तं वर्तते यत् –

**वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।**
**वेदः प्राचेतसादासीत् साक्षात् रामायणात्मना ॥**इति ।

कुमारिलभट्टः इति एकः पूर्वमीमांसकः आसीत् । एकदा तस्य रिपवः तमेकस्मात् पर्वतात् पातितवन्तः । तदा सः उक्तवान् यत् – यदि वेदः सत्यमस्ति, तर्हि मे कापि हानिः न भविष्यति इति । उन्नतात् पर्वतात् पतनानन्तरमपि सः अजीवत् । परन्तु तस्य एकं नयनं नष्टम् अभवत् । अस्य कारणं सः यदि वेदाः सत्यं तर्हि इति उक्तवान् । तेन किञ्चित् संशयवाक्यं यदि इति प्रयोगः कृतः इति तस्य नयनं नष्टमिति घटनया वयं ज्ञास्यामः वेदः सत्यमेव इति ।

**वेदे साहित्यम् :-**

वेदाः उत्कृष्टाः साहित्यकृतयश्च भवन्ति । संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते । तद्यथा -

**जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च ।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि ।** इति ।

अर्थात् साहित्यपाठ्यक्रमे गद्यम् ऋग्वेदात् स्वीकृतम् । गीतरूपपद्यपद्धतिः सामवेदात् स्वीकृता । नाटकादिषु विद्यमानः अभिनयः यजुर्वेदात् स्वीकृतः । शृङ्गारादिनवरसत्वम् अथवर्वणवेदात् स्वीकृतमिति । जगतः सृष्टेः विषयेऽपि अत्रोक्तः यथा **'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः ।'** इति ।

**वेदे गणितम् :-**

वेदास्तु गणितविषयेऽपि पात्रं वहन्ति । उदाहरणार्थम् – यजुर्वेदस्य चमकाध्याये शिवप्रार्थनायाम् अन्तिमेऽनुवाके एवं वर्तते यत् –

| | | |
|---|---|---|
| एका च मे | – 01+00=01 | – एकस्य वर्गः एकः । |
| तिस्रश्चमे | – 03+01=04 | – द्वयोः वर्गः चत्वारः । |
| पञ्च च मे | – 05+04=09 | – त्रयाणां वर्गः नव । |
| सप्त च मे | – 07+09=16 | – चतुर्णां वर्गः षोडश । |
| नव च मे | –09+16=25 | – पञ्चानां वर्गः पञ्चविंशतिः । |
| एकादश च मे | – 11+25=36 | – षण्णां वर्गः षट् त्रिंशत् । |
| त्रयोदश च मे | – 13+36=49 | – सप्तानां वर्गः एको न पञ्चाशत् । |
| पञ्चदश च मे | – 15+49=64 | – अष्टानां वर्गः चतुष्षष्टिः । |

एवमेव सप्तदश च मे, नवदश च मे, एकविंशति च मे इत्यादयः वर्तन्ते इति वेदे गणितमपि साक्षात् प्रस्तुतं भवति ।

वेदशब्दाः सर्वत्र आकाशे सर्वदा व्याप्ताः भवन्ति । अस्माकं भारतीयसंस्कृतिः वैदिकसंस्कृतिः इति प्रसिद्धा अस्ति । वेदोक्तं यज्ञाचरणमेव अस्माकं संस्कृतिः । यद्यपि वयं वेदमन्त्राणाम् अर्थं पूर्णतया न जानीमः तथापि मन्त्रश्रवणेनैव शुभं प्राप्नुमः । यावत्कालपर्यन्तम् अस्माभिः वेदस्य रक्षणं क्रियते तावत्कालपर्यन्तम् अस्माकं धर्मः रक्षितः भवति । भारतदेशः लोकगुरुः भूत्वा सर्वान् सन्मार्गे नयति ।

**********

# विवर्तवादः

**कु. दवे गौतमकुमारः**

शिक्षाशास्त्रिप्रथमवर्षम्

वेदस्सर्वप्राचीनग्रन्थ इति सर्वविदितोऽयं विषयोऽस्ति । वेदानामर्थबोधाय, सुरक्षणाय, उच्चारणविधिज्ञानाय च वेदाङ्गानि निर्मितानि । वेदवाङ्मयान्तर्गततत्वेन ब्राह्मणग्रन्थाः, आरण्यकाः, उपनिषदश्च सन्ति । ततः परं सूत्रसाहित्यं स्मृतिसाहित्यञ्च आरचितम् । प्रायः दर्शनशास्त्रान्तर्गतसूत्राणि सूत्रसाहित्ययुग एव रचितानि इति ज्ञायन्ते । महाभारतयुगे वेदान्त- मीमांसादर्शनयोः प्रादुर्भावस्सञ्जातः, ततः पूर्वञ्चान्यानि



ISSN: 2320-740X

दर्शनान्यासन्निति केचन वदन्ति । वस्तुतः दर्शनप्रतिपाद्या अनेके विषया वेदेषु, उपनिषत्सु, वेदाङ्गेषु, पुराणेषु, साहित्ये च समुपलभ्यन्ते । अतः दर्शनशास्त्राणां प्रादुर्भावसमयो यदि वा सन्दिहानस्तथापि दार्शनिकचिन्तनधारा, वैदिकचिन्तनधारा सर्वप्राचीना चेति वक्तुं शक्यते ।

भारतीयदर्शनशास्त्रवाङ्मयं द्विधा विभज्यते । आस्तिकदर्शनं नास्तिकदर्शनञ्चेति । अस्ति परलोक इति प्रत्यय यस्य सः आस्तिकः, नास्ति च परलोक इति प्रत्यय यस्य सः नास्तिकः । 'अस्ति नास्ति दिष्टं मतिः' (४/४/६०) इति पाणिनीयसूत्रेण 'ठक्'प्रत्यये एते द्वे पदे सिध्यतः । तत्र आस्तिकदर्शनानि वेदसमर्थकानि भवन्ति । तानीश्वरस्य सत्तामङ्गीकुर्वन्तीति हेतोः सेश्वरवादिनः इत्यपि कथ्यन्ते । साङ्ख्य- योग- न्याय- वैशेषिक- वेदान्त- मीमांसादर्शनान्यास्तिकदर्शनानि सन्ति । प्रसङ्गेऽस्मिन् साङ्ख्यस्य आस्तिकतां, नास्तिकताञ्चाधारीकृत्य वैमत्यं परिलक्ष्यते । केचन साङ्ख्यं सेश्वरदर्शनमास्तिकमिति कथयन्ति, अपरे च तन्निरीश्वरदर्शनं नास्तिकमिति विवदन्ते । नास्तिकाः वेदनिन्दकाः भवन्ति । तेषु चार्वाक-माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिक-जैनाश्च प्रमुखास्सन्ति । एते वेदप्रामाण्यं नाङ्गीकुर्वन्ति ।

भारतीयदर्शने कार्यकारणभावचिन्तनमेकः प्रधानः पक्षः। सर्वविदितमेतद्यत्कारणं विना कार्यस्योत्पत्तिर्न सम्भवति । परन्तु कार्यकारणयोर्मध्ये कः सम्बन्धोऽस्ति इत्ययं विषयः द्वन्द्वास्पदः । एतदाधारीकृत्य दर्शनशास्त्रे केचिद्वादाः प्रचलन्ति । यथोच्यते-

**आरम्भवादः कणभक्षपक्षः सङ्घातवादस्तु भदन्तपक्षः ।**
**साङ्ख्यादिपक्षः परिणामवादः वेदान्तपक्षस्तु विवर्तवादः ॥** इति (सर्वदर्शनसङ्ग्रहे)

अर्थात्- (क) न्यायवैशेषिकदर्शनयोः **आरम्भवादः** (अन्यस्मादन्यस्योत्पत्तिः) । उदाहरणं- तन्तुभ्यः पटस्योत्पत्तिः । (ख) बौद्धस्य **सङ्घातवादः** (क्षणभङ्गुरवादः) प्रथमं वस्तु द्वितीयमुत्पाद्य विनश्यति । उदाहरणार्थं - तन्तुमुत्पाद्य पटो विनश्यति । (ग) साङ्ख्यानां **परिणामवादः** (सत्कार्यवादः) कारणं कार्यरूपेण परिणमते इत्यर्थः । उदाहरणं- क्षीरं दधिरूपेण, मृत्कुम्भरूपेण तथा सुवर्णं कुण्डलरूपेण च । (घ) वेदान्तानां **विवर्त्तवादः** इति । सविस्तरमधस्तादालोच्यते ।

अद्वैतवेदान्तमतानुसारं **विवर्त्तवादः** स्वीक्रियते । अस्य वादस्य परिकल्पना परंब्रह्मणः विकारमय-अनित्य-दुःखरूपस्य जगतः कारणत्वसिध्यर्थं कृताऽस्ति । वादोऽयं यद्यपि सत्कार्यवादान्तर्गतोऽस्ति तथाऽपि साङ्ख्यानां परिणामवादाद्भिन्नः । वेदान्तिनामयमभिप्रायः यत्- यदि कारणस्य परिणतिरूपं कार्यमिति स्वीक्रियते तर्हि परंब्रह्म

अतीतम्, नित्यम्, सुखस्वरूपम्, निष्कलम्, अप्रमेयम्, अरूपम्, अव्यक्तम्, अनामयम्, परमज्योतीरूपं च भवितुं नार्हति । अतो वेदान्तसारे परिणामवादादस्य विवर्तवादस्य भेदप्रदर्शनपूर्वकमुक्तमस्ति । यत् -

**सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरतः ।**

**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृतः ॥** ( पृ.सं- ५५)

अर्थात्- कस्यापि वस्तुनः तत्त्वसहितपरिवर्तनं **विकार** इत्युच्यते । परन्तु तत्त्वराहित्येन मिथ्यारूपेण वा एकस्मिन् वस्तुनि अन्यस्य वस्तुन आभासो **विवर्तः** । यथा- खण्डनखण्डखाद्यग्रन्थे स्थाणौ पुरुषस्य प्रतीतिः, एवमेव रज्जौ सर्पस्य प्रतीतिः । अत्र रज्जुः अधिष्ठानं सर्पश्च आरोपः । आरोपाधिष्ठानयोर्मध्ये भिन्नता न विद्यते इति शङ्करमतम् । अतः कारणरूपरज्जोः कार्यरूपसर्पः विवर्तरूपमस्ति । एवम्प्रकारेण कार्यरूपं जगत् कारणरूपस्य ब्रह्मणः विवर्तरूपम् । एवं स्वीकृते ब्रह्मणोऽविकारित्वं सिध्यति । शङ्कराचार्यमतानुसारम् - केनापि मृद्भिन्नतायां स्वरूपं घटस्य सन्दर्शयितुं न शक्यते । अतो घटः कल्पित एव मोहान्मृदेव सत्यं परमार्थभूतम् ।

अस्मिन् जगति न कोऽपि जनो विद्यते यो मृद्भ्यो घटो भिन्न इति वक्तुं शक्नोति । अत्र मोहकारणादेव मृदि घटस्य ज्ञानं भवति । परमार्थतः मृदेव सत्यमस्ति । मृदो विवर्तरूपो घटो वर्तते । वेदान्तसारस्य **सुबोधिनीटीकायां** विवर्तस्य लक्षणमुक्तमस्ति यत्- **विवर्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः** । यथा- रज्जुः स्वस्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते इति । विद्यारण्यमुनिभिः पञ्चदश्यां प्रतिपाद्यते । यत् -

**अवस्थान्तरापत्तिरेकस्य परिणामिता ।**

**स्यात् क्षीरं दधि मृत्कुम्भः सुवर्णं कुण्डलं यथा ॥**

**अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत् ।** (पञ्चदशी- १३/८-९)

पुनः धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायामुक्तमस्ति । यत् -

**परिणामो नाम उपादानसमसत्ताककार्यापत्तिः ।**

**विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः ॥** (वेदान्तपरिभाषा- पृ.सं- १०७)

एवमुपर्युक्तपर्यालोचनया ज्ञायते यत्- परिणामवादस्य ज्ञानादनन्तरं **विवर्तवादस्य** ज्ञानं स्वत एव भवति । तदुक्तं सङ्क्षेपशारीरके यथा -

**विवर्त्तवादस्य हि पूर्वभूमिः वेदान्तवादे परिणामवादः ।**



ISSN: 2320-740X

**व्यवस्थितेऽस्मिन् परिणामवादे स्वयं समायाति विवर्त्तवादः ॥** ( सङ्ख्येपशारीरके- २/६९)

**कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन ।**

**अपारसच्चित्सुखसागरेऽस्मिन् लीनं परेब्रह्मणि यस्य चेतः ॥**

**अनुशीलितग्रन्थसूची -**


(१) सर्वदर्शनसङ्ग्रहः । ( पृ.सं- २३५)

(२) वेदान्तसारस्य सुबोधिनीटीका । ( पृ.सं- ५५)

(३) पञ्चदशी । ( १३/८-९)

(४) वेदान्तपरिभाषा। ( पृ.सं- १०७)

(५) सङ्क्षेपशारीरकम् । (२/६९)


***********

## भारतीयसंस्कृतेः महत्त्वम्।


**कु. श्वेता विष्णु भट्टः**

शास्त्रितृतीयवर्षम्


**'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' ।**

पुण्यभूमिरिति, कर्मभूमिरिति, धर्मभूमिरिति विश्रुता भरतभूमिरियं जगतीतले एव प्रतिष्ठिता सांस्कृतिकसम्पदा । एवं तर्हि अस्य संस्कृतेः महत्त्वं किम्? सहस्रशः वर्षेभ्यः अविच्छिन्नतया प्रवहन्ती इयं संस्कृतिः धर्म-अर्थ-काम-मोक्षाख्यैः चतुर्विध पुरुषार्थैः अन्विता । तत्राद्यः धर्मः एव मूलशिला अस्याः ।

स एव धर्मः वेदोपनिषत्पुराण- इतिहासद्वारा मानवान् बोधयति- 'वसुधैव कुटुम्बकम्' इति, समग्रं जगत् एव एकं नीडमिति हृदयवैशाल्यं प्रतिपाद्य महत्त्वमावहति । 'सङ्गच्छद्वं संवदध्वम्' इति उद्घोष्य- स्वस्ति पन्थानमनुसर्तुं मार्गं निर्दिशति अस्माकं संस्कृतिः । उपनिषदुद्घोषयति-'सत्यं वद । धर्मं चर । मातृदेवो भव । पितृदेवो भव । अचार्यदेवो भव । अतिथिदेवो भव' इति ।

येन जगत्येव सुप्रसिद्धा कुटुम्बपद्धतिः सदृढतया बद्धा महत्त्वं च आपन्नम् । 'मानवजीवनं न तु प्रदर्शनार्थम् अपि तु निदर्शनार्थम्' । आदर्शजीवननिर्वहणार्थं ये गुणाः आवश्यकाः तान्बोधयति गीताचार्यः-

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।**
**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥**
**इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥**
**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।**
**नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।**
**विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।**
**एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा ॥**

ये च गुणाः मानवं- माधवत्वं प्रति प्रेरयन्ति ।

अस्माकं भारतीयसंस्कृतिः त्यागमूला न च भोगमूला । 'त्यागेनैके अमृतत्वमानशुः' इति वेदवाक्यं त्यागेन अमृतत्वं बोधयति । कर्मसिद्धान्तं प्रतिपादयति गीता-**'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन'** –अतः सर्वदा कर्यरताः भवेयुः इति ।

संस्कृतिः मानवस्य सर्वतोमुखं विकासं प्रचोदयति । योगः देहारोग्यस्य चित्तस्वास्थ्यस्य च रक्षणं करोति । स्वस्थं मनः स्वस्थसमाजस्य निर्माणे स्थानमाप्नोति । एवं व्यष्टिः समष्टेः हितं रक्षति । येन **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्** ॥–इति ऋषिवाणी सार्थकतां भजते ।

यदा यदा वयं निष्क्रियाः, अलसाः भवेम तदा अस्मान् प्रेरयति-' क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ' इति वाक्यम् । इत्थं महत्त्वभूता अस्माकं भारतीयसंस्कृतिः । अत्र प्राप्तजन्मानः वयं धन्याः ।

**********


ISSN: 2320-740X

# वेदान्तपरिभाषादिशा ज्ञानगतप्रत्यक्षत्वप्रयोजकविचारः

**लोकनाथपण्डा**
शास्त्रितृतीयवर्षम्

प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम् । वेदान्तनये प्रमा वृत्तिप्रतिबिम्बितचैतन्यं वृत्त्यभिव्यक्तचैतन्यं वा, न तु शुद्धचैतन्यम्, अज्ञाननिवर्तकत्वेन तस्य प्रमात्वायोगात् । **'घटस्य मे प्रत्यक्षं ज्ञानम्'** इति व्यवहाराज्ज्ञाननिष्ठत्वेन ज्ञानगतप्रत्यक्षत्वं **'घटो मे प्रत्यक्षः'** इत्यनुभवाद्विषयनिष्ठत्वेन विषयगतप्रत्यक्षत्वमिति द्विविधं प्रत्यक्षम् । ज्ञानगतप्रत्यक्षत्वप्रयोजकस्य प्रस्तुतत्वाद्विषयगतप्रत्यक्षत्वप्रयोजकस्य प्रमात्रभेदस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकाधीनत्वादादौ ज्ञानगतप्रत्यक्षत्वं जिज्ञास्यम् । यथामति प्रतुष्टूषुः अस्मि ।

ज्ञानगतप्रत्यक्षत्वं नाम **प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः भवति ।**

**१. शङ्का** – ननु **'एकमेवाद्वितीयम्'** इति छान्दोग्यश्रुतेः चैतन्यस्य एकत्वं स्वीक्रियते । तस्मात्कथमुच्यते प्रमाणचैतन्यं विषयचैतन्यमिति ?

**समाधानम्** – स्वतोऽभिन्नस्याप्येकस्यैवात्मतत्त्वस्याविद्योपाधिवशेन घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नचैतन्यं प्रमातृचैतन्यमित्यादिरूपेण व्यवहारः वर्तते, अर्थात् व्यवहारकल्पितघटपटमठवृत्त्याद्यवच्छेदकभेदादेव घटाकाशपटाकाशमठाकाशादिवत् व्यवहारकल्पितं घटावच्छिन्नचैतन्यपटावच्छिन्नचैतन्यमठावच्छिन्नचैतन्यादिरूपेण भिन्नं भवति, अर्थात् वृत्त्यवच्छिन्नचैतन्य-घटावच्छिन्नचैतन्ययोर्वृत्तिघटांशयोरेव भेदः न तु चैतन्यांशे । फलतः अवच्छेद्यमेकमवच्छेदकमनेकम् ।

**२. शङ्का** – चैतन्ययोः कीदृशोऽभेदः प्रत्यक्षत्वप्रयोजकः ?

**समाधानम्** – यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाद्याकारेण परिणमते । सैव परिणामो वृत्तिरित्युच्यते । सत्येवम् अन्तःकरणवृत्तिस्वरूपप्रमाणस्य पटाद्यात्मकविषयस्य च चैतन्यावच्छेदकस्य सम्पन्नायाम् एकदेशस्थतया तत्प्रयुक्तः प्रमाणावच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरभेदः स्वीक्रियते । सैवाभेदः वृत्त्यात्मकज्ञाननिष्ठप्रत्यक्षत्वप्रयोजकोऽङ्गीक्रियते । अर्थात् ज्ञानगतप्रत्यक्षत्वप्रयोजकस्य चैतन्याभेदस्य प्रयोजकं प्रमाणचैतन्यविषयचैतन्यावच्छेदकयोरुपाध्योरेकदेशस्थत्वम् । तस्य च प्रयोजकमन्तःकरणवृत्तेर्विषयदेशगमनम् ।

**३. शङ्का** – अनुमित्यादिपरोक्षवृत्तिस्थले कथं न प्रमाणचैतन्यविषयचैतन्ययोरभेदः ?

**समाधानम्** – अनुमित्यादौ तु विषयेन्द्रियसम्बन्धाभावेन तज्जन्यस्यान्तःकरणसंयुक्तेन्द्रियविषयसम्बन्धस्याभावान्न वृत्तेर्विषयदेशगमनं तस्मात् प्रमाणचैतन्यविषयचैतन्यावच्छेदकयोरेकदेशस्थत्वाभावे न तयोरभेदः । तथा चानुमित्यादेर्न प्रत्यक्षत्वम् ।

**४. शङ्का** – ज्ञानगतप्रत्यक्षत्वप्रयोजको यः चैतन्याभेदः तत्प्रयोजकमवच्छेदकयोरेकदेशस्थत्वं कथम् ?

**समाधानम्** – अन्तःकरणसंयुक्तेन्द्रियविषयसन्निकर्षादन्तःकरणवृत्तेर्बहिर्निर्गमने सति **'अयं घटः'** इति प्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्रदेशे समवधानात् घटाद्यवच्छिन्नं तदाकारवृत्त्यवच्छिन्नञ्च चैतन्यमेकमेव ।

**५. शङ्का** – घटादेरधिकरणं स्वोपादानं, वृत्तेश्च घटादिस्तत् कथमुभयोरेकत्र समवधानं, भिन्नाधिकरणत्वात् ?

**समाधानम्** – घटाद्युपादानव्यापनाद् वृत्तेः समवधानोपपत्तेः । अतः एवोक्तं सिद्धान्तबिन्दौ –**'स च सावयवत्वात् परिणममानो देहाभ्यन्तरे घटादौ च सम्यग् व्याप्ये'**ति ।

**६. शङ्का** – चैतन्यविभाजकयोरुपाध्योर्वृत्तिविषययोर्भेदात्कथं तदवच्छिन्नचैतन्ययोरभेदः ?

**समाधानम्** – विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वादभेदः, यथा मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठाकाशाद्भिद्यतेऽत्रापि व्यधिकरणयोरेवाच्छेदकयोरवच्छेद्याभेदकत्वं तथा प्रकृतेऽपि ।

**७. शङ्का** – ननु प्रत्यक्षस्थलेऽपि वृत्तिघटयोर्भेदाद्भिन्नोपाधिकयोः प्रमाणप्रमेयचैतन्ययोर्भेदावश्यंभावादुक्तप्रयोजकं तत्राव्याप्तमिति ।

**समाधानम्** – उपाध्योरेकदेशस्थत्वमुपहिताभेदे प्रयोजकमिति नियमानुसारेणोपाधिः उपाधित्वेन उपहितचैतन्यस्याभेदाप्रयोजकः, **'अयं घटः'** इति प्रत्यक्षस्थले घटाकारवृत्तेः घटसम्बन्धे सति विषयचैतन्यस्य नाम घटावच्छिन्नचैतन्यस्य, प्रमाणचैतन्यस्य नाम घटसंयुक्तघटान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य चैकदेशस्थितोपाधिद्वयावच्छिन्नत्वेनोपहितचैतन्याऽभेदः भवति । तस्मात्कारणादभिव्यक्तं चैतन्यं घटप्रत्यक्षमित्युच्यते ।

**८. शङ्का** – ननु सुखदुःखादीनां चक्षुरादीन्द्रियाणां सन्निकर्षाभावेऽन्तःकरणस्य सुखाद्याकारवृत्तिरपि उत्पन्नं न भवति तदा सुखादिविषये कथं प्रत्यक्षत्वम् ?

**समाधानम्** – उपाध्योरेकदेशस्थत्वं कुत्रचित् स्वतः कुत्रचित् परतः । तत्रान्तरप्रत्यक्षे स्वतः, वृत्तिविषययोः सदैव एकस्मिन्देशे सम्बन्धात् । बाह्यप्रत्यक्षे तु परतः, तत्रोपाध्योः स्वतो भिन्नदेशत्वात् । सुखादीनामान्तरप्रत्यक्षत्वमस्ति घटादिवत् बाह्यविषयत्वं नास्ति, तदर्थं प्रत्यक्षप्रमायां चक्षुरादीन्द्रियाणां सन्निकर्षः नापेक्षितः ।



ISSN: 2320-740X

सुखादीनामन्तःकरणधर्मत्वेन तेषामन्तःकरणदेशस्थत्वम्, सुखाद्याकारा वृत्तिरपि तदान्तःकरणस्था इति सुखावच्छिन्नसुखाकारवृत्त्यवच्छिन्नचैतन्यस्योपाध्योरेकदेशस्थत्वेनोपहितचैतन्याभेदप्रयोजकमिति दिशा एकत्वात् सुखांशे प्रत्यक्षत्वम् ।

**९. शङ्का** – इदानीमवच्छेदकयोरेकदेशस्थत्वमात्रस्यावच्छेद्याभेदे प्रयोजकत्वे तादृशचैतन्यात्मकावच्छेदकावच्छेद्याभेदस्य प्रत्यक्षत्वप्रयोजके **'अहं सुखी आसम्'** इति प्रत्यक्षजन्ये अतीतसुखविषयके **'अहं सुखी आसम्'** इति स्मरणे प्रत्यक्षत्वापत्तिर्दुर्वारा । सुखतद्वृत्त्योरन्तःकरणात्मकैकदेशस्थत्वेन सुखावच्छिन्नचैतन्यतद्वृत्त्यवच्छिन्नचैतन्ययोरभेदात् ।

**समाधानम्** - अवच्छेदकयोरेकदेशस्थमात्रमवच्छेद्याभेदप्रयोजकं नापि तु एककालिकत्वसहितं तत् । एवं सति **'अहं सुखी आसम्'** इत्याकारकसुखस्मृतिकाले सुखस्यातीतत्वेन सुखतत्स्मृत्यात्मकवृत्त्योरेककालिकत्वाभावेन, तत्र नापत्तिः । अवच्छेदकयोरेककालिकत्वविशिष्टैकदेशत्वस्यैव तदवच्छेद्यभेदाप्रयोजकत्वात् ।

अतिव्याप्तिवारणायोपायान्तरम् - **वर्तमानविषयावच्छिन्नचैतन्याभिन्नान्तःकरणवृत्त्यवच्छिन्नचैतन्यमेव ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकम्** अर्थात् वृत्तिवर्तमानविषययोरेकदेशस्थत्वेनोपहिताभेदे प्रयोजकम् इति । एवञ्चाहं सुखी आसम् इत्याकारकसुखस्मृतिस्थले विषये सुखे वर्तमानत्वाभावेनान्तःकरणवृत्त्यात्मकप्रमाणावच्छिन्नचैतन्यस्य सुखावच्छिन्नचैतन्यभेदेऽपि वर्तमानसुखावच्छिन्नचैतन्याभेदाभावात्प्रत्यक्षत्वप्रयोजकाभावेनातिव्याप्त्यभावान्न दोषावकाशः इति ।

**१०. शङ्का** – एककालीनत्वे सति एकदेशस्थत्वस्य अवच्छेदकद्वयगतस्यावच्छेद्याभेदप्रयोजकत्वे प्रमाणावच्छिन्नचैतन्यनिष्ठवर्तमानविषयावच्छिन्नचैतन्याभेदस्य ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकत्वेऽपि च स्वीकृते स्वगतधर्माधर्मविषयकशाब्दबोधे प्रत्यक्षत्वापत्तिः, कथमिति चेत् कमपि धार्मिकं पुरुषं सम्बोध्य 'भवान् धार्मिकः' इति केनाप्युक्तम्, तेन च वाक्येन तस्य धार्मिकस्य **'अहं धार्मिकः'** इति वाक्यार्थबोधः जातः । तादृशे शाब्दबोधे प्राप्तफलकशुभाशुभादिहेतुके **'अहं धार्मिकः'** इत्यत्राव्याप्तिः । यतो हि वर्तमानधर्माधर्मावप्यन्तःकरणधर्मौ, तद्विषयिणी निरुक्तवृत्तिरप्यन्तःकरणस्यैव धर्मः इति विषयवृत्त्योरेककालीनत्वे सत्येकदेशस्थत्वं तत्र दोषः । एवञ्च तदवच्छिन्नचैतन्योरप्यभेदः दोषयुक्तः ।

**समाधानम्** – नात्र केवलं वर्तमानत्वं विषयविशेषणमपितु योग्यत्वमपि, तथा च प्रमाणावच्छिन्नचैतन्यस्य वर्तमानयोग्यविषयावच्छिन्नचैतन्याभेदः ज्ञानगतप्रत्यक्षत्वप्रयोजकमिति पर्यवसितार्थो भवति । धर्माधर्मयोस्तु कदाचिदपि प्रत्यक्षविषयत्वाभावेन योग्यत्वाभावात् योग्यवर्तमानविषयपदेन धर्माधर्मयोरग्रहणान्न तत्तद्वृत्तिषु प्रत्यक्षत्वापत्तिः । उक्ततत्तद्वृत्यात्मकप्रमाणावच्छिन्नचैतन्यस्य वर्तमानयोग्यविषयावच्छिन्नचैतन्याभेदाभावात् । या

या योग्यता सा सा किञ्चित् धर्मावच्छिन्ना इति नियमात् । योग्यतावच्छेदकमत्रानतीन्द्रियत्वं वेदितव्यम् ।

**११. शङ्का** – यथा कामसङ्कल्पविचिकित्सादेरन्तःकरणधर्मस्य योग्यत्वं तथा धर्माधर्मयोरपि योग्यत्वमुचितमेव, तत्र कथमयोग्यत्वम् ?

**समाधानम्** – धर्मादीनाम् अन्तःकरणस्य धर्मत्वेऽपि तत्र किञ्चिदयोग्यं किञ्चिद्योग्यमर्थात् सुखादीनां प्रत्यक्षज्ञानविषयत्वादुद्भूतत्वम्, तेन चोद्भूतत्वेन तेषां योग्यत्वम् । अन्येषाञ्च धर्मादीनामप्रत्यक्षत्वादयोग्यत्वमिति भावः । अत्र फलबलकल्प्यः स्वभावविशेष एव शरणम् । अन्यथा न्यायमतेऽप्यात्मधर्मत्वाविशेषेऽपि सुखादिवद्धर्मादेः प्रत्यक्षत्वापत्तिर्दुवारा ।

**१२. शङ्का** – यदा यज्ञदत्तः सुखी, तदा यदि देवदत्तः तं सम्बोध्य **'त्वं सुखी'** ति वाक्यं ब्रूते, तदा तादृशबाक्यजन्ये यज्ञदत्तीये **'अहं सुखी'** ति शाब्दबोधे कथं न प्रत्यक्षत्वापत्तिः ? तदानीं सुखात्मकविषयस्य वर्तमानत्वेन सुखात्मकवर्तमानविषयतद्वृत्त्योः, अन्तःकरणात्मैकदेशस्थत्वस्यावच्छेद्यचैतन्याभेदप्रयोजकस्याक्षुण्णत्वात् ।

**समाधानम्** – अस्माकं मतेऽपि वाक्यजन्यज्ञानमपरोक्षमेव शब्दादुत्पद्यमानस्यानावृतार्थविषयकज्ञानस्य प्रत्यक्षत्वाभ्युपगमेन लक्ष्यत्वात्तत्र प्रत्यक्षत्वापादनस्येष्टापादनतयाऽदोषत्वात् ।

**१३. शङ्का** – परोक्षज्ञानजननस्वभावस्य शब्दस्य कथमपरोक्षज्ञानजनकत्वं प्रमाणाभावात् ।

**समाधानम्** – **'दशमस्त्वमसी'**ति आप्तवाक्याज्जायमानं दशमत्वज्ञानमपरोक्षमेव, अन्यथा अपरोक्षस्य भ्रमस्यानिवृत्तेः अपरोक्षज्ञानमेव भ्रमनिवर्तकं भवति । तथा पञ्चदशीकाराः –

**'न मृतो दशमोऽस्तीति श्रुत्वाप्तवचनं तदा ।**
**परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥**
**त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः ।**
**अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति ॥'**

**१४. शङ्का** – वाक्यं यद्यपरोक्षज्ञानं स्यात्, तदा शाब्दबोधोच्छेदः स्यात्, समाने विषये परोक्षज्ञानसामग्र्यपेक्षया प्रत्यक्षज्ञानसामग्री बलवत्त्वात् ।

**समाधानम्** – प्रमातृभिन्नार्थकस्य शब्दस्योवापरोक्षज्ञानजनकत्वमिति नियमः, नान्यस्य । अत एव सन्निकृष्टविषये प्रमातृभिन्नार्थविषयः इत्यर्थः, न तु इन्द्रियसन्निकृष्टे विषये इत्यवगन्तव्यम् । तथैव प्रमाणान्तरस्यापि प्रमातृभिन्नार्थविषयेऽपरोक्षज्ञानजनकत्वमस्तीत्यभिप्रायः ।

**१५. शङ्का** – अपरोक्षविषयकवाक्यात् यज्ज्ञानं भवति तदपरोक्षमिति चेत् पर्वतो वह्निमानित्यनुमितिस्थलेऽपि


ISSN: 2320-740X

प्रत्यक्षत्वापत्तिः भवतीति चेत् अनुमित्यात्मकज्ञाने प्रत्यक्षत्वप्राप्तिः पर्वतांशे वा वह्न्यंशे वा ?

**समाधानम्** – आदौ प्रमाणचैतन्यस्य विषयचैतन्याभेदः इत्युक्तम् । इत्यनेनान्तःकरणवृत्त्यवच्छिन्नचैतन्यविषयचैतन्ययोरभेदः ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकः इति पूर्वमेव प्रतिपादितम् । तादृशस्य चैतन्याभेदरूपस्य प्रत्यक्षत्वप्रयोजकस्य विद्यमानतया **'पर्वतो वह्निमान्'** इत्यनुमितेः पर्वतांशेऽपरोक्षत्वमेव परन्तु विषयेन्द्रियसन्निकर्षाभावे इन्द्रियद्वारा नान्तःकरणवृत्तिनिर्गमनसम्भवः, अतः पर्वतो वह्निमान् इत्यनुमितिस्थले वह्नेर्व्यवहिततया इन्द्रियसन्निकर्षाभावात् नान्तःकरणस्य वह्न्याकाराकारितासम्भवः तथा च वह्नितद्वृत्त्योरवच्छेदकयोरेकदेशस्थत्वाभावेन, प्रयोजकाभावेन न वह्न्यवच्छिन्नचैतन्यतद्वृत्त्यवच्छिन्नचैतन्ययोरभेदः, तस्माद्वह्न्यंशे परोक्षम् ।

**१६. शङ्का** – पर्वतो वह्निमानित्यादिज्ञानस्यानुमितित्वं सर्वलोकसिद्धम् । न च लोकसिद्धार्थस्य लक्षणेनान्यथात्वं युक्तम् । तथा च श्लोकवार्तिकम् - **'सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः । न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम् ॥'** इति ।

**समाधानम्** – सर्वेषामत्रानुभवः एव प्रमाणं न तु अनुव्यवसायः सिद्धान्ते तदनभ्युपगमात्, विषयज्ञानतज्ज्ञानयोर्यौगपद्यनियमात्, ज्ञानादीनां ज्ञातैकसत्त्वात् । न हि ज्ञानमुत्पद्यमानं साक्षिणाऽगृहीतं भवति । तथा च योगसूत्रम् – 'सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वादि'ति । द्रष्टा हि विषयस्वरूपं यदा गृह्णाति, तदैव ज्ञानस्वरूपमपि । तत्र विषयो यादृशाकारस्तादृशाकारमेव तं गृह्णाति । पर्वतांशे ज्ञानं यद्यनुमितिरूपं स्यात्, तदा तदनुमितिरूपमेव गृह्णीयात् पर्वतमनुमिनोमीति, न च तथा तद्गृह्णाति । अत एव सर्वेषां ज्ञानग्रहणाकारः पर्वतं पश्यामीति । तस्मात् पर्वतांशे ज्ञानस्य प्रत्यक्षत्वम्, अतो न लोकविरुद्धम् ।

नैयायिकानां मते नैतत् सम्भवति यतः तेषां मते व्यवसायानन्तरमनुव्यवसायो भवति । तत्र विषयज्ञानं व्यवसायः इत्युच्यते । ज्ञानस्य ज्ञानं तु अनुव्यवसायः इत्युच्यते । प्रत्यक्षे ज्ञानविषयकज्ञानस्याकारो घटं पश्यामीति, अर्थात् घटविषयकज्ञानवानहमित्याकारः । अनुमितौ तु वह्निमनुमिनोमीति, अर्थात् वह्निविषयकानुमितिज्ञानवानहमित्याकारः । तत्र पर्वतांशे ज्ञानं यदि अनुमितिरूपं स्यात्, तदा तदनुमितिरूपमेव गृह्णीयात् ज्ञानग्रहणाकारश्च पर्वतमनुमिनोमीति स्यात् । न च तथा नैयायिकानामपि । अतः पर्वतांशे ज्ञानं प्रत्यक्षमेवाभ्युपगन्तव्यम्, नाऽप्रत्यक्षम् ।

**१७. शङ्का** – नन्वेवमनुमितौ द्विरूपं चेज्ज्ञानं, सकलानुमितिस्थले पक्षांशे विधेयांशमात्रेऽनुमितित्वाभिमतं वा ? एवं सति **'वह्निः एतत्पर्वतनिष्ठजनकतासम्बन्धेन एतद्धूमविशिष्टत्वात्'** एवं **'पृथ्वीपरमाणवः गन्धवन्तः पृथ्वीत्वात् घटवत्'** इत्यादौ असन्निकृष्टवह्निपरमाण्वंशेऽपि प्रत्यक्षत्वापत्तिः ।

**समाधानम्** – तत्रानुमानेऽप्रत्यक्षपक्षकानुमितौ पक्षे साध्ये च ज्ञानं परोक्षमवगन्तव्यम् । अर्थात् यत्र प्रत्यक्षत्वे प्रयोजकसम्भवः तत्र प्रत्यक्षत्वमेव परन्तु तस्मिननुमाने एवं न भवति प्रत्यक्षत्वप्रयोजकस्य योग्यवर्तमानविषयावच्छिन्नचैतन्याभेदस्यासत्त्वात्, वह्निपरमाणोरयोग्यत्वात् ।

**१८. शङ्का** – नन्वेवमपि प्रयोजकमिदं सुरभि चन्दनमित्यादौ चाक्षुषप्रत्यक्षेऽव्याप्तम् । तत्र चन्दनांशप्रत्यक्षे योग्यवर्तमानविषयावच्छिन्नचैतन्याभेदसत्वेऽपि सौरभांशप्रत्यक्षे तदभावात्, सौरभस्य चक्षुरिन्द्रियायोग्यत्वात् ।

**समाधानम्** – इष्टापत्तिः, अत्रापि चनदनखण्डांशेऽपरोक्षम्, चैतन्योपाध्योश्चन्दनतदाकारवृत्त्योरेकदेशस्थत्वेन वृत्त्यवच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदात् । सौरभांशे तु परोक्षं सौरभस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितलक्षणस्य नाम तत्तदिन्द्रियवृत्त्यवच्छिन्नचैतन्याभिन्नयोग्यवर्तमानविषयावच्छिन्नचैतन्यत्व-रूपपस्याभावात् । तत्र हेतुः इन्द्रियाऽसन्निकृष्टतया इति ।

यद्यपि नैयायिकैः सौरभांशे ज्ञानस्यापरोक्षत्वमभ्युपगम्यते, तैर्ज्ञानलक्षणसन्निकर्षाभ्युपगमात्, तस्य च ज्ञानलक्षणसन्निकर्षस्य स्वसंयुक्तमनस्संयुक्तात्मसमवेतज्ञानविषयत्वरूपस्य तत्र सत्त्वात्, तथापि सिद्धान्ते तदनङ्गीकारात् सौरभेणेन्द्रियसन्निकर्षाभावात् तदंशे ज्ञानं न प्रत्यक्षम्, किन्तु स्मृतिरनुमितिर्वा । तत्राघ्रातपूर्वे तस्मिन् चन्दनखण्डे सौरभज्ञानं स्मृतिः, अनाघ्रातपूर्वे त्वनुमितिः । तत्प्रयोगश्च – चन्दनमिदं सुरभि चन्दनखण्डत्वात् सम्मतचन्दनखण्डवत् इति । तथा च परोक्षे सौरभज्ञाने लक्षणागमनं न दोषायेति भावः ।

**१९. शङ्का** – असन्निकृष्टपक्षकानुमितिस्थले पक्षस्य प्रत्यक्षत्वे यथा असन्निकृष्टत्वं बाधकम्, तथा इदं चन्दनं सुरभि चन्दनखण्डत्वात् चन्दनखण्डान्तरवत् इति सन्निकृष्टपक्षकानुमितिस्थले चन्दनखण्डांऽशेऽपरोक्षत्वं सौरभांशे परोक्षत्वमिति परोक्षत्वाऽपरोक्षत्वयोरभ्युपगमे प्रसिद्धजातिबाधकसाङ्कर्यप्रसङ्गो बाधको भवेत् । तथा चोक्तं किरणावल्यां – **'व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिः रससम्बन्धो जातिबाधकसंग्रहः ॥'** इति सङ्करश्च परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः । यथा भूतत्वमाकाशे मूर्तत्वं मनसि विद्यते, अनयोः परस्परात्यन्ताभावसमानाधिकरणभूतत्वमूर्तत्वधर्मयोरेकत्र पृथिव्याप्तेजोवायुषु समावेशत्वात् सङ्करदोषः, तस्मान्न जातिः । तथैवापरोक्षत्वमयं घटः इति ज्ञाने परोक्षत्वं धर्मादौ विद्यते, अनयोः परस्परात्यन्ताभावसमानाधिकरणपरोक्षत्वापरोक्षत्वयोर्धर्मयोरेकत्र **'सुरभि चन्दनम्'** इत्यत्र समावेशत्वात् सङ्करदोषः, तस्मान्न जातिसिद्धिः ।

**समाधानम्** – इष्टत्वात् । अत्र घटत्वादीनां नैयायिकी परिभाषा जातिरिति । नीलघटत्वादीनामुपाधिरिति । तथा च जातित्वमुपाधित्वञ्च तत्ततसंप्रदायानां परिभाषामात्रम् । तर्हि जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरतयाप्रामाणिकत्वाज्जातिः किमपि नास्त्येव ।


ISSN: 2320-740X

**२०. शङ्का** – यद्यदिन्द्रियग्राह्यं तन्निष्ठा जातिस्तदभावश्च तदिन्द्रियग्राह्यः इति न्यायेन घटोऽयमित्यादिप्रत्यक्षैः घटादीनामेव घटत्वजातेरपि ग्रहणात् प्रत्यक्षं तत्र प्रमाणम् ।

**समाधानम्** –परस्परं भिद्यमानेषु घटेषु घटोऽयं घटोऽयमित्येकाकारा प्रतीतिरुदेति । साऽनुगतप्रतीतिरिति अभिधीयते । तस्याश्च प्रतीतेर्विषयो न घटः, घटानां परस्परभेदाद् घटपटादिज्ञानवत् तज्ज्ञानानामप्याकारभेदापातात्, विषयभेदस्यैव ज्ञानाकाराभेदकत्वात् । न चात्राकारभेदस्तमात्तत्प्रतीतेर्विषयः कश्चिद् घटगतानुगतो धर्मो वक्तव्यः । योऽयं सकलघटानुगतो धर्मः तद् घटत्वम् । तेन घटोऽयमित्याद्यनुगतप्रतीतेर्विषयतया घटत्वसिद्धावपि न तु तस्य जातित्वसिद्धिः तदन्तरेणापि तत्प्रतीतेर्निवाहात् ।

**२१. शङ्का** – ननु तथापि न तत्प्रमाणगोचरत्वाभावकूटात्मकसकलप्रमाणागोचरत्वसिद्धिः, घटत्वादौ जातित्वस्यानुमानप्रमाणगम्यत्वात् । तथा **'घटत्वादिकं जातिः नित्यत्वे सति अनेकसमवेतत्वात् सत्तावत्'** तर्हि तत्कथं घटत्वादेः जातित्वे न प्रमाणम्, अनुगतप्रतीतेरमानत्वेऽप्यनुमानस्य मानत्वात् ।

**समाधानम्** – तथा चास्मिन्प्रयोगे जातित्वं साध्यम्, तच्च नित्यानेकसमवेतत्वम् । न च तत्क्वचित्प्रसिद्धम्, सिद्धान्ते कुत्रापि नित्यानेकसमवेतत्वरूपस्य जातित्वस्यानभ्युपगमात्, नित्यत्वाभावात्, समवायाभावाच्च । तस्मात् साध्यस्य जातित्वस्याप्रसिद्ध्या हेतौ साध्यव्याप्तिग्रहाभावेन च तस्य व्याप्यत्वासिद्धत्वेन तत्साध्यकानुमितिर्न भवतीति ।

**२२. शङ्का** – ननु समवायो नासिद्धः, लक्षणप्रमाणसद्भावात्, तत्र लक्षणं तावत् – नित्यसम्बन्धत्वम्, प्रमाणन्तु – इह कपाले घट इति प्रत्यक्षम्, विशिष्टबुद्धिर्विशिष्यविशेषणसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानञ्च ।

**समाधानम्** – न, लक्षणायोगात्, नित्यस्वरूपसम्बन्धे नित्यसंयोगे च तल्लक्षणस्यातिव्याप्तत्वात् । वेदान्तिनां मते न समवायसिद्धिः । तथा च घटादौ अनेकसमवेतत्वं नास्ति प्रागेवोक्तम् । अतोऽन्यदार्त्तमित्यादिश्रुत्या सर्वस्यापि प्रपञ्चस्यानित्यत्वमवगम्यते । तथा च प्राग् घटादौ पक्षे नित्यानेकसमवेतत्वाभावस्य प्रमाणेनैवावगमात्तदनुमानं तत्प्रमाणबाधितमिति हेतोर्बाधितत्वान्न तेन हेतुना साध्यसिद्धिरिति भावः ।

**२३. शङ्का** – ननु यदि घटत्वादिकं न जातिः किं तर्हि ?

**समाधानम्** – चित्तादात्म्यमिति । घटावच्छिन्नचित्तादात्म्यस्य सर्वघटेष्वनुगमात्तेनैवानुगतप्रतीतिनिर्वाहे न तदतिरिक्ता जातिः कल्पनीया । तस्यैव तु घटावच्छिन्नचित्तादात्म्यस्य लोके घटत्वेन व्यवहारः । एवं पटत्वादावपि बोध्यम् ।

**२४. शङ्का** – नन्वस्तु जातित्वपरिभाषायाः असिद्धिः, उपाधित्वपरिभाषायाः कुतः अप्रामाणिकत्वम् ?

**समाधानम्** – जातिभिन्नानुगतधर्मत्वमुपाधित्वमित्येवोपाधित्वपरिभाषा कार्या । सा च जातित्वसिद्ध्यधीना, अतः जातित्वासिद्धिमुपदर्श्य तदपि निरसनीयम् । नो चेत् घटत्वस्योपाधित्वमपि प्रत्यक्षानुमानयोरन्यथासिद्धत्वप्रदर्शनद्वारा निरसनीयम् अर्थात् नीलघटत्वादेरुपाधित्वपरिभाषा न प्रामाणिकी नीलोऽयं घटः इत्यादिप्रत्यक्षस्य नीलघटत्वसद्भावे मान्यता तस्योऽपाधित्वेऽमानत्वात् । उपाधित्वरूपसाध्याप्रसिद्धौ तत्साधकस्य नीलघटत्वादिकमुपाधिः जातिभिन्नसामान्यधर्मत्वादिवदित्यनुमानस्यानवकाशात्, समवायाद्यसिद्ध्योपाधित्वासिद्धेः च एवं निरसनीयम् ।

**२५. शङ्का** – ननु तिष्ठतु जात्युपाधिकथा । पर्वतो वह्निमानित्यत्र विरुद्धयोः परोक्षत्वापरोक्षत्वयोः कथमेकत्र सम्भवः ?

**समाधानम्** – अन्तःकरणनिर्गमानिर्गमाभ्यां पर्वताकारायाः वह्न्यकारायाश्च वृत्तेर्भेदावश्यकः, किन्तु तदुभयावच्छिन्नचैतन्यमेकमेव । तथा च एकस्मिन्नेव वृक्षे यथा शाखावच्छेदेन कपिसंयोगः मूलावच्छेदेन तु कपिसंयोगाभावः, तथा एकत्र चैतन्ये वृत्त्यात्मकावच्छेदकभेदेन परोक्षत्वापरोक्षत्योरव्याप्यवृत्तितया न कापि बाधा । अर्थात् तत्र वह्निविशिष्टपर्वताद्याकाराया अन्तःकरणवृत्तेर्पर्वताद्यांशस्य विषयसम्बन्धाद्वृत्त्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चाभेदात् तदंशावच्छेदे चैतन्येऽपरोक्षत्वम् । वह्न्याद्यंशस्य विषयासम्बन्धाद्विषयावच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च भेदात्तदंशावच्छेदे चैतन्ये परोक्षत्वम् । **'अत एव पर्वतो वह्निमानिति ज्ञानम्'** इत्यदिस्थले ज्ञानपदेन वृत्तिद्वयावच्छिन्नमेकं चैतन्यं ग्राह्यम्, ततो नासंङ्गतिः ।

ज्ञप्तिगतप्रत्यक्षत्वप्रयोजकोपसंहारः - अधुना योग्यत्ववर्तमानत्वादीनां निवेशे परोक्षत्वापरोक्षत्वयोरवच्छेदक-भेदादेवैकज्ञानवृत्तिस्वीकारे च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तद्वृत्त्यवच्छिन्नज्ञानस्य तत्तदेव प्रत्यक्षत्वम् । इदमत्रावधातव्यम् – ज्ञप्तिगतप्रत्यक्षत्वमित्यत्र ज्ञप्तिपदेन चैतन्यस्य ग्रहणे स्वावच्छेदकवृत्तिविषयावच्छिन्नचैतन्याभिन्नत्वं प्रत्यक्षत्वमिति लक्षणं बोध्यम् । तथा हि अयं घटः इति प्रत्यक्षस्थले स्वम् अयं घटः इति वृत्त्यात्मकज्ञानावच्छिन्नचैतन्यं तदवच्छेदिका वृत्तिः अयं घटः इति वृत्तिः, तद्विषयो घटः, तादृशघटावच्छिन्नचैतन्याभिन्नत्वम् अयं घटः इति वृत्त्यवच्छिन्नचैतन्यात्मकज्ञप्तेरिति लक्षणसमन्वयः ।

**आधारग्रन्थाः-----**

१. वेदान्तपरिभाषा – श्रीयुक्तानन्तकृष्णशास्त्रिणा सम्पादिता
२. वेदान्तपरिभाषायाः भगवतिव्याख्या
३. वेदान्तपरिभाषायाः परिभाषासंग्रहव्याख्या


ISSN: 2320-740X

# व्यायामः

**कु. महेशबाघ्वारः**
शास्त्रितृतीयवर्षम्

एतत् कथ्यते 'शरीरमाद्यं खलु धर्मसाधनम्' । स्वस्थशरीरेण एव धर्माचरणं कर्तुं प्रभवति नरः । यः मनुष्यः संसारे उत्तमानि कर्माणि कर्तुमिच्छति तेन सर्वप्रथमं शारीरिकं बलमुपार्जनीयम् । स्वस्थशरीरं कस्मात् प्राप्येत । अस्य स्वास्थ्यस्य अनेकानि साधनानि सन्ति । तेषु 'व्यायामः' इति महत्त्वपूर्णं साधनमस्ति । यतो निर्बलः जनः स्वादु भोजनं पायसादिकं पाचयितुं शक्तः इति कृत्वा सांसारिकसुखवञ्चितः । अन्यश्च निर्बलः रुग्णश्च जनः किमपि कर्तुं न क्षमः । निर्बलः मनुष्यः लोके पदे पदे पराभवति ।

एतत् बलं व्यायामेन विना कदापि प्राप्तुं न शक्यम् । व्यायामेन मनुष्यस्य जठराग्निः वर्धते भुक्तं च पच्यते। भुक्तस्य रसः आवश्यकतानुसारं सर्वासु नाडीषु गच्छति । एवं सकलं शरीरं पुष्टं सुघटितञ्च भवति । व्यायामशीलस्य जनस्य इन्द्रियाणि वश्यानि भवन्ति । मनसि च कार्याणि सम्पादयितुम् अमितः उत्साहः जायते । अतो विपरीतं व्यायामविहीनस्य शरीरं व्याधिमन्दिरम् भवति । स तु यथा तथा श्वसिति न तु जीवति।

व्यायामाः खलु अनेकविधाः । तेषु सर्वेषु व्यायामेषु क्रीडारूपी व्यायामः सर्वश्रेष्ठः । क्रीडाव्यायामेन मनोरञ्जनमपि भवति । आसनरूपी व्यायामोऽपि शोभनः । आसनेषु प्रत्येकम् अङ्गस्य पुष्टिः भवति । व्यायामः शरीरस्य शक्तिं वीक्ष्य कर्तव्यः । अति व्यायामात् लाभस्य स्थाने हानिः भवति । अतः जीवनयात्रां सफलतापूर्वकं सम्पादयितुं व्यायामः अवश्यं कार्यः ।

"The body is your temple. Yoga is the perfect opportunity to be curious about who you are. Yoga is a light, which once lit will never dim. Yoga is the golden key that unlocks the door to peace, tranquility, and joy. The quality of our breath expresses our inner feelings."

स्वस्थशरीरः मानवः कार्यकुशलः भवति । रुग्णः मानवः किमपि कार्यं कर्तुम् असमर्थः। धर्म-अर्थ-काम-मोक्षाख्याः खलु चत्वाराः पुरुषार्थाः । तेषां प्राप्त्यर्थं शरीरस्वास्थ्यमावश्यकम् । स्वस्थशरीरे स्वस्थ आत्मा निवसति इति मन्यते । आरोग्यशालिनां जीवनमानन्ददायकं भवति । ये जनाः दीर्घजीवनं, स्वस्थजीवनं वाञ्छन्ति तैः व्यायामः योगः अवश्यमेव करणीयः ।

**********

# व्यधिकरणग्रन्थोक्तदिशा प्रथमस्वलक्षणे यावत्पदसार्थक्यविचारः

**कु. शशाङ्कभट्टः**
शास्त्रितृतीयवर्षम्

नैयायिकैः द्वितीयप्रमाणत्वेनाङ्गीकृतं प्रमाणमनुमानम् । अनुमानञ्च व्याप्तिज्ञानं, तच्च अनुमितौ कारणम् । तत्र 'अनुमितिहेतुभूतव्याप्तिज्ञाने का व्याप्तिः'[1] इत्याशङ्क्य 'न तावदव्यभिचरितत्वं, तद्धि न साध्याभाववदवृत्तित्वम्'[2] इति तत्र केषाञ्चित्समाधानम् । इदं वाच्यं ज्ञेयत्वादित्यादौ केवलान्वयिवाच्यत्वसाध्यकसद्धेतौ साध्याभावाप्रसिद्ध्या 'केवलान्वयिन्यभावादि'ति दूषितं पूर्वतने व्याप्तिपञ्चकग्रन्थे । तदुपरि **सौन्दलोपाध्यायाः** इत्थमाक्षिपन्ति – इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावस्याप्रसिद्धत्वेऽपि समवायित्वरूपव्यधिकरण-धर्मावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावः प्रसिध्यत्येव, तस्य च केवलान्वयित्वादतः न साध्याभावाप्रसिद्धिनिबन्धना व्याप्तिरिति। एवञ्च समवायितया वाच्यत्वाभाववति घटादौ ज्ञेयत्वस्य सत्त्वात् साध्याभाववद्वृत्तित्वादव्याप्तिरिति तदनु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावमङ्गीकृत्य कैश्चित् कानिचन पारिभाषिकलक्षणानि प्रणीतानि, दीधितिकारैरपि स्वयं लक्षणद्वयं प्रणीतम् ।

तत्र प्रथमस्वलक्षणं यथा – यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वमिति । वह्निमान् धूमादित्यत्र यत्समानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावान्तर्गतः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः घटत्वेन वह्न्यभावः, पटत्वेन वह्न्यभावः इत्यादिः, न तु वह्न्यभावः तस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वेऽपि यत्समानाधिकरणत्वं नास्ति, अतः घटत्वेन वह्न्यभावः एव ग्राह्यः तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण पर्वतान्तर्भाविण प्रतियोगिसामानाधिकरण्यमस्तीति समन्वयः। धूमवान् वह्नेः इत्यत्रासद्धेतौ यत्समानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकः यावदन्तर्गतः अभावः धूमाभावोऽपि, तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण प्रतियोगिसामानाधिकरण्यं नास्तीति असद्धेतौ नातिव्याप्तिः। एवं लक्षणे

[1] अनुमानतत्त्वचिन्तामणिः(गदाधरपञ्चलक्षणी)

[2] अनुमानतत्त्वचिन्तामणिः(गदाधरपञ्चलक्षणी)


ISSN: 2320-740X

अभावे यत्समानाधिकरणत्वदलाभावे 'अयमात्मा ज्ञानादि' त्यत्र साध्यतावच्छेदकावच्छिन्न-व्यापकतावच्छेदकप्रतियोगिताकः यावदन्तर्गतः अभावः आत्मत्वाभावोऽपि तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविणात्मान्तर्भाविण प्रतियोगिसामानाधिकरण्यं नास्तीति अव्याप्तिः, तद्वारणाय अभावे यत्समानाधिकरणत्वं निवेश्यते चेत् आत्मत्वाभावस्य आत्मत्वरूपहेतुसामानाधिकरण्यं नास्तीति अभावपदेन आत्मत्वाभावः गृहीतुं न शक्यते इति नाव्याप्तिः।

लक्षणे यावत्पदासतत्त्वे लक्षणस्य व्यभिचारिमात्रेऽतिव्याप्तिः । तद्यथा धूमवान् वह्नेः इत्यादौ हेतुसमानाधिकरणीभूतस्य समवायित्वेन वाच्यत्वाभावस्य केवलान्वयित्वेन स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण प्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिः । तद्वारणायाभावे यावत्त्वनिवेशे तु यत्समानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकः यावदभावान्तर्गतः धूमाभावोऽपि, तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण पर्वतान्तर्भाविण प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः । ननु यावत्पदानुपादाने धूमवान् वह्नेः इत्यत्रातिव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-प्रतियोगिताकत्वस्थाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वेनैवाभावो विशेषणीयः । इत्थञ्च धूमवान् वह्नेः इत्यादौ वाच्यत्वाभावस्य धूमत्वव्याप्यप्रतियोगिताकत्वाभावेन वाच्यत्वाभावमादाय नातिव्याप्तिसम्भव इति। एवं सति हेतुसामानाधिकरण्यदलनिवेशनमफलं स्यात्, यतो हि अयमात्मा ज्ञानादित्यादौ घटत्वादिना आत्मत्वाभावस्य आत्मत्वव्याप्यप्रतियोगिताकत्वेन तमादायैव तद्वारणसम्भवे यत्समानाधिकरणत्वदलवैयर्थ्यापत्तिः । इष्टापत्तिः । तथा च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वस्थाने साध्यतावच्छेदकव्याप्य-प्रतियोगिताकत्वेनैवाभावो निवेशनीय इति चेदुच्यते अभावे साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशेऽपि भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्र भूतत्वमूर्तत्वोभयाभावस्य साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वात्तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण मनोऽन्तर्भाविण सामानाधिकरण्यसत्वादतिव्याप्तिः। तद्वारणाय यावत्पदनिवेशे च वह्निमान् धूमादित्यादौ साध्यतावच्छेदकव्याप्यप्रतियोगिताक-यावदभावान्तर्गतमहानसीयवह्न्यभावमादाय तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भाविण प्रतियोगिसामानाधिकरण्यविरहात् अव्याप्तिरिति तद्वारणाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वस्थाने यथोक्त-साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमेव निवेश्यम् । एवं सति वह्निमान् धूमादित्यत्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावपदेन महानसीयवह्न्यभावग्रहणासम्भवात्[1] न तमादायाव्याप्तिप्रसङ्गः इति । एवमुक्तस्थले साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-

[1] महानसीयवह्न्यभावीयप्रतियोगितावतः महानसीयवह्नेः वह्नित्वावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविरहात्।

ISSN: 2320-740X

प्रतियोगिताकयावदभावान्तर्गतः अभावः भूतत्वाभावमनोऽन्यत्वाभावादिरपि, तस्य च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण पृथिव्यादिचतुष्टयान्तर्भावेण प्रतियोगिसामानाधिकरण्यं नास्तीति नातिव्याप्तिः । तथा च यावत्पदानुपादाने समवायितया वाच्यत्वाभावमादाय व्यभिचारिसामान्ये एव अतिव्याप्तिः, एवं क्वचित् भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्र साध्याभावमादायापि अतिव्याप्तिः इति तद्वारणाय अभावे यावत्त्वविशेषणं सार्थकमेवेति भावः ।

**********

# न्यायभाष्ये दुःखजन्मप्रवृत्तीत्यादिसूत्रविचारः

**कु. सी. हेच्. दुर्गा**

शास्त्रितृतीयवर्षम्

जगति जीवीयचेष्टानां प्रयोजनद्वयं भवति – सुखप्राप्तिः, दुःखनिवृत्तिः । तदर्थमेव सर्वे जीवाः प्रयतन्ते । सुखप्राप्त्यर्थं दुःखनिवृत्त्यर्थञ्च अनेके उपायाः – मार्गाः भवन्ति। यथा लोके भोजनेन तृप्तिसुखं लभ्यते, क्षुत्पीडारूपदुःखं निवर्तते । एते सर्वे भवन्ति लौकिकोपायाः तात्कालिकसुखप्राप्त्यर्थं तात्कालिकदुःखनिवृत्त्यर्थञ्च। आत्यन्तिकं सुखम् आत्यन्तिकी दुःखनिवृत्तिश्च लौकिकोपायेन न सिद्ध्यति । तत्र उपायः भवति आत्मतत्त्वज्ञानम् । आत्यन्तिकदुःखनिवृत्तिरेव निःश्रेयसमिति उच्यते । तदेव मोक्षः । आत्मतत्त्वज्ञानं नाम आत्मनः यथार्थस्वरूपस्य साक्षात्कारः। आत्मतत्त्वज्ञानस्य श्रवण-मनन-निदिध्यासनानि त्रीणि साधनानि । तत्र मननोपयोगितया पदार्थतत्त्वं ज्ञातव्यम् इत्यतः अस्मिन् शास्त्रे पदार्थतत्त्वम् आदौ निरूपितम् । आत्मतत्त्वज्ञानं प्राप्तवतः मोक्षप्राप्तौ कश्चन क्रमः भवति । सः कः इति न्यायसूत्रेषु प्रथमाध्याये प्रथमाह्निके द्वितीयसूत्रे निरूपितः । सूत्रं भवति -

**दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः** इति **।**

दुःखं च जन्म च प्रवृत्तिश्च दोषाश्च मिथ्याज्ञानञ्च - तेषाम् इतरेतरयोगद्वन्द्वः - दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानि - तेषां दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम्। उत्तरात् उत्तरम्- उत्तरोत्तरम् । उत्तरोत्तरस्य अपायः- उत्तरोत्तरापायः तस्मिन्– उत्तरोत्तरापाये । न विद्यते अन्तरं यस्य तत्– अनन्तरम् । तस्मात् अनन्तरं– तदनन्तरम् । तदनन्तरस्य अपायः- तदनन्तरापायः। तस्मिन् – तदनन्तरापाये ।

अत्र उत्तराणि भवन्ति जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानि । उत्तरोत्तराणि भवन्ति प्रवृत्तिदोषमिथ्याज्ञानानि । उत्तरोत्तराणां मिथ्याज्ञान-दोष-प्रवृत्तीनां नाशे सति तदनन्तरापायाद् दोष- प्रवृत्ति- जन्मनां नाशात् अपवर्गः=



ISSN: 2320-740X

आत्यन्तिकदुःखनिवृत्तिः जायते ।

प्रमाण- प्रमेय- संशय- प्रयोजन- दृष्टान्त- सिद्धान्त- अवयव- तर्क- निर्णय- वाद- जल्प- वितण्डा- हेत्वाभास -च्छल- जाति- निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः इति सूत्रे षोडशानां पदार्थानां तत्त्वज्ञानात् निःश्रेयसस्य प्राप्तिः भवति इत्यर्थो लभ्यते । तत्र पदार्थतत्त्वज्ञानात् साक्षात् निःश्रेयसं न लभ्यते । तत्र कश्चन क्रमः अस्ति । आदौ षोडशानां पदार्थानां तत्त्वज्ञानं, ततः आत्मविषयकश्रवणेन आत्मविषयकमननं, ततः निदिध्यासनं, ततः साक्षात्कारः इति। अत्र मनने उपयुज्यते षोडशपदार्थतत्त्वज्ञानम् । साक्षात्कारानन्तरं निःश्रेयसप्राप्तौ अपि कश्चन क्रमः अस्ति । सः क्रमः अस्मिन् सूत्रे उच्यते । आत्मतत्त्वसाक्षात्कारात् मिथ्याज्ञानापायः, मिथ्याज्ञानापाये दोषापायः, दोषाणामपाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मापायः, जन्मापाये दुःखापायः इति । स च दुःखापायः आत्यन्तिकः भवति । तादृशात्यन्तिकदुःखापायः एव अपवर्गः । अत्मतत्त्वसाक्षात्कारात् मिथ्याज्ञानं निवर्तते इत्युक्तम् ।

तत्र मिथ्याज्ञानं कीदृशं भवति इति चेदुच्यते । यथार्थतया ज्ञातव्ये प्रमेये मिथ्याज्ञानम् अनेकविधं भवति । यथा आत्मविषकं मिथ्याज्ञानं भवति आत्मा नास्ति इति । अनात्मनि शरीरे आत्मा इति मिथ्याज्ञानं, दुःखे दुःखमयसंसारे सुखमिति, अनित्ये पृथिव्यादौ नित्यमिति, अत्राणे(अरक्षके) प्रभ्वादौ रक्षकः इति, सभये भयसहिते संसारे निर्भयमिति ज्ञानं, जुगुप्सिते अशुद्धे शरीरे अभिमतं शुद्धमिति ज्ञानं, हातव्ये त्याज्ये संसारे अप्रतिहातव्यमिति मिथ्याज्ञानम् । प्रवृत्तौ - शारीर-वाचिक-मानसिककर्मसु नास्ति कर्म इति, कर्मफलं - सुखं दुःखं नास्तीति मिथ्याज्ञानम्। संसारविषये मिथ्याज्ञानं भवति – अयं संसारः दोषनिमित्तः न इति । वस्तुतः दोषनिमित्तः संसारः। रागद्वेषमोहाः दोषाः, ततः भ्रमात्मक-इष्टानिष्टसाधनताप्रतिपत्तिः, ततः इच्छा/द्वेषः, ततः प्रवृत्तिः/निवृत्तिः, ततः चेष्टा भवति । चेष्टा एव संसारः इत्युच्यते । प्रेत्यभावविषये - यः प्रेयात् जन्तुः जीवः सत्त्वः आत्मा वा, प्रेत्य च भवेत्, सः जन्तुः, जीवः, सत्त्वः, आत्मा वा नास्तीति मिथ्याज्ञानम् । जन्मनः विषये मिथ्याज्ञानं भवति - वस्तुतः जन्म सनिमित्तं, जन्मसत्त्वे कर्मैव कारणं किन्तु तत्र अनिमित्तमिति, एवमेव जन्मनः परिसमाप्तिः तत्त्वज्ञानात् भवतीत्यतः सनिमित्तः जन्मोपरमः - तत्र अनिमित्तः नाम अकारणकः जन्मोपरमः इति मिथ्याज्ञानं, प्रेत्यभावः अनादिः एवमेव सान्तः, तत्त्वज्ञानात् तस्य निवृत्तिः जायते । तत्र प्रेत्यभावः आदिमान् अनन्तश्च इति मिथ्याज्ञानम् । प्रेत्यभावस्य आदिर्नास्तीत्यतः निर्निमित्तः भवति प्रेत्यभावः, तत्र निमित्तं किञ्चिदस्तीति मिथ्याज्ञानं, तथैव कर्मनिमित्तः भवति प्रेत्यभावः अर्थात् कर्मवशादेव जननं मरणं च, किन्तु प्रेत्यभावः कर्मनिमित्तः न इति अर्थात् जन्ममरणयोः कर्म कारणं न भवतीति मिथ्याज्ञानम् । बौद्धानां मते देहेन्द्रियबुद्धिवेदनासन्तानानां प्रतिसन्धानं - परस्परसम्बन्धः एव जननं, तेषां सम्बन्धस्य नाशे सति मरणं भवति । अतः आत्मनः प्रसक्तिरेव नास्तीत्यतः निरात्मकः प्रेत्यभावः इति

मिथ्याज्ञानम् । मोक्षविषये मिथ्याज्ञानं भवति मोक्षः सोढुम् अशक्यः यतः सर्वेषां कार्याणां विनाशः भवति, सर्वेषां बान्धवानां विप्रयोगः भवति, सर्वं सुखं लुप्यते इति । सर्वसुखोच्छेदं - सुखरहितम् अचैतन्यं - ज्ञानरहितं च मोक्षं न रोचयेत् इति । एतस्मात् मिथ्याज्ञानात् अनुकूलेषु रागः प्रतिकूलेषु द्वेषः जायते । रागद्वेषाधिकारात् - उद्रेकात् असत्येर्ष्यामायालोभादयः दोषाः भवन्ति । दोषवशात् प्रवृत्तिः जायते । अत्र प्रवृत्तिशब्देन शारीर-वाचिक-मानसकर्मजन्यं पुण्यं पापम् उच्यते । दशविधपापकर्माणि दशविधपुण्यकर्माणि भवन्ति । तत्र पापकर्मवशात् अधर्मः जायते । पुण्यकर्मवशात् धर्मः उत्पद्यते । पूर्वोक्तरागद्वेषमोहरूपदोषवशात् प्रवृत्तिः जायते । प्रवृत्तिशब्देन धर्माधर्मौ विवक्षितौ । कथं सः अर्थः लभ्यते इति चेत् धर्मं प्रति अधर्मं प्रति च साधनं भवति प्रवृत्तिः । अतः प्रवृत्तिशब्देन लक्ष्यीभूतधर्माधर्मयोः ग्रहणम् । प्रवृत्तिशब्दस्य शक्यार्थलक्ष्यार्थयोः प्रवृत्तिधर्माधर्मयोः साध्यसाधनभावः सम्बन्धः । प्रवृत्तिः साधनं, धर्माधर्मौ साध्यौ । तत्र उदाहरणं यथा अन्नसाधनाः प्राणाः, अतः अन्नं वै प्राणिनः प्राणाः इति । अन्नं साधनं येषां ते अन्नसाधनाः भवन्ति प्राणाः । अतः अन्नं प्राणाः इत्युच्यते । तथा च प्रवृत्त्या - धर्मेण अधर्मेण च जन्म लभ्यते । धर्माधिक्यात् अभिपूजितं जन्म, अधर्माधिक्यात् कुत्सितं जन्म । तत्र जन्म नाम शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः । शरीरेन्द्रियबुद्धीनां यः निकायः - समुदायः, तद्विशिष्टस्य आत्मनः प्रादुर्भावः- प्रकटनम् । शरीरेन्द्रियबुद्धिसमुदाये सति दुःखं जायते। इत्थं च दुःखकारणीभूतपापं पूर्वमपि आसीत् आत्मनि, किन्तु कार्यस्य दुःखस्य उत्पत्तिः तावत् सकलकारणसमवधाने सत्येव जायते । तानि च कारणानि - शरीरम् इन्द्रियं बुद्धिः इति । तेषां समुदायः - परस्परसंबन्धः यदा भवति तदा पापवशात् दुःखमुत्पद्यते । तच्च दुःखं प्रतिकूलमिति ज्ञायते । मिथ्याज्ञानादिदुःखान्ताः अविच्छेदेनैव प्रवर्तमानाः संसारः इति । दुःखान्तस्य संसारस्य उत्पत्तिः कथमिति उक्तम् । इदानीं दुःखस्य नाशक्रमः उच्यते भाष्यकारैः । आदौ पदार्थतत्त्वज्ञानं, ततः आत्मतत्त्वविषयकं श्रवणं, ततः मननं, ततः निदिध्यासनं ततः साक्षात्कारः । तादृशात्मतत्त्वसाक्षात्कारात् मिथ्याज्ञानं - देहादौ आत्मत्वभ्रमः नश्यति । अत्र प्रश्नः भवति यत् मिथ्याज्ञानं ज्ञाने अन्तर्भवति । ज्ञानञ्च क्षणद्वयं तिष्ठति । अतः योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वम् इति नियमात् तृतीयक्षणे तस्य नाशः भवत्येव इत्यतः आत्मतत्त्वज्ञानस्य कारणत्वं व्यर्थम् इति । तत्रोच्यते- तत्त्वज्ञानात् मिथ्याज्ञानं नश्यति नाम मिथ्याज्ञानवासना नश्यति इत्यर्थः । मिथ्याज्ञानवासनानाशे सति अग्रे मिथ्याज्ञानं नोत्पद्यते । मिथ्याज्ञानस्य अनुत्पादे सति दोषाः अपयन्ति अर्थात् दोषाणाम् उत्पत्तिः न भवति । अत्रापि प्रश्नः भवति यत् पूर्वं मिथ्याज्ञानं नश्यति नाम मिथ्याज्ञानवासना नश्यति इत्युक्तम् । तथैव दोषाः नश्यन्ति नाम दोषाणां वासना नश्यति इति भवतु इति । दोषाणां वासना यदि सम्भवति तदा दोषवासना नश्यति इति वक्तुं शक्यते । किन्तु दोषाणां वासना इत्येव न भवति । यतः दोषाः नाम राग- द्वेष- मोहाः दोषाः । तत्र मोहः नाम मिथ्याज्ञानमेव । अतः तस्य वासना नश्यतीति वक्तुं शक्यते चेदपि, रागः नाम इच्छा, इच्छावशात् संस्कारः (वासना) जायते इति तु न सम्भवति । अनुभववशात्



ISSN: 2320-740X

